।। नमोऽस्तु तस्मै जिनशासनाय ।।

# सिद्धान्त रहस्य बिन्दु :

प्रेरक

युगप्रधानाचार्यसम

प.पू.पं. चन्द्रशेखरविजयजी म.साहेब


પ્રકાશક

કમલ પ્રકાશન ટ્રસ્ટ

અમદાવાદ

# હૃદયાંજલિ

- જેમના રોમેરોમે પરમાત્માની આજ્ઞા પ્રત્યે અવિચળ બહુમાન છે...
- જેમના કરપુટ સદા માટે ગુરુવચનને ઝીલવા તત્પર છે...
- જેમના હૃદયમાં શાસ્ત્રવચનોનો ગંભીર ઘૂઘરાવ ધબકે છે...
- જેમના નેત્રોની કરૂણા અરિહંત ભગવંતના આર્હન્ત્યની સ્મૃતિ કરાવે છે...
- જેમના વિચારોમાં રમતી આત્મરમણતા સિદ્ધ ભગવંતના નિર્મલ આત્મસ્વરૂપનો પરિચય કરાવે છે...
- જેમની મુખમુદ્રા ઉપર રમતી ગંભીરતા આચાર્યભગવંતના અસાધારણ કોટિના ગુણોની યાદ અપાવે છે...
- જેમના ત્રિકરણયોગમાં ચમકતું જ્ઞાનનું અનુશાસન ઉપાધ્યાય ભગવંતની જ્ઞાનસાધના દૃષ્ટિપથમાં પસરાવે છે...
- જેમના ગાત્રોની મલિનતા પંચમ પરમેષ્ઠિની પરમનિર્મલતાના દર્શન કરાવે છે...
- મહામુનિઓની સાધનાના સ્મરણે જેમના નયનોમાં ઉપસી આવતા અશ્રુઓ શ્રમણ ભગવંતના સાધનાના તલસાટની ઓળખાણ આપે છે...

તે આ કળિકાળને પણ શોભાવતા તમામ
સંયમીઓના કરકમલમાં એક નાનીશી ભેટ

– મુ. ગુણહંસ વિજય

# આગામી નજરાણું...

**પીંજર એટલે પીંજર !**

પછી ભલેને તે સુવર્ણનું હોય, પક્ષીઓ માટે તો તે કારાવાસ જ! તેવી રીતે, દુન્યવી બાહ્ય કે આભ્યન્તર સંયોગો ભાવશ્રમણ માટે તો બંધન સમાન જ છે, પછી ભલે ને તે કેટલાંય લોભામણાં હોય...

આ સંયોગોથી મુક્તિ એ જ સાચી પ્રવ્રજ્યા !!! શ્રી ઉત્તરાધ્યયનસૂત્રના પ્રત્યેક સૂત્રના સથવારે, ચાલો આપણે પણ સંયોગોથી મુક્તિ મેળવીએ...



**પ્રકાશક :**

**કમલ પ્રકાશન ટ્રસ્ટ**

૬/એ, ચંદનબાળા કોમ્પલેક્ષ,

આનંદનગર પોસ્ટ ઓફિસ પાસે, ભઠ્ઠા-પાલડી,

અમદાવાદ - ૭. ફોન : ૨૬૬૦૫૩૫૫, ૨૬૬૫૨૬૬૮.

**લેખક :**

**સિદ્ધાન્તમહોદધિ, સચ્ચારિત્રચૂડામણિ,**

**સ્વ. પૂજ્યપાદ આ. ભગવંત શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજ સાહેબના વિનેય**

**સ્વ. પૂજ્યપાદ પંન્યાસ શ્રી ચન્દ્રશેખરવિજયજી મ.સા.ના**

**શિષ્ય પંન્યાસ પૂ. મુનિશ્રી ગુણહંસ વિજય**

**સંશોધક :**

**પ.પૂ. મુનિવર્યશ્રી જયભૂષણ મ. સાહેબ**

**પ્રથમ પ્રકાશન** : વિ.સં. ૨૦૭૦ મહા સુદ-૧૩ તા. ૧૨-૨-૨૦૧૪.

**નકલ : ૫૦૦**

**ટાઈપસેટીંગ :**

અરિહંત ગ્રાફિક્સ / કરણ ગ્રાફિક્સ 'સાઈન શો'

**મુદ્રક :**

**માનવ ગ્રાફિક્સ**

મુલુન્ડ (વેસ્ટ), મુંબઈ

મો. ૯૮૯૨૧૧૫૫૧૨

## સૌજન્ય

# શ્રી શ્વેતામ્બર જૈન તપાગચ્છ સંઘ

### વાંકાનેર, જી. રાજકોટ

પ.પૂ. નીતિસૂરીશ્વરજી સમુદાયના વર્તમાન
ગચ્છાધિપતિ પ.પૂ.આચાર્યદેવશ્રી હેમપ્રભસૂરિ મ.સા.ના
આજ્ઞાવર્તિની સા. અમિતપ્રજ્ઞાશ્રીજી મ.સા.ના શિષ્યા
સા. અક્ષયપ્રજ્ઞાશ્રીજી મ.સા.ની પ્રેરણાથી
તથા
શ્રમણી ગણનાયક-તાર્કિક શિરોમણિ
પૂજ્ય આચાર્યદેવ શ્રી અભયશેખરસૂરીશ્વરજી મ.સા.
તેમ જ પૂજ્યપાદ પંન્યાસપ્રવર
શ્રી જિનસુંદરવિજયજી મ.સાહેબની શુભપ્રેરણાથી
એક સદ્ગૃહસ્થ (હાલ ઘાટકોપર-ઈસ્ટ)એ
શ્રુતભક્તિનો લાભ લીધો એ બદલ
ખૂબ ખૂબ ધન્યવાદ...

લિ.

કમલ પ્રકાશન ટ્રસ્ટ

◆ ◆ ◆ ◆ ◆ ◆

**: પ્રાપ્તિસ્થાન :**

**હિતેશભાઈ ગાલા**
બી-૧૭, તૃપ્તિ સોસાયટી,
હનુમાન રોડ,
વિલે પાર્લે (પૂર્વ),
મુંબઈ- ૪૦૦ ૦૫૭.
**મોબાઈલ : ૯૮૨૦૯૨૮૪૫૭**

卐

**આશિષભાઈ મહેતા**
૭, સુનીષ એપાર્ટમેન્ટ,
રત્નસાગર સ્કૂલની સામે,
કાજીનું મેદાન,
ગોપીપુરા, સુરત
**મોબાઈલ : ૯૩૭૪૫૧૨૨૫૯**

卐

**મિતેષભાઈ જે. શાહ**
૪૩, નવકાર ફ્લેટ, નવકાર દેરાસરની બાજુમાં,
બેરેજ રોડ, વાસણા, અમદાવાદ
**મોબાઈલ : ૯૪૨૬૫૯૩૧૮૯**

◆ ◆ ◆ ◆ ◆ ◆



# સંશોધકની કલમે

તમામ ચૌદપૂર્વીઓનું સૂત્રાત્મક જ્ઞાન સમાન હોય છે. પણ અર્થાત્મક જ્ઞાનમાં અનંતગણો તફાવત હોઈ શકે છે એનું કારણ મતિજ્ઞાનવરણીયના ક્ષયોપશમની તરતમતા !

એમ વર્તમાનકાળમાં ૪૫ આગમોનો અભ્યાસ કરનારા અનેક પુણ્યાત્માઓ છે, પણ બધાને એનાથી થતો અર્થબોધ એક સરખો નથી હોતો. એમાં ઘણો તફાવત હોઈ શકે છે હા ! એ અલગ અલગ પ્રકારના કરોડો અર્થબોધ થાય તો પણ એ બધા સાચા જ, જો એ શાસ્ત્ર સાથે વિરોધવાળા ન હોય.

મારા વિદ્યાગુરુ પૂ.મુ. ગુણહંસ વિ.જીએ આગમાદિ ગ્રંથોનો અભ્યાસ કર્યો, અમને કરાવ્યો અને પોતાના ક્ષયોપશમ મુજબ ગ્રન્થોમાં ઉંડા ઉતરીને એના રહસ્યો કાઢવાનો પ્રયત્ન કર્યો. પૂજ્યપાદ દાદા ગુરુદેવ સિદ્ધાન્તમહોદધિ શ્રી પ્રેમસૂરીશ્વરજી મ.સા.ની ભાવના કે 'સાધુઓ સંસ્કૃતમાં રચના કરે...' એ નજર સામે રાખીને તેઓશ્રીએ એ રહસ્યો સંસ્કૃતભાષામાં ઢાળી દીધા... અને એ નૂતન ગ્રન્થને નામ આપ્યું **સિદ્ધાન્તરહસ્યબિન્દુ !**

પૂજ્યપાદ યુગપ્રધાનાચાર્યસમ ગુરુદેવ પંન્યાસપ્રવર શ્રી ચન્દ્રશેખર વિ.મ.સાહેબની એક હાર્દિક ભાવના કે 'સંયમીઓ સ્વાધ્યાય-સંયમ-સ્વભાવનો ત્રિવેણી સંગમ બનીને સ્વ-પરનું હિત કરનારા બને...' એ ભાવનાને સાકાર કરવા માટે લેખકશ્રીએ પ્રસ્તુત ગ્રન્થમાં ઘણી મહેનત કરી છે.

આ ગ્રન્થમાં લેખકશ્રીએ 'ભવ્યજીવોને શાસ્ત્રનો સ્પષ્ટ બોધ થાય.' તેવી હિતબુદ્ધિથી જે રહસ્યો પ્રગટ કર્યા છે. તેમાંના કેટલાક પદાર્થો વર્તમાનકાલીન પરંપરાથી કંઈક અલગ છતાં શાસ્ત્ર-અબાધિત હોવાથી *પ્રગટ કર્યા છે અને ત્યાં સ્પષ્ટપણે વારંવાર ખુલાસો કરેલો છે કે 'ગુરુપરંપરાથી ચાલતી સામાચારી પ્રમાણે* જ આચરણ કરવું, સામાચારીભંગમાં મોટો દોષ છે...' વગેરે.

ખ્યાલ રાખવો કે શ્રુતજ્ઞાન ઉત્સર્ગ-અપવાદ, વ્યવહાર-નિશ્ચય, જ્ઞાન-ક્રિયા વગેરે રૂપ અનેકાન્તવાદને સાપેક્ષ છે, માટે કોઈક એક અપેક્ષાથી લખાયેલો પદાર્થ બીજી અપેક્ષાથી અલગ પણ હોઈ શકે છે અને એ લેખકશ્રીને માન્ય જ હોય છે. એટલે એવી બીજી અપેક્ષાને લઈને ખંડન કરવાને બદલે અનેકાન્તવાદથી સમન્વય કરવાની વૃત્તિ સહુ રાખે એવી અપેક્ષા.

**સિદ્ધાન્તરહસ્યબિન્દુ** સામાન્ય નામ છે. લેખકશ્રીની ભાવનાની મને ખબર છે કે 'તેઓ તમામ આગમો ઉપર આ જ નામથી સંસ્કૃતમાં રહસ્યો લખવા ઈચ્છે છે.' આ તો માત્ર આરંભ જ છે.

આ ગ્રન્થમાં **ઓઘનિર્યુક્તિ** આગમ અને એની **દ્રોણાચાર્યની** વૃત્તિ... આ બેમાંથી મહત્ત્વની પંક્તિઓને અલગ તારવી લઈને એના ઉપર સંસ્કૃતમાં વિવેચન કરવાનો પ્રયત્ન કર્યો છે.

**ભૂલો હોય, તો ખુશીથી જણાવશો...**

**ગ્રન્થ ગમે, તો સહુને વંચાવશો....**

છદ્મસ્થ છીએ, એટલે લેખકશ્રી કે અમારાથી આજ્ઞાવિપરીત કંઈપણ લખાયું હોય.. તો મિચ્છામિ દુક્કડં...

✍ **મુનિ જયભૂષણ વિ.**



# प्रास्ताविकम्

**स्वाध्यायादिप्रधानयोगनिरता: सर्वे संयमिन: ।**

आचार्यद्रोणवचनं ओघनिर्युक्तिवृत्तौ अस्ति यदुत 'इयं ओघनिर्युक्ति: प्रव्रज्याप्रथमदिवस एव दीयते' इति। अनेन वचनेन ज्ञायते यदुत 'ओघनिर्युक्ते: माहात्म्यं संयमजीवने अतिमहत्' इति।

ओघनिर्युक्ते: तद्वृत्तेश्च कतिपयानि वचनानि पृथक् कृत्वा तदुपरि विवेचनरूप: प्रस्तुत: सिद्धान्त-रहस्यबिन्दुग्रन्थ: मया स्वक्षयोपशमानुसारेणालिखित: । अत्र या: काश्चित् क्षतय:, सा ममैव, यत्तु शोभनं, तत् पूज्यपादानां **युगप्रधानाचार्यसमपंन्यासप्रवरचन्द्रशेखरविजयानां** दीक्षावाचनापरिणति प्रभृतिसुमहार्घवस्तुप्रदायिनां कृपाया एव प्रभाव इति मम श्रद्धानम्।

'वर्तमानसंयमिनां भविष्यत्संयमिनां च हितं भवतु' इत्येतावन्मात्रभावनया कृतमिदं कार्यं यदि पुण्यानुबन्धिपुण्यजनकं भवेत्, तर्हि तादृशपुण्यप्रभावात् सर्वेऽपि वर्तमाना भाविनश्च संयमिन: शीघ्रतममेव स्वपरहितं साधयित्वा मोक्षमाप्नुवन्तु' इति प्रार्थनां कृत्वा विरम्यते।

**श्रमणसंघकिङ्कर:**
**युगप्रधानाचार्यसमपंन्यासचन्द्रशेखरविजयशिष्य:**
**गुणहंसविजय:**
**स्थानं: नवकार वासणा संघ, अमदावाद**
**वि.सं. २०७०, पोष वद-चतुर्दशी**

# अनुक्रमणिका


| क्र. | विषय | पत्र क्रमांक: |
|---|---|---|
| १. | सिद्धान्तरहस्यबिन्दुग्रन्थरचनाकारणानि | १३ |
| २. | 'अरहन्ताणं-अरिहन्ताणं' इतिपाठद्वयविचार: | १५ |
| ३. | विंशतिवर्षपर्यायस्य दृष्टिवादो दीयते इत्यत्र प्रश्नसमाधाने | १६ |
| ४. | 'श्रेयांसि बहुविघ्नानि' इति वचनस्य रहस्यं | १८ |
| ५. | अपशकुनं मङ्गलं इति विचार: | १९ |
| ६. | क्त्वाप्रत्ययबलादेकान्तनित्यानित्यत्ववादखण्डनम् | २१ |
| ७. | सूत्रं किंकृतं इति विचार: | २२ |
| ८. | सूत्रदाने आचार्यस्य के दोषा इति वर्णनम् | २३ |
| ९. | सूत्रदाने उपाध्यायस्य के गुणा इति वर्णनम् | २४ |
| १०. | 'सर्वेष्वेवाचारेषु अपवादोऽस्ति' इत्यत्र शङ्कासमाधाने | २५ |
| ११. | विनयवैयावृत्त्ययो: प्राधान्यविचार: | २७ |
| १२. | मूलगुणोत्तरगुणयो: का व्याख्येति चिन्तनम् | २९ |
| १३. | शोभनतिथ्यादिषु प्रव्रज्यादिधर्मकरणनिरूपणम् | ३१ |
| १४. | द्रव्यानुयोगस्य सम्यग्दर्शनशुद्धिकारकत्वम् | ३३ |
| १५. | चारित्रमपि युक्त्यनुगतमेव ग्राह्यम् | ३४ |
| १६. | आज्ञाग्राह्ययुक्तिग्राह्यपदार्थविचार: | ३४ |
| १७. | अपराधालोचनायां विवेक: कर्त्तव्य इति विचार: | ३४ |
| १८. | त्रसादिजीवसंसक्तवस्त्रादिकस्य को विधिरिति विचार: | ३६ |
| १९. | पञ्चाशद्बोलोच्चारव्यवहारविचार: | ३७ |
| २०. | मासकल्पसामाचारीभङ्गे के दोषा इति वर्णनम् | ३८ |
| २१. | स्थिरवासे के दोषा इति वर्णनम् | ४० |
| २२. | मासकल्पव्यवहारो विच्छिन्नो न वा? | ४१ |
| २३. | मृतकोत्प्रव्रजितादीनामुपधि: ग्राह्य: परिष्ठाप्यो वा? इति विचार: | ४१ |
| २४. | वैयावृत्त्यस्याप्रतिपातिगुणत्वनिरूपणे किं रहस्यम्? | ४२ |
| २५. | अगीतार्थस्य आलोचनाश्रवणेऽनधिकार: | ४३ |
| २६. | साधो: जिह्वाग्रं सुयन्त्रितं इत्यत्र किं रहस्यं? | ४४ |

| क्र. | विषय | पत्र क्रमांक: |
|---|---|---|


२७. गणभेद: कुत्र कर्तव्य:? इत्यत्र पूर्वापरविरोधसमाधानं ........................ ४५
२८. चैत्यसाधुवन्दना पदस्य कोऽर्थ:? ........................ ४६
२९. उपकरणस्याप्यधिकरणत्वापत्ति: कथं भवति? ........................ ४७
३०. पादप्रमार्जनविधे: रहस्यं किं? ........................ ४७
३१. निर्युक्तिकारादीनां छद्मस्थत्वेऽपि प्रामाणिकत्वम् ........................ ५०
३२. सामाचारीभङ्गसकाशाज्जिनशासनहीलनाया अधिकदोषत्वम् ........................ ५१
३३. धूम्मसवर्णनम् ........................ ५२
३४. जङ्घार्धप्रमाणजलोत्तरणविधिरहस्यम् ........................ ५३
३५. गीतार्थेन स्वपतो जाग्रापणं कर्त्तव्यम् ........................ ५५
३६. गुरुध्यानव्याघातो न कर्तव्य: ........................ ५५
३७. संयमात्मविराधनयो: स्वरूपं ........................ ५७
३८. संयमात्मविराधनयोर्मध्ये का महती? ........................ ५८
३९. 'जे आसवा ते परिसवा...' इतिवचनस्य रहस्यम् ........................ ५९
४०. निश्चयनयमाहात्म्यम् ........................ ६१
४१. व्यवहारनयमाहात्मयम् ........................ ६१
४२. सङ्खडिदोषा: ........................ ६२
४३. पुण्यानुबन्धिपुण्यस्योपादेयता ........................ ६२
४४. चैत्यगृहावश्यकता संयमिनामस्ति न वा? ........................ ६४
४५. असाम्भोगिकै: सह वन्दनादिव्यवहारव्यवस्थाविचार: ........................ ६७
४६. सामाचारीभेदे परस्परं व्यवहारकरणे दोषापत्तिविचार: ........................ ६८
४७. साक्षात्सचित्तोपयोगस्य महादोषत्वम् ........................ ६९
४८. जिनाज्ञागुर्वाज्ञयोर्मध्ये का प्रधाना? ........................ ७२
४९. आधाकर्मादिनिषेध: कर्तव्यो न वा? ........................ ७३
५०. 'ओयविअं' इति पदस्य विचार: ........................ ७४
५१. प्रच्छन्नभोजनकरणं किमर्थं? ........................ ७५
५२. ऋतुबद्धकाले आचार्यादय: किं फलकादिकमुपभोक्तुमर्हन्ति न वा? ........................ ७७
५३. संविग्ना: किमकालचारिसंयतीयुक्ता: सम्भवन्ति न वा? ........................ ७८
५४. यथाछन्दस्य पार्श्वस्थादिसकाशाद् हेयतरत्वम् ........................ ८१

| क्र. | विषय | पत्र क्रमांक: |
| --- | --- | --- |
| ५५. | वर्षाकाले विहारनिषेधविचार: | ८२ |
| ५६. | स्थापनाचार्य: कस्य भवति? | ८२ |
| ५७. | अगीतार्थस्य शोभनकारणान्याश्रित्याऽपि स्वतन्त्रविहारकरणनिषेध: | ८३ |
| ५८. | शाकादिभक्षणनिषेध: | ८४ |
| ५९. | प्राचीनकाले प्रतिक्रमणस्यान्त: कुत्रासीत्? | ८५ |
| ६०. | क्षेत्रप्रत्युपेक्षणार्हानर्हविचार: | ८५ |
| ६१. | गोचर्यां याचना कर्त्तव्या न वा? | ८६ |
| ६२. | उपाश्रय: ग्रामादिषु कुत्र ग्राह्य:? | ८७ |
| ६३. | भाविचातुर्मासस्य पूर्वचातुर्मासकाले एव निर्णय उचितो न वा? | ८९ |
| ६४. | नित्यवासस्य व्याख्या | ८९ |
| ६५. | सामूहिकचातुर्मासछ'रीपालितसङ्घोपधानादिकृत्यानि किमुचितानि न वा? | ९० |
| ६६. | चातुर्मासानन्तरं सङ्घस्य विहारदिनज्ञापनं उचितं न वा? | ९३ |
| ६७. | रात्रौ स्त्रीसहितसभायां व्याख्यानमुचितं न वा? | ९५ |
| ६८. | अधुनातने योगोद्वहने 'संघट्टा' क्रियाया: मूलभूतं शास्त्रवचनम् | ९६ |
| ६९. | जिनप्रतिमादिप्रदक्षिणा शकुनं न वा? | ९७ |
| ७०. | चातुर्मासप्रवेशे पूर्णकलशादिरूपं द्रव्यमङ्गलं कारापणीयं न वा? | ९८ |
| ७१. | शिथिलस्यापि लिङ्गधारिण: शकुनत्वं | ९९ |
| ७२. | अन्धकारे विहार उचितो न वा? | ९९ |
| ७३. | उपध्युपहननस्य भावार्थ: | १०० |
| ७४. | उपहतोपधिपरिष्ठापनकारणानि | १०१ |
| ७५. | गृहस्थपरिचयपरित्याग: कर्त्तव्य: | १०२ |
| ७६. | द्रव्यविराधनाभावविराधनयो: निरूपणम् | १०३ |
| ७७. | प्रश्रवणस्य व्युत्सृजनं परिष्ठापनं च कदा किमुचितम्? | १०४ |
| ७८. | स्वाध्यायाकरणं निर्युक्तिगुणनं च कदा? | १०५ |
| ७९. | रात्रौ प्रश्रवणार्थोत्थाने द्रव्याद्युपयोगकरणस्य च रहस्यम् | १०७ |
| ८०. | समाधिप्राप्तौ प्रयत्नकरणे साधोर्गृहस्थस्य चमहान् भेद: | १०९ |
| ८१. | प्राघुर्णकानां त्रीणि दिनानि यावत् प्राघुर्णकं कर्त्तव्यम् | ११० |
| ८२. | साधूनां परस्परं स्पर्शे के दोषा? | ११० |

| क्र. | विषय | पत्र क्रमांक: |
|---|---|---|


८३. धर्मकथकस्य रत्नाधिकागमने आचार्यागमने च किमौचित्यम् ........................ १११

८४. चैत्यरहितक्षेत्रे मासकल्पादिकरणं प्राचीना सामाचारी तदानीन्तनद्रव्यादिनियता ........... ११२

८५. आचार्यं प्रति शिष्याणां अनुकम्पौचित्यम् न वा? ........................ ११४

८६. वैयावृत्त्यकरे के गुणा अन्वेषणीया:? ........................ ११५

८७. प्रार्घुणकभक्तिकरणे गुणा: ........................ ११५

८८. दूरं भिक्षाटने गुणा: ........................ ११६

८९. असंसृष्टव्यवस्था ........................ ११६

९०. छद्मस्थानां केवलिनां च वस्त्रप्रतिलेखनविधि: ........................ ११७

९१. प्रतिलेखनप्रमार्जनयोश्चतुर्भङ्गी ........................ ११८

९२. उर्ध्वस्थितसाधो: निषीदनकरणे को विधि:? ........................ ११९

९३. दिवसे स्वपनं न कर्त्तव्यम् ........................ १२१

९४. 'प्रतिलेखनं गोदोहिकासनेन कर्त्तव्यम्? इति भ्रमस्य निरास: ........................ १२२

९५. प्रतिलेखनं कस्मिन्काले कर्त्तव्यम्? ........................ १२२

९६. 'प्रतिलेखनाकरणवेला' इत्यस्य कोऽर्थ:? ........................ १२५

९७. पुस्तकोपयोगस्यापवादिकत्वम् ........................ १२६

९८. अतिरिक्तभोजनादिपरिष्ठापनं किं धर्म: उत अधर्म:? ........................ १२६

९९. असाम्भोगिकान् प्रति उपेक्षासंयमस्यानौचित्यम् ........................ १२७

१००. पादोनायां प्रथमपौरुष्यां सत्यां पात्रकप्रतिलेखनम् ........................ १२८

१०१. निश्चयत: पौरुषीप्रमाणकालस्य वर्णनम् ........................ १२८

१०२. प्रतिलेखनाकालातिक्रमे प्रायश्चित्तम् ........................ १३४

१०३. सूत्रार्थस्वाध्यायमाहात्म्यम् ........................ १३५

१०४. पृथ्वीकायादीनां सूक्ष्मयतनाया: निरूपणम् ........................ १३६

१०५. संविग्नानामेव साम्भोगिकत्वासाम्भोगिकत्वम् ........................ १३८

१०६. साध्व्यापाते न गन्तव्यम् ........................ १३८

१०७. *स्थण्डिलभूमौ उपवेशने दिग्विधि:* ........................ १३९

१०८. अवष्टम्भनिषेध: ........................ १३९

१०९. सचित्तादिपृथ्वीवर्णनम् ........................ १४०

११०. सचित्तादिअप्कायवर्णनम् ........................ १४०

| क्र. | विषय | पत्र क्रमांकः |
|---|---|---|


१११. विभूषायाः दोषाः ........ १४१
११२. उपधिप्रक्षालनविधिः ........ १४२
११३. सचित्तादिवायुवर्णनम् ........ १४३
११४. द्रवसहितं पात्रकं न निक्षेपणीयम् ........ १४४
११५. अल्पस्यापि परिग्रहस्य त्यागः कर्तव्यः ........ १४५
११६. अनेकशः गृहस्थगृहे भिक्षाद्यर्थं प्रवेशनिषेधः ........ १४६
११७. एकाकिभिक्षोः भिक्षाटनादौ दोषः ........ १४७
११८. धर्मसाधनव्यवस्था अधिकारिणमपेक्ष्य भवति ........ १४८
११९. भिक्षाटने सर्वमुपधिं गृहीत्वा गन्तव्यमित्युत्सर्गः ........ १४८
१२०. स्त्र्युपद्रवे सति किं कर्त्तव्यमिति विधिः ........ १४९
१२१. उपयोगकरणकायोत्सर्गविचारः ........ १५०
१२२. 'जह भणियं पुव्वसूरिहिं' उत 'जह भणियं पुव्वसाहुहिं?' ........ १५१
१२३. संविग्नपाक्षिकान् पार्श्वस्थादींश्च प्रति वन्दनादिव्यवस्था ........ १५२
१२४. षट्कायरक्षकस्यापि प्रवचनहीलनाकारिणो दुर्लभबोधित्वम् ........ १५३
१२५. अपरिपक्वशिष्यान् मुञ्चत आचार्यस्य शिष्याणां च महादोषः ........ १५४
१२६. गोचर्यां स्त्र्यादिषु न रागो विधेयः बुभुत्सितवत्सकवत् ........ १५६
१२७. हस्तलग्नजलाचित्तताकालविचारः ........ १५६
१२८. एकसाधुहीलनायां सर्वसाधुहीलना कथं? इति विचारः ........ १५९
१२९. वैयावृत्त्यस्याप्रतिपातिगुणत्वं कथं? इति विचारः ........ १६०
१३०. शिक्षका सागारिकाः ........ १६३
१३१. गुरुदृष्टिपथस्थाने भोक्तव्यम् ........ १६३
१३२. भोजनकारणानि ........ १६४
१३३. एकेनैव गुरुवैयावृत्त्यकरणे तस्य सूत्रार्थहानिः ........ १६४
१३४. गुरुवैयावृत्यस्य स्वाध्यायस्य च मध्ये गुरुलाघवविचारः ........ १६५
१३५. पात्रकं चतुर्भिरङ्गुलैरूनं भर्त्तव्यम् ........ १६६
१३६. जलगालनकारणानि ........ १६६
१३७. जलगालनं वस्त्रेण कर्त्तव्यं न वा? इति विचारः ........ १६७
१३८. गोचरीमण्डल्यां परिवेषकः कीदृशो भवति? इति विचारः ........ १६८
१३९. गोचरीमण्डल्यां कणादिपतने दोषाः ........ १६९

| क्र. | विषय | पत्र क्रमांक: |
|---|---|---|
| १४०. | प्रथमं मधुरं भोक्तव्यम् | १७० |
| १४१. | निर्दोषमसारं च भोक्तव्यम् | १७१ |
| १४२. | भोजनकरणे षट् प्रयोजनानि | १७२ |
| १४३. | भोजनाकरणकारणाणि षट् | १७३ |
| १४४. | अतिरिक्तभक्तं कस्य साधो: दातव्यं? कस्य च न? | १७४ |
| १४५. | अतिरिक्तभक्तपरिष्ठापनविधि: | १७५ |
| १४६. | आचार्यस्य भक्ति: सर्वादरेण करणीया | १७७ |
| १४७. | गोचर्यां वस्तुयाचनायाचनयोर्विचार: | १७८ |
| १४८. | रात्रौ उच्चारप्रश्रवणार्थं प्रतिलेखनीयानां चतुर्विंशतिस्थानानां स्वरूपम् | १७९ |
| १४९. | आचार्यनिश्रायां प्रतिक्रमणं कर्त्तव्यम् | १८२ |
| १५०. | आचार्य: 'सयणा' इति गाथां द्विवारं गुणयति | १८३ |
| १५१. | प्राचीनकालीनं प्रतिक्रमणं षडावश्यकपर्यन्तम् | १८४ |
| १५२. | कालग्रहणयोग्य: साधु: | १८५ |
| १५३. | 'कीदृशं पात्रं ग्राह्यं' इति विचार: | १८५ |
| १५४. | पटलानां निरूपणम् | १८७ |
| १५५. | कल्पत्रयप्रयोजनम् | १८८ |
| १५६. | मुखवस्त्रिकाप्रयोजनम् | १८८ |
| १५७. | चोलपट्टकप्रयोजनम् | १८९ |
| १५८. | चातुर्मासे द्विगुण: उपधि: धारणीय: | १८९ |
| १५९. | उपानदुपयोगस्य संयमपोषकत्वम् | १९० |
| १६०. | यष्टिप्रयोजनम् | १९१ |
| १६१. | उपकरणाधिकरणयो: स्वरूपम् | १९२ |
| १६२. | निश्चयनयसर्वस्वनिरूपणम् | १९३ |
| १६३. | निश्चयव्यवहारोभयप्राधान्यनिरुपणम् | १९४ |
| १६४. | शिथिलानां लोकोत्तरानायतनत्वम् | १९५ |
| १६५. | साधु-साध्वीनामालोचनाकरणविधि: | १९६ |
| १६६. | आलोचनाऽवश्यं करणीया | १९७ |
| १६७. | आलोचनाकरणाकरणयो: गुणदोषा: | १९७ |
| १६८. | चारित्रवत उत्कर्षत: कियन्तो भवा: इति विचार: | १९८ |

नमोऽस्तु तस्मै जिनशासनाय

# सिद्धान्त रहस्यबिन्दुः ।

## चन्द्रशेखरीया वृत्तिः

वृत्तिकारमंगलम् -

**यदीयसम्यक्त्वबलात्प्रतीमो भवादृशानां परमस्वभावम् ।**

**कुवासनापाशविनाशनाय नमोऽस्तु तस्मै जिनशासनाय ॥**

अधुना श्रीतपोगच्छश्वेताम्बरमूर्तिपूजकजैनसंघे पञ्चचत्वारिंशदागमाः प्रसिद्धाः, तथाहि एकादश अङ्गानि, द्वादश उपाङ्गानि, दश प्रकीर्णकानि, षट् छेत्रसूत्राणि, चत्वारि मूलानि अनुयोगद्वारसूत्रं नंदीसूत्रञ्च । तेषु तदुपरि च प्रभूतानि निर्युक्तिभाष्यचूर्णि-वृत्तिरुपाणि विवरणानि उपलभ्यन्ते । ततश्च वर्तमानं श्रुतं प्राक्कालीनश्रुतसागराद् हीनमपि साम्प्रतकालीनानल्पायुर्मेधाधारणाबलसमन्वितजीवानाश्रित्य महोदधिकल्पमेव ।

किञ्चेयमवसर्पिणी 'हुंडा'ऽपरनामिका, स्वभावत एव श्रुतचारित्रधर्मप्रतिकूला । तत्रापि च पञ्चमारकलक्षणोऽयं कालः कलिकारकत्वात्कलियुगापरनामकः विशेषतो मोक्षमार्गाराधनविघ्नकरः, तथा भरतक्षेत्रान्तर्वर्तीनि च क्षेत्राणि सत्संयमाप्रायोग्यानि, अत एवात्र वर्तमाना जीवा अपि हीनप्रज्ञा हीनायुष्काश्च, ततश्च वर्तमानजीवानां वर्तमानमपि

महोदधिकल्पं श्रुतं दुरवगाहं सञ्जातम् । ततश्च सम्यग्जिनागमबोधाभावात् का वार्ता परिणतिप्रधानचारित्रपालनस्य ? ज्ञानाधीनत्वात्तस्य, तदुक्तं **'पढमं नाणं तओ दया'** (दशवैकालिकसूत्र) इति । चारित्राभावे चास्तां परमपदप्राप्तिः, सद्गतिरपि दुष्प्रापैवेति भवेद् दुर्लभमपि मानुषं जन्म निरर्थकमेवेति ।

एतच्च सर्वं मनसि विचिन्त्य 'आगमरहस्यावबोधः संक्षेपतोऽपि सम्यक् सर्वेषां भवत्वित्येतदर्थं कश्चिन्महान्यत्न आवश्यक' इति दृढं निश्चितमस्माभिः । तदर्थमेवायमारम्भः सिद्धान्तरहस्यबिन्दुग्रन्थस्य । अत्र हि क्रमशः पञ्चचत्वारिंशता-मप्यागमानां अतीवोपयोगीनि वाक्यानि पृथक्कृत्य तदुपरि किञ्चिद् विवेचनं करिष्यतेऽस्माभिः ।

यद्यप्यागमवाक्यान्यतीवगभीराणि, स्थूलप्रज्ञः स्थूलबोधश्चाहम्, तथापि 'शुभे यथाशक्ति यतनीयम्' इति । न्यायत इदं धार्ष्ट्यमवलम्बितमिति क्षमन्तु मां सज्जनाः । यादृशो मम शास्त्रबोधः, यादृशं च सम्प्रदायपरिज्ञानम्, यादृशश्च स्वानुभवः, तदनुसारेण विवरणं कर्तुं प्रयतिष्येऽहम् । एतत्त्रितयानुसारेणैव प्राचीनमहात्मभिर्ग्रन्थरचना समादृतेति अस्माभिरपि स एव मार्गः अनुसृतः,

तदुक्तं योगशास्त्रे **"श्रुताम्भोधेरधिगम्य, सम्प्रदायाच्च सद्गुरोः । स्वसंवेदनतश्चापि योगशास्त्रं विरच्यते"** इति हेमचन्द्रसूरिभिः ।

तथा अध्यात्मसारे "शास्त्रात्परिचितां सम्यक् सम्प्रदायाच्च धीमताम् । इहानुभवयोगाच्च प्रक्रियां कामपि ब्रूवे" इति यशोविजयोपाध्यायैः ।

**ननु** शोभनं कार्यमारभ्यते भवद्भिः, भविष्यत्यस्माद् ग्रन्थात्प्रभूतोपकारः श्रीश्रमणसंघस्य, विशेषतश्च सकलागमपठनासहिष्णुषु, सकलागमपठनाधिकाररहितेषु च श्रमणेषु तादृशीषु च श्रमणीषु । किन्तु प्रथमं कमागमं पुरस्कृत्यायं ग्रन्थ आरभ्यते इत्येव ज्ञातुमीहे मन्मन इति **चेत्** ओघनिर्युक्तिं पुरस्कृत्येति । सैव कथं प्रथमं पुरस्कृतेति **चेत्** **'इयं प्रव्रज्याप्रथमदिवस एव दीयते'** इति वृत्तिकृद्वचनमनुसृत्येति । यतो हीयमोघनिर्युक्तिः प्रव्रजितानां प्रथमदिवसे एव दीयते, तत एवास्माभिरपि प्रथमं तां पुरस्कृत्यैवायं ग्रन्थारम्भः क्रियत इति भावः ।

एवं तावत्प्रस्तावनां कृत्वाऽधुनौघनिर्युक्तिग्रन्थमाश्रित्य सिद्धान्तरहस्यबिन्दुग्रन्थ-रचनमारभ्यते ।

**( १ ) णमो अरहंताणं णमो सिद्धाणं ।**
**णमो आयरियाणं णमो उवज्झायाणं**
**णमो लोए सव्वसाहूणं**
**एसो पंच णमुक्कारो, सव्वपावप्पणासणो**
**मंगलाणं च सव्वेसिं, पढमं हवइ मंगलम् ।**

**चन्द्र.** इदं च मङ्गलं निर्युक्तिकृद्भद्रबाहुस्वामिभिर्ग्रन्थारम्भे संदृब्धं प्रारीप्सितग्रन्थविघ्न-विनाशाय, शिष्टाचारपरिपालनाय, 'श्रेयःकार्यारम्भेऽवश्यं मङ्गलं कर्त्तव्यमिति शिष्यबोधाय च ।

**ननु** अस्माभिस्तु 'अरिहंताणमित्येव पाठो दृष्टः श्रुतश्च, अत्र तु 'अरहंताणमिति पाठो दृश्यते, तत्कथं न विरोध इति **चेत्** ।

पञ्चमङ्गलमहाश्रुतस्कन्धस्य शाश्वतत्वात् शाश्वते च पाठभेदासम्भवात् तत्र एक एव पाठः, स च 'अरिहंताणमित्येवंरुप एव । अयन्तु न पञ्चमङ्गलमहाश्रुतस्कन्धः, किन्तु तत्सदृशः अन्य एव पाठ इति अरहंताणं इति पाठेऽपि न विरोधः ।

**ननु** 'अरहंताणं अरिहन्ताणं वा' इत्यस्य पदस्य कोऽर्थः ? अरिहन्तृभ्य इति **चेत्** तर्हि सिद्धानां सामान्यकेवलिनामपि च अरिहन्तृत्वात् तेषामपि अनेनैव वाक्येन नमस्कारापत्तिः, ततश्च 'नमो सिद्धाणमिति वाक्यमधिकमेवेति । यदि च अरुहद्भ्यः भवबीजदाहात्पुनर्जन्मरहितेभ्य इति यावदिति अर्थः, तदापि सिद्धानामपि अरुहत्त्वात् सैवापत्तिः । तस्मात् अर्हद्भ्यः अष्टप्रातिहार्यरुपदेवपूजायोग्येभ्यः इत्येवार्थो न्याय्यः, नेतरौ द्वौ इति **चेत्** ।

**न,** अर्थद्वयस्य व्युत्पत्त्यर्थानुसारेण सिद्धेऽतिव्याप्तावपि **'योगाद् रूढेर्बलीयस्त्वम्'** इति न्यायात् तीर्थकृतामेव अरिहन्तृ-अरुहद्-अर्हच्छब्दवाच्यत्वम्, न सिद्धानामिति न कश्चिद् दोषः ।

अयं भावः, महाँश्चासौ वीरश्चेति महावीर इत्येवं महावीरपदव्युत्पत्तिः, तदनुसारेण तु सर्वे एव तीर्थकरा महावीरा एव, परन्तु रूढ्यनुसारेण तु चरमतीर्थंकर एव महावीर इति

महावीरपदेन स एव वाच्यते, नान्ये तीर्थंकराः । एवमत्रापि बोध्यमिति ।

इदन्तु बोध्यं चतुष्पदात्मकचूलाविरहितः पञ्चपदनमस्कारः न पञ्चमङ्गलमहाश्रुतस्कन्धः, किन्तु सर्वश्रुतस्कन्धाभ्यन्तरभूतः सः, नवपदात्मकश्च नमस्कारः चूलायुक्तत्वात् स्वतन्त्रः श्रुतस्कन्धः इति । तदुक्तं प्रतिमाशतके तृतीयकाव्यवृत्तौ → **पञ्चपदनमस्कारश्च सर्वश्रुतस्कन्धाभ्यन्तरभूतः, नवपदश्च समूलत्वात् पृथक् श्रुतस्कन्ध इति प्रसिद्धमाम्नाये** ← इति । समूलत्वात् = सचूलत्वात् पृथक् = स्वतन्त्र इति । शेषं स्पष्टम् ।

## (२) विंशतिवर्षपर्यायस्य दृष्टिवादो दीयते, नारतः, इयं तु प्रथमदिवस एव दीयते । (ओ.नि. १-२)

**चन्द्रः** अयं भावः, साधोः प्रतिदिनकर्त्तव्यरुपा ओघसामाचारी नवमपूर्वे वर्तते, तच्च दृष्टिवादे वर्तते । स च यस्य साधोः प्रव्रज्यापर्यायो विंशतिवर्षो भवति, तस्य दीयते, तत्पूर्वं तु नेति अभिनवप्रव्रजितानां ओघसामाचारी श्रुतरुपेण दुष्प्रापैव । केवलं आसेवनशिक्षारुपेण सा गुरोः सकाशात्प्राप्यते । ततश्चाभिनवप्रव्रजितानामपि सा श्रुतरुपेण सुप्रापा भवेदित्येतदर्थं भद्रबाहुस्वामिना नवमपूर्वात्सा उद्धृता । उद्धृता तु साऽभिनवप्रव्रजितानां प्रव्रज्याप्रथमदिवसे एव दातुं शक्यते, न तत्र विंशतिवर्षपर्यायापेक्षेति विंशतिवर्षपर्यायप्राप्या ओघसामाचारी ओघनिर्युक्तिरुपेण प्रव्रज्याप्रथमदिवसप्राप्या कृता भद्रबाहुस्वामिनेति एतदेव उपक्रमणम्, कालतः समीपमानयनमिति भावः ।

**स्यादेतत्** दृष्टिवादाध्ययनं साध्वीनां तावत्सर्वथा निषिद्धमेव, तत्किं तस्मादुद्धृताया ओघनिर्युक्तेरध्ययनं साध्वीनामनुमतं न वा इति ।

अत्रानुमतमिति वयं ब्रूमः, अत एव सर्वेषु गच्छेषु साध्वीनां ओघनिर्युक्त्यध्ययनं यथायोग्यं अनुमन्यमानं दृश्यत एव । ततश्च यच्छास्त्रं साध्वीनां अध्ययनाय निषिद्धं, तस्मादुद्धृतं तु शास्त्रं मूलशास्त्रात्पृथग्भूतं कथंचिदध्ययनायानुमतमपि भवेदिति सिद्धमिति ।

इत्थं च प्रकृतमपि सिद्धान्तरहस्यबिन्दुशास्त्रं साध्वीनां यथायोग्यमध्ययनायानुमतम् । केवलं पात्रता दृढं परीक्षणीयेत्येतावानेवोपदेशः ।

**ननु** 'विंशतिवर्षपर्यायस्य दृष्टिवादो दीयते', इत्येष नियमः किं मन्दप्रज्ञानाश्रित्य, मध्यमप्रज्ञानाश्रित्य पटुप्रज्ञानाश्रित्य वेति **चेत्**

सर्वानेवाश्रित्येति सम्भावयामः ।

कथमेतत्सम्भाव्यते इति **चेत्**

पूर्वापरग्रन्थसंदर्भपर्यालोचनेनेति ।

कः पूर्वग्रन्थसन्दर्भः को वाऽपरग्रन्थसन्दर्भ इति न जानीमो वयं सम्यगिति **चेत्**

**शृणु**, जघन्यतोऽपि एकोनत्रिंशद्वर्षजन्मपर्यायस्यैव साधोः परिहारविशुद्धिककल्पजिनकल्पादिग्रहणं शास्त्रेऽनुमतम्, नार्वाक् । एतच्च विंशति वर्षप्रव्रज्यापर्यायस्यैव साधोर्दृष्टिवाददाने घटते, नान्यथा । तथाहि - जघन्यतोऽपि अष्टवार्षिकस्यैव दीक्षाग्रहणमनुज्ञातम्, न सप्तादिवार्षिकस्य । ततश्च अष्टवार्षिकस्य दीक्षाग्रहणानन्तरं विंशतिवर्षप्रव्रज्यापर्याये सति दृष्टिवादस्याध्ययनम् । इत्थं चैकोनत्रिंशद्वर्षजन्मपर्यायस्य तस्य जिनकल्पादिग्रहणं सम्भवेत् । दृष्टिवादान्तर्गतानां चतुर्दशपूर्वाणां मध्याद् यावत् जघन्यतोऽपि नवमपूर्वतृतीयवस्तुपर्यन्ताध्ययनं न भवेत्, तावज्जिनकल्पादिग्रहणं न सम्भवत्येवेति जिनकल्पादिग्रहणे तदध्ययनं तु आवश्यकमेवेति तदध्ययनात्पूर्वं तु जिनकल्पादिग्रहणमसम्भव्येवेति ।

यदि च पटुप्रज्ञानाश्रित्य पञ्चदशादिवर्षपर्यायेऽपि दृष्टिवादो दीयेत, तर्हि अष्टवार्षिकस्य दीक्षाऽनन्तरं पञ्चदशादिवर्षे दृष्टिवादाध्ययनसम्भवात् त्रयोविंशत्यादिवर्षजन्मपर्यायस्यापि जिनकल्पादिग्रहणं वक्तव्यं स्यात् । तच्च नोक्तम्, जघन्यतोऽपि एकोनत्रिंशद्वर्षपर्यायस्यैव तदनुज्ञानात् । ततश्च निश्चितमेतद् यदुत पटुप्रज्ञानामपि विंशतिवर्षदीक्षापर्याये सत्येव दृष्टिवादो दीयते, नारत इति ।

**अत्राह कश्चित्तार्किकः →** उत्सर्गमार्गस्तावदेष एव यदुत विंशतिवर्षपर्यायस्यैव दृष्टिवादो दीयते, नारतः, अष्टवार्षिकस्यैव दीक्षा दीयते, नारतः, एकोनत्रिंशद्वर्षजन्मपर्यायस्यैव जिनकल्पादि दीयते, नारतः इत्यादि । परन्तु यथा वज्रस्वामिनो षड्वर्षजन्मपर्यायस्यापि दीक्षादानं अपवादतः शास्त्रसिद्धं, तथा दृष्टिवाददाने जिनकल्पादिदाने च कथमपवादो न सम्भवेत् ? 'किञ्च मैथुनं विना सर्वत्राचारेऽपवाद उक्तः, ततश्च दृष्टिवाददाने जिनकल्पादिदाने च प्रसिद्धस्य वर्षसंख्यानियमस्यापि कश्चिदपवादोऽवश्यं मन्तव्य एव । **न च** सूत्रे तदपवादादर्शनात् न तं मन्यामहे इति **वाच्यम्** । **जावइया उस्सग्गा तावइया चेव अववाया, जावइया अववाया तावइया चेव**

**उस्सग्गा ।** इत्यादिनाऽऽचाराङ्गसूत्रे सामान्यतस्तदपवाददर्शनात् । विशेषतोऽपवादाक्षराणि तु अन्येष्वपि बहुषु आचारेषु न दृश्यन्त एवेति न तावन्मात्रेणात्रापवादाभावनिगदनं शोभनम् ।

किञ्च वज्रस्वामिनो वर्षषट्कजन्मपर्याये दीक्षाऽभवत्, ततश्च तस्य विंशतिवर्षदीक्षापर्यायस्य दृष्टिवादाध्ययने सति षड्विंशतिवर्षजन्मपर्याये जिनकल्पादिग्रहणयोग्यताऽभवत् । यद्यपि तेन दशपूर्वधरत्वान्न जिनकल्पादिकं गृहीतम्, तथापि तत्सदृशस्यान्यस्य कस्यचित् सप्तविंशतिवर्षजन्मपर्याये जिनकल्पादिग्रहणं सुवचमेवेति युक्त्याऽपि जिनकल्पे निगदितस्य वर्षसंख्यानियमस्यापवादो न दुर्घटः, एवं दृष्टिवाददानेऽपि यथासम्भवमुह्यमिति । ←

**अत्रास्माकमिदमाभाति** → तर्कानुसारेण तावत्तार्किकोक्तरीत्याऽपवादसम्भवो न दुर्घटः, विशेषतः शास्त्रे तदपवादाक्षरानुपलम्भस्तु तादृशापवादस्याश्चर्यवत्कथञ्चिदेव जायमानत्वात् "**अल्पस्य विवक्षा नास्ति**" इत्यादिन्यायेन सुबोध एव । न तावन्मात्रेणात्रापवादाभावकथनं युक्तिभृतं स्याद्वादपरिकर्मितप्रज्ञानामिति । तत्त्वमत्रत्यं बहुश्रुता विदन्ति इत्यलं विस्तरेणेति ।

## ( ३ ) श्रेयांसि बहुविघ्नानि भवन्ति - इत्यादि । ( ओ.नि. १-२ )

**चन्द्रः** सम्यक्त्वदेशविरतिसर्वविरत्यादिग्रहणशास्त्राध्ययनादिषु कल्याणकारिषु कार्येषु कुसंगविकथाशरीरमान्द्यस्वजनादिरागमोहनीयज्ञानावरणादिकर्मादीनि बहूनि विघ्नानि भवन्ति, इहलोकमात्रहितकारिषु तु अत एवाश्रेयोभूतेषु तीव्रारम्भादिषु विघ्नानि स्वयमेव दूरं नश्यन्तीति संक्षेपार्थः ।

**ननु** काऽत्र युक्तिः ? किं विघ्नानि सचेतनानि सन्ति, येन तानि "इदं कार्यं श्रेयः, तस्मादत्र अस्माभिः प्रभूतैः भवितव्यमिति विचिन्त्य तत्र बहूनि भवन्ति, "इदं च कार्यमश्रेयः, तस्मादत्र नास्माभिर्भवितव्यम्, दूरं गन्तव्यमस्मात्कार्यादिति विचिन्त्य तानि नश्यन्तीति **चेत्**

इयमत्र युक्तिः, धर्मः धर्मसाधकौ च अर्थकामौ साक्षात्परम्परया वा मोक्षानुकूलौ इति तादृशा धर्मार्थकामा श्रेयोभूतानि कार्याणि । तत्र तादृशौ अर्थकामौ धर्मसाधकत्वादुपचारतो धर्म एव ।

तथा धर्मस्य तद्द्वारा मोक्षस्य चासाधकौ अर्थकामौ विषयसुखमात्रहेतुत्वादश्रेयोभूतौ । जीवाश्च अनादिवासनावशीभूताः आहारभयमैथुनपरिग्रहसंज्ञाऽपहृतसुमतिकाः स्वभावत एव धर्मं प्रति अपटवः, अर्थकामौ प्रति च पटवः ।

तदुक्तं "**उपदेशं विनाऽप्यर्थकामौ प्रति पटुर्जनः, धर्मं च न विना शास्त्रात्तस्मात्तत्रादृतो भवेत्**" इति ।

यत्र च जीवस्यापटुता, तत्र अल्पसंख्याकानि अल्पशक्तिकानि चापि विघ्नानि बहुसंख्याकानि बहुशक्तिकानि चानुभूयन्ते । यत्र तु जीवस्य पटुता, तत्र बहुसंख्याकानि बहुशक्तिकानि चापि विघ्नानि अल्पसंख्याकानि अल्पशक्तिकानि चानुभूयन्ते । अत्र पटुतायां तत्तत्कार्यरुचिकार्यनैपुण्यादिकमन्तर्गतं बोध्यम् । दृश्यते च तथाविधायां पटुतायां सत्यां व्यापारकरणादौ महत्यपि श्रमचिन्तादिके विघ्नेऽपि निर्विघ्नता, तथाविधपटुताऽभावे च प्रतिक्रमणादौ अल्पेऽपि श्रमचिन्तादिके विघ्ने सविघ्नतेति न किञ्चिदनुपपन्नम् । एतदेव च शब्दान्तरेण योगविंशिकागुर्जरविवेचने निगदितं सूक्ष्मप्रज्ञशिरोमणिभिरभयशेखरसूरिभिः, तदनुसृत्यास्माभिरपि तदेवोक्तमिति ।

## ( ४ ) द्रव्यमङ्गलं दध्यादि तच्चानैकान्तिकमनात्यन्तिकं च, भावमङ्गलमर्हदादिनमस्कारः तच्चैकान्तिकमात्यन्तिकं च । ( ओ.नि. १-२ )

**चन्द्र. ननु** किमिदिमनैकान्तिकत्वमनात्यन्तिकत्वञ्चेति **चेत्**

यन्मङ्गलं कस्यचिन्मङ्गलं भवति, कस्यचिच्च न भवति, तदनैकान्तिकं, यथा पूर्णकलशः गृहप्रवेशे मङ्गलं, तदपि न एकान्तेन, चौरं कर्षकं च प्रति स एवामङ्गलं । एवं रिक्तकलशः चौरं कर्षकं च प्रति मङ्गलं, स एव च गृहप्रवेशे अमङ्गलमित्येवं पूर्णकलशादीनां सर्वान् प्रति अविशेषेण मङ्गलत्वाभावात् अनैकान्तिकत्वम् ।

तथा यन्मङ्गलं अन्येनामङ्गलेनोपहन्यते तदनात्यन्तिकं, यथा पूर्णकलशादिकं दृष्ट्वा बहिर्निर्गमनं कृतम्, किन्तु तत्र पादे कण्टको लग्नः, ततश्च पूर्णकलशादिकं मङ्गलं कण्टकविघ्नेनामङ्गलरुपेणोपहन्यते, न स्वफलं ददातीति यावत् । किन्तु तत्र कण्टकविघ्नरुपममङ्गलमेव स्वफलं ददातीति ।

एतद्विपरीतं भावमङ्गले बोध्यम् । तथाहि अर्हदादिनमस्कारः सर्वान्प्रत्यविशेषेण मङ्गलं । न तु कस्यचिन्मङ्गलं कस्यचिच्चामङ्गलमित्येवमनैकान्तिकः । तथा स नमस्कारः न अमङ्गलेनोपहन्यत इति युक्तं भावमङ्गलस्यैकान्तिकत्वमात्यन्तिकत्वञ्चेति ।

**शङ्कते** → विहारकरणे तावदयं विधिः प्रतिपादितः सामाचारीप्रकरणादौ यदुत उपाश्रयाद्बहिर्निर्गमनानन्तरं यदि मार्गे किञ्चिदपशकुनं भवेत्, तर्हि प्रत्यावृत्य एकं पञ्चमङ्गलमहाश्रुतस्कन्धं गुणयित्वा पुनः निर्गन्तव्यम् । तथाऽपि अपशकुने सति पुनः प्रत्यावृत्य द्वौ नवकारौ गुणयित्वा पुनः निर्गन्तव्यम् । तथाऽपि अपशकुने सति पुनः प्रत्यावृत्य लघुपर्यायस्य साधोः पुरस्करणं कृत्वा पुनः निर्गन्तव्यम् । तथाऽप्यपशकुने सति तु प्रत्यावृत्य गुरोः सर्वं निवेदयितव्यम्। पश्चाद् यद् गुरवो वदन्ति, तदेव प्रमाणमित्यादि ।

अत्र हि अपशकुनममङ्गलमेव, तेन च अर्हदादिनमस्काररुपं भावमङ्गलमुपहन्यत एव, अत एव च प्रत्यावर्तनं क्रियते, भावमङ्गलोपहननाभावे तु अपशकुने सत्यपि निर्गमनमेव कार्यं स्यात् न तु प्रत्यावर्तनादि, ततश्चैतत्कथं श्रद्धेयं ? यदुत भावमङ्गलं अमङ्गलेन नोपहन्यत ← इत्यादि ।

अत्र **समाधानन्त्विदं** → भावमङ्गलं द्रव्यामङ्गलेन नोपहन्यते, प्रबलेन भावामङ्गलेन तूपहन्यत एवेति न कश्चिद् दोष इति ।

**ननु** अपशकुनं द्रव्यामङ्गलमेव, न तु भावामङ्गलं, तेनैव च भावमङ्गलमत्रोपहन्यते, तत्कथमेतत् ? इति **चेत्** न, प्रकृतमपशकुनं न द्रव्यामङ्गलमपि तु मङ्गलमेवेति ।

**ननु** किमिदमश्रुतपूर्वं भवता श्राव्यते ? 'अपशकुनं मङ्गलं' इति तु मूर्खोऽपि न श्रद्दधाति, भवाँस्तु मतिमानपि किमिदमसञ्जसं प्रलपसीति **चेत्** मुग्धोऽसि, न जानासि शास्त्ररहस्यम् । सकर्णो भूत्वा श्रुणु तावत्कर्णामृतायमानं शास्त्ररहस्यम् ।

राजा राजभवनरक्षणाय सैनिकान्स्थापयति, ते च सैनिकाः राजभवने चौराद्यागमनं राजानं निवेदयन्ति, किं राजा तान् सैनिकान् अशोभनान् मन्यते ? यदुत "रात्रौ युष्माभिः चौराद्यागमननिवेदनाय मन्निद्राविघ्नं कृतं, अशोभना यूयमिति । किं वा तान् शोभनान् मन्यते ? यदुत "मन्निवेदनेन राजभवनं संरक्षितं भवद्भिः, धन्यवादोऽस्तु भवतामिति ।

सैनिका हि न चौरादीनि विघ्नानि उत्पादयन्ति, परन्तु उत्पद्यमानानि विघ्नानि ज्ञापयन्ति । अत एव ते शोभना एव । एवं अपशकुनं उदयमागच्छद् पापकर्मात्मकं विघ्नं ज्ञापयति, न तु स्वयं तदुत्पादयतीति अपशकुनं सैनिकवन्मङ्गलमेवेति स्पष्टमेवेति ।

यथा हि चौरादिविघ्नाभावे सैनिका न राजानं किमपि निवेदयन्ति, एवमेव

तथाविधपापकर्माभावे त्वपशकुनं न किमपि निवेदयति, ततश्च 'अपशकुनं अमङ्गलं, तेन च भावमङ्गलमुपहन्यत' इति वचनं निर्युक्तिकमेवेति ।

**ननु** यदि तत्र भावमङ्गलं नोपहतं, तर्हि प्रत्यावर्तनं किमर्थमिति **चेत्** प्रबलेन भावामङ्गलेनोपहतत्वादिति जानीहि ।

**ननु** किं तत्र भावामङ्गलमिति **चेत्** उदयमागच्छत्प्रबलं तथाविधं पापकर्मैवेति ।

**ननु** पापकर्म तु द्रव्यभूतत्वाद् द्रव्यामङ्गलं, न तु भावामङ्गलमिति **चेत्** सत्यम्, तथाऽपि भावामङ्गलजन्यत्वात् कार्ये कारणोपचारात्तस्य भावामङ्गलत्वमपि अविरुद्धमिति ।

**अयं भावः,** तत्पापकर्म जीवेन प्राक्काले येनाशुभाध्यवसायेन निबद्धं, स एवाशुभाध्यवसायो भावामङ्गलं, तच्च भावामङ्गलं प्रस्तुतभावमङ्गलात्प्रबलमिति भवति तेन प्रस्तुतभावमङ्गलोपघात इति ।

अपशकुनस्य मङ्गलत्वं तु **दुर्निमित्तोपनिपातस्तु तज्ज्ञापकोऽदृष्ट-वशादेवोपतिष्ठते पुण्यवत एवानिष्टज्ञानेनानिष्टप्रवृत्तिप्रतिरोधसम्भवादिति** सामाचारीप्रकरणपाठादेव सिद्धमिति ।

## (५) समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययो भवतीति । (ओ.नि. १-२)

**चन्द्र.** ये द्वे क्रिये पूर्वापरकालभाविन्यौ, ययोश्च क्रिययोः कर्ता एक एव, तयोः क्रिययोः मध्ये पूर्वकालीनक्रियायां क्त्वा प्रत्ययो भवति । तथाहि – 'चैत्रः गृहं गत्वा भुनक्ति' इत्यत्र गमनं भोजनं च इति द्वे क्रिये भवतः । तत्र गमनक्रिया पूर्वकालभाविनी, भोजनक्रियाऽपरकालभाविनी, द्वयोश्च कर्ता चैत्र एक एव, अतोऽत्र पूर्वकालभाविन्यां गमनक्रियायां क्त्वाप्रत्ययो भवतीति ।

अनेन त्वाप्रत्ययनियमेनैकान्तनित्यवादस्यैकान्तानित्यवादस्य च निरासः कृतो भवति । तथाहि येषां मते आत्मा एकान्तेन नित्यः, तेषां मते आत्मा सदैव एकस्वरुप एव भवति, न तु पूर्वकालेऽन्यादृशोऽपरकाले चान्यादृशः, ततश्च यदि चैत्रात्मा पूर्वकाले गमनक्रियापरिणतः, ततः स अपरकालेऽपि गमनक्रियापरिणत एव भवति, न तु व्यपगतगमनक्रियापरिणामः अङ्गीकृतभोजनक्रियापरिणामश्च, एकान्तनित्यत्वविरोधात् । तस्मात् तेषां मते आत्मनि पूर्वापरकालभाविभिन्नक्रियाकर्तृत्वमसङ्गतमिति क्त्वाप्रत्ययोऽपि दुर्घट एवेति ।

येषां मते आत्मा एकान्तेनानित्यः, तेषां मते गमनक्रियाकालीन आत्मा अनन्तरक्षणे विनष्ट एवेति अनन्तरक्षणे अन्य एव कश्चिदात्मा, ततश्च भोजनक्रियाकर्ता आत्मा गमनक्रियाकर्तृसकाशाद्भिन्न एवेति द्वयोः क्रिययोः कर्ता एको न भवतीति अत्रापि क्त्वाप्रत्ययो दुर्घटः ।

तस्मात् कथंचिन्नित्यानित्य एवात्मनि क्त्वाप्रत्ययो घटत इति शोभनोऽयं निष्कण्टकः स्याद्वादमार्ग इति ।

## ( ६ ) अर्हत्प्रोक्तं गणधरदृब्धं प्रत्येकबुद्धदृब्धं च । स्थविरग्रथितं च तथा प्रमाणभूतं त्रिधा सूत्रं ॥ ( ओ.नि. १-२ )

**चन्द्र.** गणधरग्रथितं प्रत्येकबुद्धग्रथितं चतुर्दशपूर्वधरदशपूर्वधरग्रथितं चेत्येवं त्रिविधं सूत्रं प्रमाणं भवति । एतच्च त्रिविधमपि सूत्रं अर्थतो अर्हत्प्रोक्तमेव भवति, न कदाचिदपि तद्विसदृशमिति अर्हत्प्रोक्तमिति विशेषणं न व्यवच्छेदकमपि तु स्वरुपावबोधकं । न हि गणधरादिग्रथितं त्रिधा सूत्रं अर्हत्प्रोक्तं अनर्हत्प्रोक्तञ्चेति द्विविधं भवति, येन अनर्हत्प्रोक्तव्यवच्छेदकमिदं विशेषणं स्यात् ।

अथवा हेतुगर्भितमिदं विशेषणम् । तथाहि

गणधरादिदृब्धं सूत्रं प्रमाणभूतं अर्थतोऽर्हत्प्रोक्तत्वात् इत्येवमनुमानमत्रोह्यम् ।

**ननु** तर्हि हरिभद्रसूरिप्रभृतिभिर्दृब्धानि प्रकरणानि प्रमाणभूतानि न वा ? इति **चेत्** यदि हि तानि प्रतिपादितत्रिविधसूत्रानुसारीणि, तर्हि तेषामप्यर्थतोऽर्हत्प्रोक्त-त्वात्प्रमाणभूतत्वमक्षतमेव, अन्यथा तु नेति ।

**ननु** तानि प्रकरणानि प्रतिपादितत्रिविधसूत्रानुसारीणि न वेति कथं ज्ञायते ? इति **चेत्** बहुगीतार्थसंविग्नपरिगृहीतत्वहेतुनेति । निर्युक्तिभाष्यचूर्णिवृत्तयश्च सूत्रस्यार्थभूता बोद्धव्याः, कुत्रचित्ता अपि सूत्रत्वेन व्यवह्रीयन्ते, तदपि उपचाराददुष्टमेव ।

## (७) चतुर्दशपूर्विणो दशपूर्विणश्च नियमेनैव सम्यग्दृष्टय: । (ओ.नि. १-२)

**चन्द्र. ननु** किञ्चिदुनदशपूर्वज्ञानेऽपि मिथ्यात्वसम्भव:, सम्पूर्णदशपूर्वज्ञाने तु नियमात्सम्यग्दर्शनमेवेति अत्र का युक्तिरिति **चेत्** अचिन्त्योऽयं कोऽपि श्रुतमहिमा इति कल्प्यते । युक्त्यन्तराणां त्वज्ञातत्वात् न कथयितुं शक्यतेऽस्माभिरिति ।

अत्र सम्यग्दर्शनं शुद्धनिश्चयनयाभिमतं षष्ठगुणस्थानसम्भवि ग्राह्यम्, न तु चतुर्थगुणस्थान-सम्भवि अशुद्धनिश्चयनयाभिमतं, सम्पूर्णदशपूर्वधराणां नियमाच्चारित्रित्वादिति बोध्यम् ।

## (८) नावश्यमाचार्योपाध्यायैर्भिन्नैर्भवितव्यम्, अपि तु क्वचिदसावेव सूत्रं शिष्येभ्य: प्रयच्छत्यसावेव चार्थम् । (ओ.नि. १-२)

**चन्द्र.** अत्रेयमुत्सर्गतो गच्छव्यवस्था । यत्र गच्छे आचार्य उपाध्याय: प्रवर्तक: स्थविरो गणावच्छेदकश्चेति पञ्च गुणाकरा न भवन्ति, तत्र संयमार्थिनां वासो न कल्पते ।

तत्र ये सूत्रार्थतदुभयेषु उपयुक्ता:, ज्ञानदर्शनचारित्रवन्त:, गच्छचिन्ताविप्रमुक्ता: शुभलक्षणोपेताश्च, ते आचार्या भवन्ति । **नचा**चार्याणां गणराजत्वात् कथं गणचिन्ताविप्रमुक्तत्वमिति **शङ्कनीयम्** । गणावच्छेदकप्रभृतीनां गणचिन्ताया: समर्पितत्वात्, मन्त्र्यादिषु निक्षिप्तराज्यभारराजवत् ।

ते चाचार्या अर्थमेव भाषन्ते, न सूत्रं ।

**ननु** किमर्थं आचार्या: सूत्रं न ददतीति **चेत्** तत्रेमानि कारणानि

(१) अर्थचिन्तनात्मके ध्याने एकाग्रतार्थं ते सूत्रं न ददति, यत: सूत्रस्यापि दाने बहुसमयशरीरसामर्थ्यव्ययात् सा न स्यात्

(२) एकाग्रतायां च सत्यां सूक्ष्मार्थपरिस्फुरणादर्थस्य वृद्धि: स्यात् ।

(३) अर्थमात्रदाने तीर्थकरानुसरणं स्यात्, यतस्ते तीर्थकराः केवलमर्थं भाषन्ते, गणतप्तिं च न कुर्वन्ति, एवमाचार्या अपि तथैव कुर्वाणाः तीर्थकरानुकारिणो भवन्ति ।

(४) यस्यां सूत्रवाचनायां अधस्तनपदवर्तिनोऽपि उपाध्यायादयोऽधिकारिणः, तस्या आचार्येण दाने क्रियमाणे तु आचार्यस्य लाघवं स्यात्, इत्थं च अधस्तनपदवर्त्यधिकृतकार्याकरणे तेषां लोके राज्ञ इव महती गुरुता स्यात्, तथा च प्रवचनप्रभावना ।

(५) जिनाज्ञायां स्थैर्यं कृतं भवति, यतो हीयं तीर्थकृतामाज्ञा यदुत "आचार्येण अनन्तरोक्तप्रकारेण मदनुकारिणा भवितव्यम्" इति । तत एतत्कारणकलापादाचार्याः सूत्रं न ददति ।

किञ्च तैरपि मुनिपदाद्यवस्थायामनेके साधवः सूत्रमध्यापिता एवेति तैः ऋणमोक्षः कृत एवेत्यधुना सूत्रादानेऽपि न काचित्क्षतिस्तेषामिति ।

ये सूत्रार्थतदुभयविदः रत्नत्रय्यां उपयुक्ताः शिष्यनिष्पादकाश्च, ते तादृशा उपाध्याया भवन्ति । ते हि सूत्रं ददति ।

**ननु** तेषां सूत्रदाने को लाभ इति **चेत्** उपाध्यायाः शिष्येभ्यः सूत्रवाचनां प्रच्छन्तः स्वयमर्थमपि परिभावयन्ति, ततश्च सूत्रेऽर्थे च तेषां स्थिरत्वमुपजायते । तथाऽन्यस्य सूत्रवाचनादाने सूत्रप्राप्तिलक्षणस्य ऋणस्य मोक्षः कृतो भवति । तथा आचार्यपदप्राप्तौ न किमपि विघ्नं भवति, सूत्रार्थोभयानामात्मसाद्भूतत्वात् (आयत्यां आचार्यपदप्राप्तौ सत्यां *सूत्रादानेऽपि सूत्रपाठे न किमपि विघ्नं स्यात् स्वनामवत्तस्यात्मसाद्भूतत्वादित्याशयः)* । तथा दृढाभ्यासात् सूत्रस्य पुनरावर्तनं आयत्यां सुकरं स्यादिति । तथा अन्यगच्छीयाः साधवः सूत्रग्रहणार्थं गच्छान्तरादत्रागत्योपाध्यायं निश्रयन्ति, ततश्च तेषां सूत्रदानेनोपाध्याया अनुग्राहका भवन्ति । तथा सूत्रवाचनादानमग्नस्योपाध्यायस्य प्रायश्चित्तापादकस्य तथाविधकषायोदयस्याभावात् मोहजयः कृतो भवति । इत्थं च प्रभूतलाभसम्भवात् सूत्रं वाचयेदुपाध्यायः ।

ये तपोनियमविनयगुणनिधयः, साधूनां ज्ञानदर्शनचारित्रेषु प्रवर्तकाः, शिष्याणां संग्रहे संगृहीतानां चोपकारकरणे कुशलाः, ते एतादृशाः प्रवर्तका भवन्ति । तेषां च कार्यमिदं यदुत गच्छे यः साधुः यस्मिन् संयमे तपसि अन्यस्मिन्वा योगे योग्यो भवति, तं तत्र ते प्रवर्तयन्ति यश्च यस्मिन्नसमर्थः, तं तस्मात्ते निवर्तयन्ति ।

ये संविग्नाः मार्दविकाः प्रियधर्माः रत्नत्रय्यां परिहानिं कुर्वन्तं तं तं साधुं स्मारयन्तो भवन्ति, ते तादृशाः स्थविरा भवन्ति । ते हि प्रवर्तकव्यापारितेषु ज्ञानसंयमवैयावृत्यादिष्वर्थेषु मध्ये यः साधुः समर्थोऽपि यत्र सीदति, तं तत्र प्रणोदनात् स्थिरीकुर्वन्तीति ।

ये गच्छकार्यकरणाभ्युपगमं, शीघ्रं तस्य कार्यस्य निष्पादनं, क्षेत्रप्रत्युपेक्षणां उपध्युत्पादनं च अविषादं कुर्वन्ति, सूत्रार्थतदुभयविदश्च भवन्ति, ते एतादृशा गणावच्छेदका भवन्ति ।

एते च पञ्चापि गीतार्थाः संविग्नाः गच्छाधारभूताश्च भवन्ति ।

परन्त्वयमुत्सगमार्गः । यदा तु गच्छे कारणवशादुपाध्याया न भवन्ति, तदा आचार्य एव सूत्रमर्थं च ददाति । यदि वा आचार्याभावे उपाध्याय एव सूत्रमर्थं च ददाति ।

आचार्यादिपञ्चकस्वरूपं च व्यवहारसूत्रप्रथमोद्देशकत्रयस्त्रिंशत्तमसूत्रगतनिर्युक्ति-प्रभृतिकमनुसृत्य अस्माभिः कृतमिति बोध्यम् ।

यद्यपि यत्र नगरे नृपस्य मन्त्रिणः सेनानायकस्य पुरोहितस्य वाऽन्यतरस्याऽप्यभावः, तत्र लोकानां वस्तुं न योग्यम्, तत्तदापत्तिवशतः प्रभूतहानिसम्भवात् । एवं यत्र गच्छे प्रकृतानां पञ्चानां मध्येऽन्यतरस्याप्यभावः, तत्र सुविहितानां मोक्षार्थिनां वस्तुं न युक्तम्, इहलोकपरलोकापायसम्भवात् । तथाऽपि कालादिवैषम्यात् अपवादतस्तत्रापि वस्तव्यमेव, परं तत्र पञ्चानां मध्यादन्यतमस्यापि संविग्नगीतार्थस्य विद्यमानता यदि भवेत्, तर्हि अतीव शोभनमिति न विस्मर्तव्यम् । सर्वथा संविग्नगीतार्थविरहिते गच्छे तु मोक्षमार्गाराधनं प्रायोऽसम्भव्येव, प्रत्युत तद्विराधनासम्भवादनन्तसंसारोऽपि नासुलभः ।

तदुक्तमुपदेशमालायां

**जं जयई अगीत्थो, जं च अगीयत्थनिस्सिओ जयइ ।**

**वट्टावेइ य गच्छं अणंतसंसारिओ होइ** । इति ।

साम्प्रतकाले संविग्नगीतार्थाज्ञया येषामगीतार्थानां स्वतन्त्रविहारो दृश्यते, तेषां तत्स्पर्धकपतेश्च न उक्तश्लोकगतदोषा मन्तव्याः ।

## ( ९ ) नवि किंचि वि पडिसिद्धं नाणुन्नायं च जिणवरिंदेहिं ।
## मुत्तुं मेहुणभावं न विणा तं रागदोसेहिं । ( ओ.नि.भा.२ )

**चन्द्र.** उत्सर्गमार्गप्रतिपादनपरायणेषु हि ग्रन्थेषु उत्सर्गतो हिंसामृषाचौर्यादिकं प्रतिषिद्धं, तपोवैयावृत्यस्वाध्यायादिकं चानुज्ञातम् । किन्तु अपवादप्रतिपादकेषु तु ग्रन्थेषु उत्सर्गतः

प्रतिषिद्धमपि सर्वं अपवादतोऽनुज्ञातम् । उत्सर्गतोऽनुज्ञातमपि सर्वं अपवादतः प्रतिषिद्धं । ततश्च जिनवरेन्द्रैः किञ्चिदपि अनुष्ठानं एकान्ततो न प्रतिषिद्धं, किञ्चिदपि च अनुष्ठानं एकान्ततो नानुज्ञातमिति सिद्धं । परन्तु प्रतिषिद्धेषु मध्ये मैथुनं तु एकान्तत एव प्रतिषिद्धं । यतस्तद् रागद्वेषाभ्यां विना न भवतीति ।

तदयमत्र परमार्थः जिनशासने अप्रशस्तौ रागद्वेषौ एकान्ततः प्रतिषिद्धौ, न काऽपि बाह्यक्रिया एकान्ततः प्रतिषिद्धाऽनुज्ञाता वा । अत एव यस्यां बाह्यक्रियायां अप्रशस्तौ रागद्वेषौ न भवतः, साऽशुभाऽपि न प्रतिषिद्धा, यस्यां च बाह्यक्रियायां अप्रशस्तौ रागद्वेषौ भवतः, सा शुभाऽपि नानुज्ञातेति । ततश्च निश्चयनयतो बाह्यक्रियारूपं मैथुनमपि साक्षान्न प्रतिषिद्धं, परन्तु यतस्तत्र अप्रशस्तरागोऽवश्यंभावी, स च सर्वथा प्रतिषिद्धः, ततः सर्वथाप्रतिषिद्धरागाविनाभावित्वादेव मैथुनं सर्वथा प्रतिषिद्धं भवति । अत एव चाप्रशस्तरागद्वेषविनाभाविनी स्वरूपतो दुष्टाऽपि प्रणीतरसादिभक्षणादिका बाह्यक्रिया कारणापाते द्वितीयपदेनाऽऽचर्यतेऽपि ।

अत्र सर्वथा प्रतिषिद्धत्वं रागस्य द्वेषस्य चाप्रशस्तस्य बोध्यम्, न तु प्रशस्तस्यापि, तस्य कथंचिदनुमतत्वात् ।

नन्वेवं मैथुनं विना सर्वत्रापवादोऽस्तीति सिद्धं । तच्च न युक्तं महानिशीथग्रन्थविरोधात् । तथाहि → **गोयमा ! उस्सग्गाववाएहिं चेव पवयणं ठियं, अणेगंतं च पन्नविज्जइ, णो णं एगंतं । णवरं आउक्कायपरिभोगं तेउकायसमारंभं मेहुणासेवणं च, एते तओ ठाणंतरे एगंतेणं णिच्छयओ उ बाढं उ सव्वहा सव्वपयारेहिं णं आयहियट्ठीणं निसिद्धमिति ।** ← इति महानिशीथसूत्रे सावद्याचार्याधिकारे भगवन्महावीरवदनकमलनिर्गतं वचनम् । तदर्थश्चायं → **हे गौतम ! जिनप्रवचनं** उत्सर्गापवादाभ्यामेव स्थितम्, अनेकान्तश्चात्र प्रज्ञाप्यते, नैकान्तः, नवरं अप्कायपरिभोगः तेजःकायसमारम्भो मैथुनासेवनं चेति त्रीणि स्थानान्तराणि एकान्तेन निश्चयतो बाढं सर्वथा सर्वप्रकारैः आत्महितार्थिनां निषिद्धानीति ← ।

अत्र हि न केवलं मैथुनसेवने, अपि तु अप्कायपरिभोगे तेजःकायसमारम्भेऽपि च अपवादः प्रतिषिद्धः, ततश्च मैथुनं विना सर्वत्रापवादोऽस्तीति यत्प्रसिद्धं, तन्महानिशीथवचनविरोधि इति **चेत्**

**सत्यं**, अत्र समाधानं गवेषणीयम्, येन विरोधपरिहारः स्यात् । **न च** किं

समाधानगवेषणक्लेशेन ? महानिशीथस्यैव प्रामाण्यमङ्गीकृत्यैतत्त्रितयस्यानपवादत्वं स्वीकरणीयमिति **वाच्यम्** । एकवचनमङ्गीकृत्य वचनान्तरपरित्यागस्य लौकिकनीतित्वात्, सकलवचनसाङ्गत्यापादनस्यैव लोकोत्तरनीतित्वात् च । तदुक्तं महोपाध्यायैः गुर्जरभाषानिबद्धे स्तवने "એકવચન ઝાલીને છાંડે, બીજા એ લૌકિકનીતિ, સકલવચન નિજઠામે જોડે એ લોકોત્તરનીતિ."

समाधानं त्विदमाभाति अस्माकं → गार्हस्थ्ये मैथुनसेवनाप्कायपरिभोगतेजः-कायसमारम्भास्तावदवश्यंभाविनः, तान् विना प्रायो गार्हस्थ्यासम्भवात् । ततश्च गार्हस्थ्येन सहात्यन्तं सम्बद्धत्वादेतत्त्रितयस्य श्रामण्येऽत्यन्तनिषेधज्ञापनार्थमेवा-नपवादत्वमुक्तम् । एतत्त्रयान्यतरस्यापि सेवने गार्हस्थ्यसदृशत्वमनपायमित्यभिप्रेत्य तदत्यन्तनिषेधायानपवादत्वमुक्तमित्याशयः । अन्यथा हि तथाकारणापाते नद्युत्तरणादिकमविशोधिकोटिकदोषदुष्टाहारादिकञ्च यदपवादतो ग्रन्थान्तरेऽनुज्ञातम्, तद् विरुध्येत ।

न केवलमेतत्स्वमनीषिकाप्रकल्पितम्, गच्छाचारवृत्तौ अपि एतन्महानिशीथपाठप्रदर्शनपूर्वकं तथैव प्रत्युत्तरदानात् । तथा च तत्पाठः → **यच्चायमर्थोऽत्र ग्रन्थेन दर्शितः, तत् एतस्य सूत्रस्य श्रीमहानिशीथादिभ्य उद्धृतत्वादिना महानिशीथवत् प्राय उत्सर्गोत्सर्गादिविधेः प्रदर्शकत्वादिति वृद्धाः ।** ← अत्र हि मैथुनमाश्रित्योक्तम्, एतदेव च अप्कायादिष्वपि सुतरां सम्भवत्येवेति ।

तस्मान्मैथुनं विना सर्वत्राचारेऽपवादः सम्भवतीति दृढं निश्चेयम् ।

## (१०) वैयावृत्यविनययोर्यथा स्वपरोपकारकत्वात्प्राधान्यं, नैवमनशनादीनां तपोभेदानामिति । (ओ.नि.भा.२)

**चन्द्र.** वैयावृत्त्यं हि मानकषायहान्यापादनात् परिश्रमसाध्यविकारविजयसम्पादनात् स्वाध्यायादिशक्तिपाचकशक्त्याधानात् अन्यस्मादपि च तत्तदनुभवसिद्धकारणात्स्वोपकारकं तावद् भवत्येव । तथा ग्लानानां ग्लान्यापाकरणेनार्तध्यानादिनिवारणात्, बालवृद्धानां समाधिसम्पादनात्, प्राघूर्णकानां श्रमव्ययेन प्रसन्नताधानात् "अहो परमकारुणिकाः

निर्व्याजबन्धवः अशरणशरणीभूता एते वैयावृत्त्यकारिणः, सर्वथा खलु धन्यातिधन्यं जिनशासनं, यत्रैते महात्मानो विद्यन्ते'' इति लोकमध्ये बोधिबीजवपनेनानेकेषां प्रेत्य जिनधर्मप्रापणात्परोपकारकमपि भवतीति ।

विनयश्च परमपदाकर्षकनिर्मलबोधैककारणप्रवचनग्रहणपात्रतासम्पादनात्, मानकषायापकर्षाधानात् जिनशासनमूलत्वेन स्वकर्तॄणां जिनशासनप्रवेशकत्वात्, अन्यस्मादपि च तत्तदनुभवसिद्ध-कारणात्स्वोपकारकं भवत्येव । तथा रत्नाधिकानां सन्तोषकत्वात्, विनयदर्शकानां विनयकरणप्रोत्साहकत्वात्, अविनयिनां स्वदोषदर्शनसम्पादकत्वात्, जिनशासनप्रभावनानिमित्तत्वाच्च परोपकारकश्च भवतीति ।

यद्यप्यन्यानि अपि तपांसि स्वपरोपकारकाणि कथंचिद् भवन्ति, तथाऽपि यथाऽनयोः स्व-परोपकारकत्वं, न तथाऽन्येषामिति तयोः प्राधान्यं निर्बाधमेवेति ।

**नन्वेवं** विनयवैयावृत्त्ययोः प्राधान्येऽङ्गीक्रियमाणे **''नवि अत्थि नवि य होइ सज्झायसमं तवोकम्मं''** इति स्वाध्यायतपसः सर्वत उत्कृष्टताप्रतिपादकस्या-गमवचनस्य का गतिरिति **चेत्**

स्वमात्रोपकारकत्वे स्वाध्यायस्योत्कृष्टत्वं, स्वपरोभयोपकारकत्वे तु विनयवैया-वृत्त्ययोरुत्कृष्टत्वमित्येषा गतिरिति गृहाण ।

अयं भावः स्वाध्यायस्य स्वोपकारकत्वं सहस्रमूल्यं, विनयवैयावृत्त्ययोः स्वोपकारकत्वं नवशतमूल्यं, ततश्च स्वमात्रोपकारकत्वचिन्तायां स्वाध्यायस्यैव प्राधान्यं । परन्तु स्वाध्यायस्य परोपकारकत्वं नवशतमूल्यं विनयवैयावृत्त्ययोस्तु परोपकारकत्वं सहस्रद्वयमूल्यं । ततश्च स्वपरोभयोपकारकत्वचिन्तायां तु स्वाध्यायस्य एकोनविंशति-शतमूल्यत्वादनुत्कृष्टत्वं, विनयवैयावृत्त्ययोश्च एकोनत्रिंशच्छतमूल्यत्वा-दुत्कृष्टत्वमिति । एतच्च स्थूलव्यवहारमाश्रित्य दृष्टान्तमात्रतो निरुपितम् । अन्यथा तु प्रतिव्यक्ति विशेषोऽपि सम्भवत्येवेति ।

अथ वा यथा ग्रामान्तरं गन्तुकामस्य तुरग एव प्रधानः, न तु प्रासादः, किन्तु विश्रामं कर्तुकामस्य प्रासाद एव, न तु तुरगः, फललाभस्तु यथायोगमुभयत्रापि । एवं ग्लानत्वादिदशायां वैयावृत्त्यादिकं प्रधानं, अन्यदा तु स्वाध्यायः, फललाभस्तु यथायोगमुभयत्रापीति ।

**( ११ ) इह द्विरूपः क्रोधः उदयगत उदीरणावलिकागतश्च, तत्रोदयगतनिग्रहः क्रोधनिग्रहः, एवं मानादिष्वपि वाच्यं, यस्तु उदीरणावलिकाप्राप्तस्तस्योदय एव न कर्त्तव्य क्षान्त्यादिभिर्हेतुभिरिति । ( ओ.नि.भा.२ )**

**चन्द्र. ननु** यः क्रोध उदयगतः, तस्य निग्रहः कर्तुं कथं शक्यते इति **चेत्**

उदयगतः क्रोधो नाम मनसि क्रोधः समुत्पन्नः, स च वचनकाययोः संक्रामन् निवारणीय इत्येष उदयगतक्रोधस्य निग्रहः । यस्तु क्रोधः उदीरणावलिकायां प्रविष्टः, स उदयाभिमुखोऽपि सन् नोदयमागतः, अतः क्षमादिहेतुभिः यथा तस्य विपाकोदय एव न भवेत् तथा कर्तुं शक्यते इति । एतच्च कर्मप्रकृतिप्रभृतिग्रन्थविदां सुप्रतीतमिति संक्षेपः ।

**( १२ ) मूलगुणसद्भावे करणत्वमस्य, नान्यथेति । ( ओ.नि.भा.३ )**

**चन्द्र.** शर्कराऽभावे मिष्टान्नत्वस्य, प्रजाऽभावे राजत्वस्य, अक्षराऽभावे पुस्तकत्वस्य चोक्तिरिव मूलगुणाभावे करणत्वस्योक्तिर्न तात्त्विकी, स्वकार्याकरणात् अतिस्थूलव्यवहारमात्रस्यापारमार्थिकत्वात् ।

**ननु** किं नाम मूलगुणत्वं किं च करणत्वं उत्तरगुणत्वात्मकमिति स्पष्टीक्रियताम् इति **चेत्** पञ्चमहाव्रतादयो मूलगुणाः पिंडविशोध्यादयश्चोत्तरगुणा इति स्पष्टमेव, किं तत्र स्पष्टीकर्त्तव्यम् ?

**ननु** 'के मूलगुणाः' इति न वयं पृच्छामः, किन्तु मूलगुणस्य लक्षणं किं ? उत्तरगुणस्य च लक्षणं किं ? इति जिज्ञासामहे इति **चेत्**

किमत्र जिज्ञासायां कारणमित्येव तावत्पृच्छामः ।

**ननु** इदं कारणम् । पिण्डविशोधिराधाकर्मिकादित्यागरूपा प्रथमे महाव्रतेऽहिंसारूपेऽन्तर्भवतीति तत्र मूलगुणत्वमेव सङ्घटते, नोत्तरगुणत्वम् । एवं समितिप्रभृतिष्वपि वाच्यम् । ततश्च मूलोत्तरगुणयोर्न तात्त्विकं भेदं पश्यामो विना नामभेदात् । ततश्च

भवतीयं जिज्ञासा 'किं लक्षणं मूलोत्तरगुणयोः ?, येन तयोर्विवेकः कर्तुं शक्यते इति **चेत्**

**सत्यं**, अत्र बहवोऽभिप्रायाः श्रूयन्ते । तथाहि साक्षात् हिंसाद्यकरणं मूलगुणः, साक्षात्तत्करणं मूलगुणभङ्गः, हिंसाया अकारापणमननुमोदनं च उत्तरगुणः, हिंसायाः कारापणमनुमोदनञ्चोत्तरगुणभङ्गः । एवं तावदेकोऽभिप्रायः ।

येन दोषसेवनेन मूलप्रायश्चित्तं भवति, स मूलगुणभङ्गः, येन च छेदपर्यन्तमेव प्रायश्चित्तं भवति स उत्तरगुणभङ्गः । ततश्चानेकश आधाकर्मादिभक्षणेऽपि मूलप्रायश्चित्तप्रतिपादनात् यत्सङ्ख्याके आधाकर्मिकभक्षणे मूलप्रायश्चित्तं, तत्संख्याकं आधाकर्मिकभक्षणमपि मूलगुणभङ्ग एव । सकृत्कीटिकादिवधे च मूलप्रायश्चित्ता-प्रतिपादनात् साक्षात्कीटिकादिवधोऽपि उत्तरगुणभङ्ग एव । यदा तु तत्राऽपि मूलप्रायश्चित्तं भवेत्, तदा सोऽपि दोषः मूलगुणभङ्ग एवेत्येवं भङ्गानुसारेण भङ्गविषयाणां मूलोत्तरगुणत्वं समवसेयमिति । एष द्वितीयोऽभिप्रायः ।

'एनं जीवं मारयामि' इति जीवघातबुद्ध्या हिंसाकरणकारापणादि मूलगुणभङ्गः, जीवघाताध्यवसायाभावेऽपि आहारसंज्ञादिपरवशतया हिंसाकरणकारापणादि उत्तरगुणभङ्गः । अत एवाधाकर्मणि जीवघातसद्भावेऽपि आहारसंज्ञापरवशकृतत्वा-देवोत्तरगुणत्वं, न तु मूलगुणत्वमिति । एष तृतीयोऽभिप्रायः ।

**ननु** किमत्र तत्त्वं, कोऽभिप्रायः सम्यगिति न विवेकः कर्तुं पार्यते इति **चेत्** प्रथमोऽभिप्रायस्तावन्मिथ्येति अस्मदभिप्रायः । तथाहि हिंसादिकरणकारापणानुमोदनानि त्रीण्यपि मूलगुणभङ्गत्वेन व्यवहारादौ स्पष्टमेव प्रतिपादितानीति हिंसादिकरणमेव मूलगुणभङ्गः, न कारापणानुमोदने इति प्रथमोऽभिप्रायो शास्त्रबाधितत्वादुपेक्षणीयः ।

तृतीयोऽप्यभिप्रायो निर्युक्तिकः, यतो हि आहारसंज्ञापरवशकृतत्वादाधाकर्मण उत्तरगुणभङ्गत्वे तु मैथुनसंज्ञापरवशकृतत्वान्मैथुनस्यापि उत्तरगुणत्वमापद्येत, **न च** मैथुनसंज्ञापरवशकृतस्य मैथुनस्य हिंसात्मकमूलगुणभङ्गत्वाभावेऽपि अब्रह्मात्मकमूलगुणभङ्गत्वानपायादेव मूलगुणभङ्गत्वमिति **वाच्यम्** एवं सति आहारसंज्ञापरवशकृतस्याधाकर्मणो३ऽपि हिंसात्मकमूलगुणभङ्गत्वाभावेऽपि मूर्च्छारूपपरिग्रहात्मकमूलगुणभङ्गत्वानपायादेव मूलगुणभङ्गत्वमित्यस्यापि सुवचत्वात् ।

ततश्च द्वितीयोऽभिप्रायः कथञ्चित्संघटत इति ।

तथा च तत्पाठः **मूलगुणासेवनेऽपि पुलाकादीनामेवं चरणं सूत्राज्ञां परिगृह्य स्वभावसिद्धं ज्ञेयं, तादृग्दशायामपि तेषां चारित्रपातप्रतिबन्धकसंयमस्थानसत्त्वात् । क्वचिदेवं अन्यथाभावदर्शनेऽपि मूलगुणभङ्गे चारित्रभङ्गनियमस्य सार्वत्रिकस्याविरोधात्**

**पराभियोगादिना वा मूलगुणभङ्गेऽपि तेषां चारित्राक्षतिः..... इति । ( गु.त.वि. )**

— अत्र गुरुतत्त्वविनिश्चयपाठे मूलगुणभङ्गेऽपि चारित्राभङ्गः पुलाकादौ यद्यपि प्रतिपादितः, तथाऽपि 'स कुत्रचिदेव भवति, नियमस्तु अयमेव यदुत मूलगुणभङ्गे चारित्रभङ्गो भवत्येव' इत्यपि तत्रैव प्रतिपादितम् । ततश्च 'यद्दोषासेवने मूलप्रायश्चित्तं, तद्दोषासेवनं मूलगुणभङ्ग' इति द्वितीयोऽभिप्रायः सम्यगाभाति इति दिक् । तत्त्वं पुनर्बहुश्रुता विदन्ति ।

## ( १३ ) आक्षेपण्यादिधर्मकथाऽऽक्षिप्ताः सन्तो भव्यप्राणिन-श्चारित्रमवाप्नुवन्ति । ( ओ.नि. भा.७ )

**चन्द्र.** आक्षेपणी, विक्षेपणी, संवेजनी, निर्वेदनी चेत्येवं चतुर्विधाः कथाः धर्मप्रापकत्वाद् धर्मकथाः, ताभिश्च कथाभिः श्रोतारो वक्तारं प्रति आकृष्यन्ते, ततश्च तद्बहुमानभावप्लावितमनसः क्रमशः धर्मकथानुसारेण चारित्रमार्गे रतिमन्तो भूत्वा चारित्रम् स्वीकुर्वन्तीत्यवश्यं संविग्नगीतार्थेन आक्षेपण्यादिधर्मकथायां यथाभव्यं यत्नः कर्त्तव्यः । कथाचतुष्कस्वरुपं तु दशवैकालिक-तृतीयाध्ययननिर्युक्तिवृत्तिप्रभृतेः सम्यगवसेयम् ।

भव्यप्राणिनोऽप्यत्र चरमावर्तवर्तिन अपुनर्बन्धकादिभावभाजो ग्राह्याः, इतरेषां भव्यत्वेऽपि मोक्षमार्गानुसरणानुकूलस्वभावाभावात् शुभभावेन चारित्रप्राप्त्यभावादिति ।

## ( १४ ) शोभनतिथिनक्षत्रमुहूर्तयोगादौ प्रव्रज्याप्रदानं कर्त्तव्यम् । ( ओ.नि. भा.७ )

**चन्द्र. ननु** मोक्षमार्गाराधनार्थं शोभनतिथिनक्षत्रादीनि किमर्थं समादरणीयानि ? तैर्विनाऽपि मोक्षमार्गाराधनसम्भवात्, '**सर्वासु मुनयो देशकालावस्थासु केवलं प्राप्ताः, तन्नियमो नासां**' इति अध्यात्मसारवचनप्रामाण्यात् अशोभनास्वपि देशावस्थासु

अशोभनास्वपि च कालावस्थासु केवलज्ञानप्राप्तौ चारित्रपरिणामप्राप्तेः सुलभतरत्वात् ।

अयं भावः, यदि हि सर्वास्वपि कालावस्थासु मुनयः केवलं प्राप्ताः, तर्हि अशोभनतिथ्यादिष्वपि केवलं प्राप्ता इति निश्चितमेव । ततश्च यदि ह्यशोभनतिथ्यादिष्वपि केवलमपि प्राप्यते, तर्हि चारित्रप्रदानार्थं शोभनतिथ्याद्याग्रहो निरर्थक इति **चेत्** निश्चयनयमतविषयमेतदध्यात्मसारवचनं न व्यवहारमतविषयकवचनं निराकर्तुमलं, स्वविषये उभययोः प्रामाण्यस्याक्षतत्वात् ।

अयमाशयः यद्यपि अशोभनतिथ्यादिष्वपि केवलप्राप्तिर्भवेदेव, तथाऽपि सा कदाचित्कस्यचिदेव । तत्सकाशाच्छोभनतिथ्यादिषु केवलप्राप्तिमन्तोऽतिप्रभूता इति प्रायोवृत्त्या शोभनतिथ्यादिष्वेव केवलादिप्राप्तिसम्भवात् प्रायोभाविपदार्थनिरुपकेन व्यवहारनयेन क्रियमाणः शोभनतिथ्यादौ प्रव्रज्याप्रदानग्रहो न निरर्थकः । अन्यथा हि भोजनादपि कस्यचिन्मरणभावात् ''जीवनार्थं भोजनं विधेयं' इति वचनस्यापि निरर्थकत्वापत्तिः ।

**ननु** तर्हि **'नास्त्यकालो धर्मस्य'** इत्यादि वचनानां का गतिः ? आलस्यादिना 'अयं न धर्मानुकूलः कालः, तस्मात्तत्कालाय प्रतीक्षा कर्त्तव्या' इत्यादि कदालम्बनं गृहीत्वा धर्मेऽयततां प्रोत्साहनार्थं निगद्यमानमेतद्वचनं, न तु अशोभनतिथ्यादिष्वपि चारित्रग्रहणविधायकमिति विवेकः । वस्तुतस्तु अशोभनकालगृहीतस्य चारित्रस्य निष्फलतासम्भवाच्चारित्रसाफल्यार्थं कालविलम्बकरणमपि सफलचारित्रप्रापकत्वादुपचाराच्चारित्रानुष्ठानमेवेति अशोभनकाले चारित्राग्रहणमपि चारित्रग्रहणमेवेति तदाऽपि धर्मोऽस्त्येवेति न किञ्चिदनुपपन्नम् ।

किञ्च अवसर्पिण्यां प्रथमद्वितीयतृतीयारकेषु धर्माभावः, चतुर्थे मोक्षपर्यन्त-फलप्रापकधर्मसद्भावः, पञ्चमे तु चारित्रसद्भावेऽपि मोक्षाभावः, सकलतीर्थकृतां रात्रावेव शोभनतिथ्यादिष्वेव च जन्म, इत्येवमादिकं सर्वं कालस्यापि धर्मं प्रति किञ्चित्करताज्ञापकमिति न निश्चयनयवचनावलम्बनेन तदुपेक्षोचितेति ।

इदमप्यत्र न विस्मर्तव्यं यदुत कालवत् भावस्यापि धर्मं प्रति किञ्चित्करत्वमस्त्येव, प्रत्युत भावस्य धर्मं प्रति प्रधानकारणत्वात् तमुपेक्ष्य कालापेक्षा तु अजक्रयार्थं हस्तिविक्रयणवत् मूर्खतासूचिकेति । अत एव यथा जीवदयादिस्वरुपसंयमपरिणामस्य तदनुकूलसंयमाचारस्य च बाधा न भवेत् तथा कालापेक्षा समादरणीयेति । यद्यप्येवं तत्त्वमस्ति, तथापि उत्सर्गापवादप्रचुरत्वा-ज्जिनप्रवचनस्य सर्वथा सर्वत्र संविग्नगीतार्थवचनमनुसरणीयमिति उपदेशः ।

## ( १५ ) द्रव्यानुयोगे सति दर्शनशुद्धिर्भवति, युक्तिभिर्यथाऽवस्थितार्थपरिच्छेदात्, तदत्र चरणमपि युक्त्यनुगतमेव ग्रहीतव्यं, न पुनरागमादेव केवलादिति । ( ओ.नि. भा.७ )

**चन्द्र.** इदमत्र तात्पर्यम् । सम्यक्त्वं तावद् द्रव्यभावभेदाद् द्विविधं, तत्र परमार्थापरिज्ञानेऽपि भगवद्वचनतत्त्वरुचिराद्यं सम्यक्त्वं, परमार्थपरिज्ञानं च द्वितीयम् । ततश्च यावद् युक्तिभिः परमार्थपरिज्ञानं न भवति, तावद् द्रव्यसम्यक्त्वं, यदा तु युक्तिभिः परमार्थपरिज्ञानं भवति, तदा भावसम्यक्त्वम् । ततश्च युक्तिभिः परमार्थपरिज्ञाने सम्यक्त्वं निर्मलीभवतीति निश्चितम् । युक्तिभिः परमार्थपरिज्ञानं च द्रव्यानुयोगात् एवेति युक्तमुक्तं द्रव्यानुयोगे सति... इत्यादि ।

न चैतत्स्वमनोमात्रविजृम्भितम् । प्रतिमाशतके पञ्चदशकाव्ये महोपाध्यायैः तथोक्तत्वात् । इदमपि च तत्रोक्तं → अविविक्तषट्कायपरिज्ञानेऽपि चरणकरणतत्त्वपरिज्ञानपूर्वकतत्पालनेऽपि च स्याद्वादेन विविक्तषट्कायपरिज्ञानं विना स्वसमयपरसमयविवेचनं विना चौघतस्तद्रागमात्रेण द्रव्यसम्यक्त्वं सम्मतौ निर्णीतम् ← इति ।

अत्र विविक्तं = स्याद्वादेनानेकप्रकारतया विद्यमानम् इति स्थूलोऽर्थः । तथाहि 'षट्काया एव सन्ति' इति तु षट्कायपरिज्ञानं न सम्यक् स्थावरकायस्त्रसकायश्चेत्येवंरुपेण कायद्वयस्यापि सम्भवात्। एवं 'षट्कायाः सन्त्येव' इत्यपि न सम्यक्, "षट्कायाः प्रत्येकमनन्तवर्षायुष्काः न सन्ति, षट्कायाः प्रकटीभूतसिद्धस्वरुपा न सन्ति" इत्येवं परमाणुद्रव्यरूपत्वेन अलोकक्षेत्रगतत्वेन पुनः सिद्धस्वरुपप्राकट्यभावेन चोपाधिना षट्कायस्यासत्त्वस्यापि विद्यमानत्वात् । अत एव '**एकान्तेन हि षट्कायश्रद्धानेऽपि न शुद्धता**' इति अध्यात्मसारे निगदितम् ।

**ननु** दर्शनशुद्ध्यर्थं द्रव्यानुयोग आवश्यक इति तावत्सत्यं, परन्तु चारित्रार्थं तु द्रव्यानुयोगस्य काऽऽवश्यकता ? यदत्र 'चारित्रमपि युक्त्यनुगतमेव ग्रहीतव्यम्' इति उद्घोष्यते इति **चेत्** द्रव्यानुयोगं विना चारित्रसारस्य निश्चयशुद्धस्यासम्भवात् 'चारित्रमपि युक्त्यनुगतं ग्रहीतव्यम्' इति उक्तमिति जानीहि । तथा चोक्तं सन्मतितर्के कविश्रेष्ठैः सिद्धसेनदिवाकरसूरिभिः

"**चरणकरणपहाणा ससमयपरसमयमुक्कवावारा: ।**

**चरणकरणस्स सारं निच्छयसुद्धं न याणंति**" इति ।

चारित्रपालनतत्परा: स्वसमयपरसमयपरिज्ञानप्रयत्नविकला: साधव: चारित्रस्य निश्चयशुद्धं सारं न जानन्तीति प्रकृतगाथाभावार्थ: । तथा च द्रव्यानुयोगं विना चारित्रशुद्ध्यभावात् चारित्रशुद्ध्यर्थं अपि द्रव्यानुयोग आवश्यक एवेति ।

**ननु** तथाऽपि 'युक्त्यनुगतमेव ग्रहीतव्यम्' इत्यत्र एवकार एकान्तप्रतिपादको न युक्त:, यतो हि द्विविधा: पदार्था: जिनप्रवचने प्रसिद्धा:, आज्ञाग्राह्या युक्तिग्राह्याश्च । तत्र ये पदार्था: केवलं जिनाज्ञयैव ग्राह्या भवन्ति, न तत्र काश्चिद् युक्तयो विद्यन्ते, ते पदार्था आगमग्राह्या:, ये तु जिनाज्ञयेव युक्त्याऽपि गृह्यन्ते, ते आज्ञायुक्त्युभयग्राह्या: पदार्था: 'युक्तिग्राह्या' इति निगद्यन्ते । ततश्च यश्चारित्रांश: आज्ञाग्राह्य:, तदंशे चारित्रम् आज्ञाग्राह्यमेव, न तु युक्तिग्राह्यमपि, ततश्च आज्ञाग्राह्येंऽशे चारित्रम् आज्ञाग्राह्यं, युक्तिग्राह्येंऽशे चारित्रम् युक्तिग्राह्यमित्येवंविधविवेकसद्भावात् "चरणमपि युक्त्यनुगतमेव ग्रहीतव्यम्..." इत्येवंरूपेण एवकारगम्य आग्रहो न युज्यत इति **चेत्**

**सत्यं,** यश्चारित्रांश: युक्तिग्राह्य:, तस्मिन्नेवांशे प्रकृतवचनस्य प्रवृत्तत्वान्न दोष: । "युक्तिग्राह्येंऽशे चारित्रमपि युक्त्यनुगतमेव ग्राह्यम्" इत्येव प्रकृतवचनस्य तात्पर्यं मन्तव्यम्, तथा च न कश्चिद् दोष: ।

इदमप्यत्र सूक्ष्ममीक्षणीयं → युक्तिग्राह्येऽप्यंशे तथाविधक्षयोपशमाभावेन युक्त्यस्फुरणात् तदंशे चारित्रमाज्ञाग्राह्यमेव भवति, युक्तिस्फुरणे तु पश्चात्तदेव युक्तिग्राह्यमपीत्यत्र बहु वक्तव्यम्, तच्चाग्रे यथावसरं वक्ष्यते ।

## (१६) अपराधमर्यादया लोचनं दर्शनमाचार्यादेरालोचना इत्यभिधीयते । (ओ.नि. ३)

**चन्द्र.** योऽपराधो यावत्प्रमाण: कृत:, स अपराधस्तावत्प्रमाण एव गुरोरग्रे पश्चात्तापपूर्वकं प्रकटनीय:, न हीनो नाप्यधिक इति ।

**ननु** हीनापराधप्रकटनं तावन्मायामृषादिदोषसम्भवात् न कर्त्तव्यमिति मन्यामहे । परन्तु यावत्प्रमाणोऽपराध आसेवितः, पश्चात्तापातिरेकेण संवेगनिर्वेदातिरेकेण च तदधिकापराधकथने तु गुण एव, किं तस्यापि निषेधः क्रियते ? स्त्रीरुपदर्शन–मात्रापराधेऽपि स्त्रीस्पर्शापराधकथनं संवेगातिशयाद् गुणकरमेवेत्येवमन्यत्राऽप्यपराधे बोध्यमिति **चेत्**

न, अविवेकस्य परमापदां स्थानत्वात्, तदुक्तं जैनेतरग्रन्थेऽपि "**सहसा न विदधीत क्रियामविवेकः परमापदां पदम्**" इति । किञ्च जिनप्रवचनेऽपि कृतापराधादधिकापराधकथनं अर्थान्निषिद्धमेव । तथा हि "**कड कडत्ति भासिज्जा, अकडे नो कडत्ति य**" इति उत्तराध्ययनवचनम् । तत्र हि "यत्पापं कृतं, तत्पापं 'कृतं मया' इत्येवं गुरोरग्रे भाषेत शिष्यः, यच्च पापं न कृतं, तत्पापं 'मया न कृतमेतद्' इत्येवं गुरोरग्रे भाषेत शिष्यः" इति भावार्थः । अत्र हि "अकृतेऽपि पापे संवेगातिशयात् 'कृतं मया पापं' इति स्वीकरणीयम्" इति नोक्तम्, प्रत्युत तस्य निषेध उक्तः, एवंप्रकारेण कृतेऽपि पापे यावत्प्रमाणं पापं कृतं, तावत्प्रमाणादधिकं तु पापं अकृतमेवेति "तत्पापं न मया कृतं" इत्येव वक्तव्यं, न तु संवेगातिशयादधिकपापस्वीकरणं युक्तमिति ।

**ननु** तर्हि 'अणुसमं स्वपापं मेरुसमं दर्शनीयं' इत्यादिलोकोक्तिनां कः परमार्थः इति **चेत्** मेरुसमाने पापे यावान्पश्चात्तापो भवति, तावान्पश्चात्तापोऽणुसमेऽपि पापे कर्त्तव्यः इति परमार्थः, यदि वा अणुसमं स्वपापं संवेगवैराग्यार्थं मेरुसमं स्वयं दर्शनीयमेव, न तु गुरोः प्रदर्शनीयमपि इति परमार्थः । यद्यपि कदाचित्कुत्रचित्कस्यचित् स्वापराधादधिकपापस्वीकरणे अकृतापराधस्वीकरणे च भावविशेषाल्लाभोऽपि भवेत्, तथाऽपि नेयमेकपदी सर्वेषामनुसरणीया, राजमार्गस्यैवोत्सर्गतो अनुसरणीयत्वात् । अत एव भर्तृहरितन्मित्रराजयोः संन्यासग्रहणानन्तरं दर्शनोत्सुकप्रभूतजनागमननिवारणार्थं परस्परं केशाकेशिकरणं न जिनमतविदामालम्बनीयम्, जिनशासनापभ्राजनारुपत्वेन प्रभूतजनानां दुर्लभबोधित्वापादकत्वात्, न वाऽतिथिजनभक्त्यर्थं निर्धनस्त्रियाः स्वशीलमूल्यदानेन धान्यादिग्रहणं जिनमतरहस्यवेतृणां आलम्बनीयम् अतिथ्यभक्तिसकाशात्स्वशीलभ्रंशस्यातिगुरुदोषत्वात्, शक्तावसत्यां अतिथ्यभक्तेर्वस्तुतो दोषत्वस्यैवाभावाच्च, न वा चक्षुषा सविकारं परस्त्रीदर्शनापराधानन्तरं पश्चात्तापभावेन चक्षुषोः मरिचप्रक्षेपणं स्वामिविवेकानन्दकृतं सुमतिमतां स्वीकरणीयम्, कदाचिदन्धत्वसम्भवेन यावज्जीवं प्रभुदर्शनाद्यभावजीवरक्षापरिपालनाभावादिदोष–बाहुल्यभावात् । यद्यपि मुग्धदशायां कृते तादृशेऽविवेकसम्पन्नेऽनुष्ठाने दोषबहुलत्वम्, तथापि यदि तत्र तेषां मार्गानुसारी कश्चिद्भावो विद्यते, **तर्हि तदनुमोदनं तु न दुष्टम्** । अत एव मुक्त्यर्थं भृगुपातकाशीमरणादीनां

अविवेकप्रचुरत्वेऽपि सद्भावाशयलेशेन उचितजन्मानुकूलत्वं अध्यात्मसारे निगदितम् । तदुक्तं **आद्यान्नाज्ञानबाहुल्याद् मोक्षबाधकबाधनम् । सद्भावाशयलेशेनोचितं जन्म परे जगुः** इति । आद्यात् विषयशुद्धाद्भृगुपातादिरुपादनुष्ठानात् । शेषं स्पष्टमेवेति ।

इत्थं चाविवेकप्रयुक्तमनुष्ठानं कर्त्तव्यत्वेन नालम्बनीयम्, परन्तु यदि तत्र सद्भावाशयलेशोऽपि वर्तते, तर्हि तस्योचितमनुमोदनं कर्त्तव्यमेव, मार्गानुसारिभावस्यानुमोदनीयत्वप्रतिपादनादिति निष्कर्षः ।

## (१७) चक्षुषा निरुप्य यदि तत्र सत्त्वसम्भवो भवति, तत उद्धारं करोति सत्त्वानां अन्यालाभे सति । स चापोहः प्रतिलेखना भवति । (ओ.नि. ४)

**चन्द्र. ननु** यदि अन्यस्य वस्त्रादेर्लाभस्तत्र भवति, तर्हि किं तत्सत्त्वसंयुक्तं वस्त्रादिकं परित्याज्यम् ? किं वाऽन्यः कोऽपि विधिरत्रास्तीति **चेत्**

यदि तत्र त्रसजीवसम्भवो भवति, तत्कालमेव च तद्वस्त्रपरिभोग आवश्यकः, तदा अन्यवस्त्रालाभे तज्जीवोद्धारः कर्त्तव्यः, यदि च तदाऽन्यवस्त्रलाभो भवति, तदा तेन कार्यं कृत्वाऽपि प्रकृतं वस्त्रं न परित्यजनीयम्, किन्तु यदा स्वयमेव ते त्रसजीवा वस्त्रादेर्निर्गच्छन्ति, तदा तद्वस्त्रं ग्राह्यं परिभोग्यं चेति । यदि च त्रसजीवसम्भवेऽपि तत्कालमेव तत्परिभोगावश्यकता न भवेत्, तर्हि न त्रसजीवोद्धारः कर्त्तव्यः, परन्तु स्वयमेव त्रसजीवनिर्गमने तद्वस्त्रं धारणीयमिति । एतच्च त्रसजीवानाश्रित्योक्तम् । स्थावरजीवानामुद्धारस्तु दुःशकः, तथाऽपि तत्रायं विधिः समादरणीयः यदुत सचित्तपृथ्वीजलादिस्थावरजीवसंसक्तं वस्त्रादिकं न परिभोग्यम्, नाऽपि त्याज्यं, किन्तु यदा स्वयमेव ते स्थावरजीवा कालादिवशाद् च्यवनमाप्नुयुः तदा तद् वस्त्रादिकं ग्राह्यं परिभोग्यं च । स्थावरजीवसंसक्तिकाल एव तद्वस्त्रादिपरिभोगावश्यकतायां तु अन्यवस्त्रलाभे सति अन्यवस्त्रमेव परिभोग्यम्, अन्यवस्त्रालाभेऽपि अन्यवस्त्रलाभायैव भृशं यतनीयम्, स्थावरजीवोद्धारस्य दुःशकत्वात्, भृशं यत्नकरणेऽपि यद्यन्यवस्त्रं नोपलभ्येत, तर्हि संसक्तवस्त्रस्य यावान्भागः सचित्तपृथ्व्यादिरुपस्थावरजीवसंसक्तः, तावान् भागः

तद्वस्त्रात्सम्यक्स्फेटयित्वा पश्चात् तद्वस्त्रस्य परिभोगः कर्त्तव्यः, सम्यक्स्फेटनं नाम स्थावरजीवानां यथा स्पर्शादिकं न भवेत् तथा यतनया स्फेटनमिति । यदि च प्रभूतभागस्य स्थावरसंसक्तत्वात् तत्स्फेटने वस्त्रस्य परिभोग्यत्वमेव विघटेत, तर्हि न तत्स्फेटनं कर्त्तव्यम्, किन्तु अन्यवस्त्राभावे सति स्थावरजीवानां स्वयं च्यवनभवनं यावत्प्रतीक्षा कर्त्तव्या । आगाढकारणवशात्तत्परिभोगस्यावश्यकत्वे तु यथा स्थावरजीवविराधना अल्पा सम्भवेत् तथा यतनातः तत्परिभोगः कार्यः, तदनन्तरं च स्थावरजीवानां यावती विराधना तत्परिभोगेऽभवत्, तावद्विराधनायाः गुरुसकाशे आलोचना करणीया, प्रायश्चित्तं च यथा-गुरुदत्तं सम्यग्वोढव्यमिति ।

एवं वर्षाकाले वस्त्रादीनां निगोदसंसक्तत्वे सति निर्वातस्थाने तानि वस्त्रादीनि विस्तारणीयानि, भाद्रपदमासानन्तरं वर्षाऽभावात् कालादिवशतः ते जीवा कतिचिद्दिनानन्तरं स्वयमेव च्यवनमाप्नुवन्ति, तथाऽपि सम्यग्दिनपरिमाणस्या-ज्ञायमानत्वात् आश्विनशुक्लचतुर्दशीं यावत् तानि वस्त्राणि न परिभोग्यानि, तदनन्तरं च आश्विनमासिकरवितापाधिक्येन जीवानां च्यवनं, ततश्च वस्त्रस्य प्रक्षालनानन्तरं परिभोग्यत्वं भवति, तथापि तदनन्तरं गीतार्थमापृच्छ्य यथायोगं कर्त्तव्यमिति ।

तथा योऽन्यवस्त्रलाभोऽनन्तरं प्रतिपादितः, स यदि निर्दोषो भवति, तदैवानन्तरोक्तः विधिर्बोद्धव्यः, यदि च अन्यवस्त्रलाभः क्रीताभ्याहृतपश्चात्कर्मस्थापनादिप्रभूतदोषदुष्टो भवति, तर्हि आयव्ययौ विचिन्त्य यथा संयमस्फातिर्भवेत् तथा अन्यवस्त्रपरिभोगो जीवसंसक्तवस्त्राज्जीवानुद्धृत्य तत्परिभोगो वा यथायोगं कर्त्तव्य इति अधिकं बहुश्रुतसकाशादवसेयमिति ।

## ( १८ ) प्रतिलेखनं प्रतिलेखना, प्रति प्रति आगमानुसारेण निरूपणमित्यर्थः । ( ओ.नि. ४ )

**चन्द्र.** इदमत्र स्पष्टीकर्त्तव्यं तृतीयायां भाष्यगाथायां वृत्तौ '**अक्षरानुसारेण प्रतिनिरीक्षणमनुष्ठानं च यत्सा प्रतिलेखना**' इति प्रतिपादितमस्ति । तत्र केचिदित्थं

व्याख्यान्ति → 'सूत्र अर्थ तत्त्व करी सद्दहुं' इत्यादि पञ्चाशद्बोलानुसारेण वस्त्रादीनां प्रतिनिरीक्षणं परावतर्नादिकमनुष्ठानं च प्रतिलेखना' इति अक्षरा गुर्जरभाषानिबद्धप्रसिद्ध-पञ्चाशद्बोलरुपा एव ग्राह्या:, अन्याक्षराणामप्रसिद्धत्वात् ← इति ।

तच्च न युक्तिमद् व्याख्यानमाभाति, अक्षरपदस्यार्थान्तरत्वात् । तथा हि अक्षरो नामागम:, 'आगमानुसारेण प्रतिनिरीक्षणं अनुष्ठानं च प्रतिलेखना' इति भाव: । न चैतत्स्वकपोलकल्पनाकल्पितं, वृत्तिकृताऽपि अग्रे तथैवोक्तत्वात् । तथा हि तृतीयनिर्युक्तिगाथावृत्तौ → आगमानुसारेण या निरुपणा क्षेत्रादे: सा प्रतिलेखना ← इति निगदितम् । तथाऽत्रैव चतुर्थनिर्युक्तिगाथावृत्तौ → प्रति प्रति आगमानुसारेण निरुपणं सा प्रतिलेखना ← इति निगदितम् । ततश्च अक्षरपदमागमार्थकमेवेति युक्तमाभाति ।

किञ्च तृतीयनिर्युक्तिगाथावृत्तौ क्षेत्रादेरपि प्रतिलेखना प्रतिपादिता, न च क्षेत्रपिण्डादिप्रतिलेखनायां पञ्चाशद्बोलोच्चारव्यवहारो दृश्यत इति तत्रापि आगमानुसारेण प्रतिलेखनैव मन्तव्येति । ततश्च अक्षरानुसारेण इति पदस्य पञ्चाशद्बोल-प्रकारेणेत्यर्थो न शोभन:।

इदमत्रावधेयम् - पञ्चाशद्बोलव्यवहारस्य बहुसंविग्नगीतार्थपरम्पराचीर्णत्वा-त्कर्त्तव्यत्वं नास्माभि: निषिध्यते, प्रत्युत तदकरणे प्रायश्चित्तापत्तिर्ध्रुवैवेति । केवलं प्रस्तुतपाठस्यार्थोऽनन्तरोक्तस्वरुप एव इत्येवास्माभि: प्रज्ञाप्यत इति ।

## ( १९ ) संवच्छरबारसएण होही असिवंति तइ तओ णिंति । सुत्तत्थं कुव्वंता अइसयमाईहिं नाऊणं ।....

## सूत्रपौरुषीमर्थपौरुषीं च 'कुर्वन्त:' निष्पादयन्तोऽन्यदेश-मभविष्यदशिवं विश्वस्ता: संक्रामन्ति । ( ओ.नि.भा.१५ )

**चन्द्र.** 'अद्यदिनादारभ्य द्वादशवर्षानन्तरं अत्र क्षेत्रे अशिवं भविष्यति' इति यदि ज्ञायते, तर्हि तस्मिन्नेव दिने तस्मात्स्थानान्निर्गच्छन्ति, निर्गत्य च सूत्रपौरुषीमर्थपौरुषीं च कुर्वन्त: नि:शङ्किता: सन्तोऽभविष्यदशिवं अन्यदेशं गच्छन्तीति संक्षेपार्थ: ।

अत्र आह कश्चिद्-द्वादशवर्षानन्तरभाव्यशिवभीत्याऽधुनैव निर्गमनमाश्चर्यकरम्, अशिकालादर्वागेकादौ मासेऽवशिष्टे एव विहर्तव्यम्, तावता कालेनाभविष्य-दशिवदेशप्राप्तेः सुकरत्वात् ← इति ।

तत्र "सूत्रपौरुषीं अर्थपौरुषीं च निष्पादयन्तो...." इत्यादि वृत्तिवचनमेव समाधानग्राहकं, संयमप्राणस्य स्वाध्यायस्य सूत्रार्थपौरुषीरूपस्य हानेरत्यन्तमनिष्टत्वात्, शीघ्रविहारे च तद्धानेरवश्यंभावित्वात् । ततश्च वृत्तिवचनेनैतद् ज्ञाप्यते यदुत यथा सूत्रार्थपौरुषीद्वयस्य व्याघातो न भवेत्, तथैव विहारः कर्त्तव्यः, तादृशश्च विहारो न मासमात्रकालेनान्यदेशपर्यन्तं कर्तुं पार्यते इति द्वादशवर्षादर्वागेव निर्गन्तव्यमिति ।

**ननु** मा भवतु मासादर्वागेव विहारः, किन्तु सूत्रार्थपौरुषीरक्षणं तु एकद्व्यादिवर्षादर्वाग्विहारकरणेऽपि सुशकं, द्वादशवर्षादर्वाग्विहारभणनं तु न कथमपि जाघटीतीति **चेत्**

तत्किं 'विश्वस्ताः' इतिपदं न दृष्टवान् ? किं वा तद्पदप्रतिपाद्यां संयमसामाचारीं न ज्ञातवान्? शृणु तावत्तत्पदप्रतिपाद्यं रहस्यम् । नवकल्पो विहारः साधूनां सामाचारी, तत्र ऋतुबद्धकाले अष्टस्थानेषु मासं मासं यावन्निवसनं अष्टौ कल्पाः, वर्षायान्तु एकस्मिन्नेव स्थाने चतुर्मासं यावन्निवसनं एकः कल्पः, सर्वे मीलित्वा नव कल्पा भवन्ति । निष्कारणं हीनाधिककालनिवसने प्रायश्चित्तस्य प्रतिपादनात् विना कारणं न नवकल्पविहारभङ्गः कर्त्तव्यः । तत्र च ऋतुबद्धकालीनोऽयं विहारः मासमासप्रमाणत्वात् मासकल्प इति व्यवह्रीयते । तथा च अशिवकालादेकादिवर्षादर्वाग्विहारकरणे तु प्रतिदिनं विहारः कर्त्तव्यः स्यात्, अन्यथा अशिवक्षेत्रस्यातिविस्तृतस्योल्लङ्घनासम्भवात् । तथा च भवति मासकल्पसामाचारीभङ्ग इति ।

**ननु** मासकल्पसामाचारीभङ्गे के दोषाः ? येन स नेष्यते ? इति **चेत्**

इमे दोषाः

(१) तीर्थकराज्ञाभङ्गः

(२) प्रतिदिनं विहारकरणे स्वाध्यायहानिः

(३) प्रतिदिनं क्षेत्रपरिवर्तने संयमोचितक्षेत्रस्य प्रतिदिनं असुलभत्वात् संयमप्रतिकूलक्षेत्रप्राप्तौ संयमहानिः

(४) प्रतिदिनं विहारादिना श्रमादिदोषाः, श्रमादिदोषाच्च अनेषणीयपरिभोगसदोषस्थण्डिलभूमिसेवनदिवसनिद्रापरस्परविकथाश्रावकपरिचयादयो

बहवो दोषाः यथाजीवं सम्भवदुत्पत्तिका भवन्ति ।

(५) प्रतिदिनं विहारे पृथ्व्यादिषट्कायविराधना यथासम्भवं भवन्ती दुर्निवारा

(६) प्रतिदिनं विहारे सति एकक्षेत्रे स्थिरताऽभावात् भद्रकश्राद्धादीनां धर्मोपदेशादिना धार्मिकत्वकरणस्य दुःशकत्वम् । न हि एकद्वित्रयादिव्याख्यानसकाशात् श्रोतृणां सम्यग्धर्मप्राप्तिः तत्स्थैर्यं च कर्तुं पार्यत इति । एवं द्वित्र्यादिदिनविहारेऽपि यथासम्भवं दोषानुसन्धानं भावनीयम् ।

एवमादिदोषसम्भवान्मासकल्पविहारभङ्गो नेष्टः ।

**ननु** एवमादिदोषसम्भवे तु सर्वथैव विहारः परिहर्त्तव्यः, प्रतिदिनं विहार इव प्रतिमासं विहारेऽपि प्रकृतदोषाणामनिवार्यत्वात् इति **चेत्**

**सत्यम्**, परन्तु स्थिरवासे क्षेत्रममत्वगृहिममत्वगृहस्थाप्रीतिसुखशीलता-धर्मप्रभावनाहानिदेशान्तरवर्तिजीवानुपकारादीनां महद्दोषाणां सद्भावात् आयव्ययौ समालोच्य बहुदोषनिवारणार्थं प्रतिमासं विहारं समादृत्य तत्रानिवार्यत्वेन सम्भवतां दोषाणां स्वीकारे न कश्चिद्दोषः । तदाह उपदेशमालायां **आयवयं तुलिज्जा लाहाकंखिव्व वणियओ** इति ।

तस्मात् स्थिरवासं प्रतिदिनादिविहारं च द्वौ अपि दोषबहुलत्वात् परित्यज्य मासकल्पविहारः समादरणीय इति स्थितम् । तथा च मासकल्पानुसारेण विहारकरणे सम्भवदशिवदेशोल्लङ्घनं वर्षादिना कालेन दुःशकमिति द्वादशसंवत्सरग्रहणं न दुष्टमिति ।

**स्यादेतत्** मासकल्पानुसारेण विहारकरणेऽपि एकवर्षादिना कालेन अशिवदेशोल्लङ्घनं सम्भवत्येव, तथा हि अस्मत्स्थानाद् सम्भवदशिवदेशपर्यन्तं यावत् यावान् भागः, तं अष्टभागेन विभज्य प्रतिमासं एकं एकं भागं उल्लङ्घ्य तत्र तत्र अष्टस्थानेषु मासकल्पः आदरणीयः, तथा च न मासकल्पभङ्गः, न वा द्वादशवर्षादेव विहारकरणापत्तिरिति ।

**तदविचारितरमणीयम्** । स्वस्थानादशिवदेशपर्यन्तं यावद्भूभागः यदि विंशत्यधिकशतादियोजनप्रमाणः स्यात्, तर्हि प्रतिमासं द्वादशयोजनप्रमाणो विहारः कर्त्तव्यः स्यात् । तदर्थं च प्रभूतदिनानि यावद् विहारः कर्त्तव्यः स्यात्, तथा च ते एव पूर्वोक्ता दोषा आपद्येरन् । किञ्च द्वादशयोजनप्रमाणे तु भागे प्रभूतानि क्षेत्राणि मासकल्पयोग्यानि सम्भवन्त्येव, तदतिक्रमे तु प्रायश्चित्तापत्तिः । तस्मात् निश्चितमेतत् यदुत अशिवसम्भवकालात् पूर्वं द्वादशवर्षादर्वागेव स्वस्थानात् विहर्त्तव्यम् । मार्गे च मासकल्पयोग्ये प्रतिक्षेत्रे मासकल्पं मासकल्पं कृत्वाऽग्रेऽग्रे विहर्त्तव्यम् । इत्थं च द्वादशवर्षकालेन सम्भवदशिवक्षेत्रोल्लङ्घनं सुखेनैव भविष्यति, न तत्र काचिच्चिन्ता, न तत्र किञ्चिद्भयम् । एतद्ज्ञापनार्थमेव 'विश्वस्ता'

इति पदमुपात्तं वृत्तिकृता । न हि शीघ्रविहारे मासकल्पयोग्यक्षेत्रोल्लङ्घने मासकल्पभङ्गे च 'विश्वस्ता' इति विशेषणं सङ्घटत इति निर्मलधिया ध्येयम् ।

अयं चोत्सर्गः, स चापवादाविनाभावी, स चापवाद ओघनिर्युक्तौ प्रदर्शित एव । वर्तमानकाले तु संयमयोग्यक्षेत्राभावादिकारणवशात् गुर्वाज्ञानुसारेण विहर्त्तव्यमिति कल्पसूत्रसुबोधिकायां विनयविजयोपाध्यायाः प्राहुः ।

तच्च युक्तमेव "**कालस्स य परिहाणी संजमजोग्गाइ नत्थि खेत्ताइ । जयणाए वट्टिअव्वं न हु जयणा भंजए अंगं**" इति उपदेशमालावचनप्रामाण्यात् ।

तद्वृत्तिश्च लेशत इयं → संयमयोग्यानि न सन्त्यधुना क्षेत्राणि, अतो यतनया आगमोक्तगुणदोषाश्रयणपरिहारलक्षणया वर्तितव्यं = यापनीयम् । यतो **नहु** = नैव यतना क्रियमाणा **भनक्ति** = विनाशयति अङ्गं प्रक्रमात् संयमशरीरम् ← अत्रेदं सम्यग् धारणीयम्, यद्यपि कालक्षेत्रादिहानिवशात् गुर्वाज्ञया विहारकरणं युक्तमेव, तथाऽपि मासकल्पादिसामाचार्या विच्छेदो न निगदितः, मालायां च यतनाकरणं उपदिष्टं, यतना च "यथा यथा संयमस्वाध्यायादिस्फातिर्भवति, तथा तथा प्रवृत्तिः" इत्येवंरूपैव । ततश्च मासकल्पादिसदृशसमाचरणे यथासम्भवं यत्नो विधेय इति ।

## ( २० ) अह कालं करेइ ताहे जं तस्स उवगरणं तं सव्वं छड्डिज्जइ । ( ओ.नि.भा.२० )

**चन्द्र.** अशिवगृहीतसाधोः कालधर्मे सति तस्य सत्कं सर्वमपि उपकरणं परिष्ठाप्यत इति भावः । **ननु** तदुपकरणोपभोगे को दोष इति **चेत्** अशिवगृहीत-साधूपकरणस्याशिवकारकत्वसम्भवात् तद्भोक्तुः अशिवापत्तिरेव दोष इति ।

अथैवमर्थादापन्नं अशिवरहितसाधोः मरणे सति तदुपकरणोपभोगे न कश्चिद् दोष इति **चेत्** सत्यम्, वस्त्रदौर्लभ्यकाले तथैव, वस्त्रसुलभताकाले च यथा गच्छसामाचारी, तथा कर्त्तव्यम्, संविग्नगीतार्थप्रवर्तिताया गच्छसामाचार्या अनुल्लङ्घनीयत्वात् । अत एव "मृतकसाधुसम्पृक्तं वस्त्रादिकं न परिभोग्यम् तदसम्पृक्तं तु तदीयोपकरणं परिभोग्यं" इति ।

"मृतकसाधुसम्पृक्तं तदसम्पृक्तं वा तदीयोपकरणं सर्वं न परिभोग्यं" इति च सामाचारी तत्र तत्र गच्छे श्रूयते । सा च तत्तद्गच्छीयैस्तथैवानुसरणीयेति ।

इदमुपलक्षणं उत्प्रव्रजितोपकरणेऽपि अनन्तरोक्तमेव बोध्यम् । तथाहि उत्प्रव्रजितकण्डरीकोपकरणं प्रव्रजितुकामेन पुण्डरीकेण गृहीतमुपभुक्तं च । न चैतद्दृष्टान्तमात्रम्, न तावता पदार्थसिद्धिरिति शङ्कनीयम् । व्यवहारभाष्ये १२७० प्रभृतिगाथावृत्तौ अवधावितोपकरणपरिग्रहस्य स्पष्टमेवोक्तत्वात् । तथाऽपि गच्छीयसामाचारी यदि तदुपकरणपरिष्ठापनरूपैव, तर्हि सैव समाचरणीया जीतव्यवहारं प्रमाणयद्भिः साधुभिः, न तु शास्त्रवचनं पुरस्कृत्य सामाचारीभङ्गपरायणैर्भवितव्यमिति । अन्यथा हि प्रभूतानां वर्तमानसामाचारीणां त्याज्यत्वप्रसङ्गो भवेत्, तद्विपरीतशास्त्रपाठानामुपलभ्यमानत्वादित्यलं विस्तरेण ।

**( २१ ) अथासौ धर्मनिरपेक्षतया नेच्छति ततः किमित्याह - अनिच्छति तस्मिंस्तस्य साधोर्गमनं तद्दिवसं स्थित्वा छिद्रं लब्ध्वा नंष्टव्यम् । ( ओ.नि.भा. २१ )**

**चन्द्र.** अशिवकारिदेवतायाः सकाशाद् गच्छस्याशिवादिकं विघ्नं मा भूत् इत्येतदर्थं गच्छः अशिवग्रस्तं साधुं तत्र मुक्त्वा निर्जिगमिषति । तत्र चाशिवग्रस्तस्येदं कर्त्तव्यं यदुत तेन गच्छः सुखं विसर्जनीयः, मा मदर्थं सर्वेऽपि म्रियन्तामिति । किन्तु "अहमेकाकी भविष्यामि, असमाधिमरणं भविष्यति मम" इत्यादिचिन्तया स गुणरत्नाधारस्य श्रमणगच्छस्य चिन्तां मुक्त्वा स्वार्थपरायणो भूत्वा न गच्छं विसर्जयति, रोदीति च, तदा एकं साधुं समर्थं तत्र स्थापयित्वा सकलो गच्छो निर्गच्छति, सोऽपि च साधुः तं अशिवग्रस्तं स्वविसर्जनाय प्रार्थयति, तत्रापि धर्मनिरपेक्षो भूत्वा स यदि न विसर्जयति, तदा समर्थः साधुः केनापि व्याजेन तस्मात्स्थानान्निर्गच्छतीति सङ्क्षेपार्थः ।

अत्र भवतीयमाशङ्का → "**सव्वं किल पडिवाइ वेयावच्चं अपडिवाइ, जो गिलाणं पडिसेवइ सो मां पडिसेवइ**" इत्यादि शास्त्रवचनानि वैयावृत्यमाहात्म्यप्रतिपादकानि किं तेन गच्छेन विस्मृतानि ? येन जीवितव्यरक्षणार्थं एकं

अशिवग्रस्तं निःसहायं मुक्त्वा गन्तुं प्रयतते ? किञ्च बृहत्कल्पवृत्तावपि उक्तं यदुत "म्लेच्छादिभयेऽवि नाचार्येण ग्लानं निःसहायं मुक्त्वा नंष्टव्यम्, किन्तु जीवितव्यनिरपेक्षेण परमबन्धुकल्पेनाचार्येण स्कन्धे समारोप्य तं ग्लानं तत्स्थानान्निर्गन्तव्यम्। "यद्यपि चैवं भारवशेन गमनगतिः स्खलिता भवेत्, ततश्च म्लेच्छादिहस्ते निपतितव्यमपि स्यात्, जीवितव्यशङ्काऽपि भवेत्, तथापि आचार्येण ग्लानसमाधानार्थं स्वजीवितव्यमपि नापेक्षणीयं इति। इत्थं च बृहत्कल्पवृत्तिभावार्थ-विचारणे तु प्रकृतमोघनिर्युक्तिवचनं स्वार्थपरायणताप्रतिपादनपरं जिनागमविरोधि आभाति ← इति ।

तत्र समाधीयते । आत्यन्तिकोत्सर्गप्रतिपादनपरं बृहत्कल्पवृत्तिवचनं न प्रकृतवचनविरोधि, प्रकृतवचनस्योत्सर्गसापेक्षापवादपरायणत्वात् । अत एव बृहत्कल्पवृत्तावपि अनन्तरमेवापवादः प्रदर्शित एव । युक्तमपि चैतत् । यतो हि अत्र सकलस्यापि गच्छस्य निवासेऽपि न ग्लानरक्षणं शक्यम्, प्रत्युत गच्छस्य महद्विघ्नसम्भावना, ततश्च गच्छहानात् शासनहानिर्ध्रुवा । एकादिसाधुनिवासेऽपि ग्लानस्य तस्य च द्वयोरपि विनाशसम्भवात् न कोऽपि गुणः, तस्मात् तत्र निर्गमनं न दुष्टमिति ।

वैयावृत्यमाहात्म्यपराणि वचनानि तु व्ययसकाशादधिकलाभे सत्येव मन्तव्यानि, व्ययस्यैव अधिकत्वे तु प्रकृतमेव वचनमनुसरणीयम् । किञ्च बृहत्कल्पवृत्तिवचनं "आचार्येण निजजीवितव्यरक्षणार्थं ग्लानादित्यागो न कर्त्तव्यः" इति ज्ञापयति, गच्छरक्षणार्थं गच्छाद्यर्थं स्वरक्षणाय च तथाविधस्त्यागः वस्तुतोऽत्यागत्वान्निर्दोषः । ऐहिकस्वार्थमात्रलुब्धेन न भवितव्यमाचार्येण, आयतिलाभानुसारेण तु यथायोग्यं यतनायां न कोऽपि दोष इति विवेकः । तथा च न वचनद्वयस्य परस्परं विरोध इति सिद्धं ।

## ( २२ ) रत्नाधिकस्य गीतार्थस्य पूर्वप्राप्तस्य पश्चात्प्राप्तस्य वा आलोचना देया, तदभावे लघोरपि गीतार्थस्य दातव्या । ( ओ.नि.भा. २२ )

**चन्द्र.** इत्थं चालोचनाग्रहणाधिकारित्वं रत्नाधिकस्यावमरात्निकस्य वा गीतार्थस्यैवेति, आलोचनादानाधिकारस्तु गीतार्थस्यागीतार्थस्य वा कस्यापि भवति केवलं स्थानाङ्गोक्ता

आलोचकगुणास्तत्रापेक्षणीया इति । अगीतार्थो यदि आलोचनां गृह्णाति, प्रायश्चितं च ददाति, तर्हि तस्य महान् दोषः, यदुक्तमुपदेशमालायां → **आसायण मिच्छत्तं आसायणवज्जणा उ सम्मत्तं आसायणानिमित्तं कुव्वइ दीहं च संसारं ।** ← अगीतार्थो यदि आलोचनां गृहीत्वा प्रायश्चित्तं ददाति, तर्हि शास्त्रावबोधाभावात् कुत्रचित्प्रायश्चित्ताभावेऽपि प्रायश्चित्तं ददाति, कुत्रचिच्चाल्पप्रायश्चित्तेऽपि बहुप्रायश्चित्तं ददाति । इत्थं च सूत्रविरुद्धमपि सूत्रनाम्ना व्यवहरन्नगीतार्थः सूत्रस्य महतीमाशातनां करोति । एषा चाशातना मिथ्यात्वं, आशातनात्यागश्च सम्यक्त्वम्, अगीतार्थश्चैतदाशातनानिमित्तं स्वस्य संसारं दीर्घं करोतीति सङ्क्षेपार्थः ।

इत्थं परहितभावनयाऽपि अगीतार्थेन न परेषामालोचना ग्रहीतव्या, प्रायश्चित्तं वा दातव्यम्, परन्तु गीतार्थसमीपे आलोचना ग्राहयितव्या, गीतार्थाज्ञया तु धारणाव्यवहारमनुसृत्यागीतार्थोऽपि यदि आलोचनाग्रहणादिकं कुर्यात्, तर्हि न दोष इत्यपि अनुसन्धेयमत्र ।

इदमुपलक्षणं उपदेशदीक्षादानादावपि गीतार्थेन तदनुमत्यैवागीतार्थेन च प्रयतितव्यम्, नान्येन, अनधिकारिकृतत्वेन निष्फलत्वसम्भवात्, आशातनादिना स्वस्य परस्य च महापायसम्भवाच्चेति ।

आलोचना च सामान्यतः प्रतिदिनं विशेषतश्च प्रतिपक्षं प्रतिमासं प्रतिचतुर्मासं सांवत्सरिकपर्वणि चावश्यं कर्त्तव्या, प्रायश्चितं च यथादत्तं सम्यग्वोढव्यम्, आत्मशुद्धेः प्रायस्तदविनाभावित्वात् । तथाविधानां आलोचनाग्राहकाणामलाभे तु प्रतीक्षाऽपि न दुष्टा, कालासहिष्णुतयाऽगीतार्थादीनां सकाशे तत्करणे दोषबाहुल्यं न दुःशकमित्यपि न विस्मरणीयम् ।

## ( २३ ) आह-कथं पुनः साधूनां त्यक्तापराधानां राजभयं भवति ? "यस्य हस्तौ च पादौ च जिह्वाग्रं च सुयन्त्रितम् । इन्द्रियाणि च गुप्तानि तस्य राजा करोति किं ?" सत्यमेतत्... । ( ओ.नि.भा. २५-२६ )

**चन्द्र.** राजा हि प्रायशः शिष्टः एव भवतीति स निरपराधान् न दण्डयति, अत एवात्रोक्तं 'त्यक्तापराधानां साधूनां राजभयं कथं भवति' इति । राजापराधे च निमित्तीभूतानि वस्तूनि

श्लोके प्रतिपादितानि । तथा हि हस्ताभ्यां हननचौर्यादिकं, पादाभ्यां अन्तःपुरादिनिषिद्धस्थानगमनम्, जिह्वाग्रेण राजनिन्दाराजशत्रुप्रशंसादिकं, इन्द्रियैश्च मांसभक्षणागम्यगमनादिकं राजापराधे निमित्तं सम्भवति । साधवश्च सुनियन्त्रितसर्वनिमित्तकाः न राजापराधिनो भवन्तीति राजभयं तेषां नोपपद्यत इति ।

अत्र निमित्तमध्ये जिह्वाग्रग्रहणं गूढाभिप्रायकं । तथा हि – यद्यपि राजाऽधार्मिकोऽपि भवति, हिंसको भोगलम्पटश्चापि भवति, तथाऽपि तत्कोपकरं तु न किञ्चिदपि वक्तव्यम्, सङ्घस्य शासनस्य च महदापन्महोदधिनिमग्नत्वप्रसङ्गात् । अत एव तच्छत्रोर्गुणवतोऽपि तत्कोपकरी प्रशंसा न कर्त्तव्या, तत एव तदुपदेशदाने तु यथालाभं यथावसरं च यत्नो न निषिध्यते । परन्तु तत्रापि अत्यन्तमप्रमतेन भाव्यम् । यथाकथंचित्प्रमादे तु प्रकोपतस्तन्नृपसकाशादनन्तरोक्तदोषोद्भवः प्रायोऽनिवार्यः ।

तथा धर्मस्य राजनिश्रितत्वमपि सर्वथा न निर्भयम्, तत्कालीनप्रचुरलाभसम्भवेऽपि धर्मानुरागिराजप्रद्वेषिराजान्तरसत्तायां सत्यां सङ्घादीनां महत्कष्टस्यानिवार्यत्वप्रसङ्गात् । अत्र दृष्टान्तः कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिप्रतिबोधितकुमारपालमरणानन्तरभावित-त्प्रद्वेषिअजयपालसत्ता आर्यसुहस्तिप्रतिबोधित-सम्प्रतिराडनन्तरभाविसाधुमस्तकघातप्रत्ययसुवर्णमुद्राप्रदायकराजसत्ता चेति । किञ्च धर्मस्य राजाश्रितत्वे राजानुवृत्या प्रजासु धर्मप्रभावनायां सत्यामपि सा प्रायो न बद्धमूला, राजप्रभावेन प्रवृत्तत्वात्, अत एव भावधर्मप्रभावना तत्र प्रायोऽल्पीयसी, राजानुसरणभावमूलकत्वात् । साक्षात्प्रजाश्रितत्वे तु तस्य, प्रजाभिः स्वोल्लासेन तद्ग्रहणात् बद्धमूलत्वेन भावधर्मप्रभावना महीयसीति ।

किं बहुना ? स्याद्वादमये जिनप्रवचने यथा यथा मोक्षानुगुणता भवति, तथा तथा प्रयतितव्यम्, न तु कुत्राप्येकान्त इति सप्रसङ्गमुक्तमेतत्सूक्ष्ममीक्षणीयमिति ।

**( २४ ) निव्विसए भत्तपाणपडिसेहे उवगरणहरे अ एत्थ गच्छेण चेव वच्चंति, जत्थ य जीवियचरित्तभेओ तत्थ एगाणिओ होज्जा । ( ओ.नि.भा. २५-२६ )**

**चन्द्र. ननु** अत्र उपकरणहारिणि राज्ञि गच्छेनैव गमनमनुज्ञातं, जीवितचारित्रभेद एवैकाकित्वं निगदितम् । अनन्तरभाष्यगाथावृत्तौ तु "उपकरणहारिजीवितचारित्र-

हारिणोर्गणभेदः कार्य'' इत्युक्तम् । तत्र च उपकरणहारिण्यपि गणभेदं कृत्वैकाकित्वं अनुज्ञातम् । ततश्च स्पष्ट एव परस्पर विरोध इति **चेत्**

अत्रेदमुत्प्रेक्ष्यते – प्रकृतप्राकृतपाठश्चूर्णिकृतोऽभिप्रायः, वृत्तिपाठस्तु वृत्तिकृतोऽभिप्राय इति मतान्तरमेतदवगन्तव्यमिति प्रथमं समाधानम् ।

वृत्तिकृता गणभेद उक्तः, गणभेदश्च सर्वथैकाकित्वेन द्वित्र्यादिसमुदायरुपेण च सम्भवति । तथा च उपकरणहारिणि राज्ञि गणभेदो नैकाकित्वेन रुपेण कर्त्तव्यः, परन्तु द्वित्र्यादिसमुदायरुपेण, जीवितचारित्रहारिणि च राज्ञि एकाकित्वेन रुपेण गणभेदः कर्त्तव्यः इति वृत्तिकृदभिप्रायः । युक्तं चैतत् जीवितचारित्रहरणस्य महादोषत्वात्, एकाकित्वेनैव च तदल्पीकरणसम्भवात् । उपकरणहरणस्य तु तादृशमहादोषत्वाभावात् द्वित्र्यादिसमुदायरूपेण गणभेदस्यैकाकित्वापेक्षयाऽल्प दोषत्वात् । चूर्णिकृता तु जीवितचारित्रभेदे एकाकित्वं प्रतिपादितम्, उपकरणहारिणि च गच्छेन गमनं प्रतिपादितम्, तत्र द्वित्र्यादिसमुदायरूपेण गमनमपि गच्छेन गमनमेवेति वृत्तिकृच्चूर्णिकृतोर्द्वयोरभिप्राय एक एव समापन्नः यदुत उपकरणहारिणि द्वित्र्यादिसमुदायरूपेण गन्तव्यम्, जीवितचारित्रहारिणि च एकाकिना गन्तव्यम् । तत्र द्वित्र्यादिसमुदायः वृत्तिकृदभिप्रायेण गणभेदः, चूर्णिकृदभिप्रायेण समूहरूपत्वाद् गण इति न परस्परं विरोध इति द्वितीयसमाधानमेतत् ।

एतत्तावत् अस्माकं चिन्तनम् । बहुश्रुता एवात्र प्रमाणमित्यलं विस्तरेणेति ।

## ( २५ ) ततः स जिगमिषुः साधुराचार्यस्य चैत्यसाधुवन्दनां करोति । ( ओ.नि.भा.३२ )

**चन्द्र.** गुर्वादेशेन गुरूपदिष्टकार्यार्थं जिगमिषुः साधुः आचार्यस्य चैत्यसाधुवन्दनां करोतीति । अत्र 'चैत्यसाधुवन्दना' इतिपदस्य कोऽर्थः इति जिज्ञासायां बहुश्रुताः प्राहुः स साधुराचार्यं कथयति "हे गुरो ! मार्गे गच्छतो मम यावन्ति चैत्यानि साधवश्च मीलिष्यन्ति, तेषां सर्वेषां भवन्निमित्तं वन्दनं दास्यामि" इति हि चैत्यसाधुवन्दनाकरणपदार्थः । न

चैतदश्रुतपूर्वमिति शङ्कनीयम् । "पुव्विं चेइआइं वंदिता नमंसित्ता तुब्भण्हं पायमूले विहरमाणेणं जे केइ..." इत्यादि पाक्षिकक्षमापनासूत्रतात्पर्यार्थ-चिन्तनात् सर्वमेतत्स्फुटीभवति । अत्र हि गुरुपार्श्वे समागतः साधुरेतन्निवेदयति, गुरुश्च "अहमवि वंदावेमि चेइआइं" इति वदति । ततश्चैतदनुमीयते यदुत गुर्वादेशेन निर्गच्छन्साधुरेतत्कथयेत् यदुत "मार्गे यानि चैत्यानि साधवश्च मीलिष्यन्ति, तेषां सर्वेषां भवन्निमित्तं वन्दनं दास्ये" इति ।

एतच्च चैत्यसाधुवन्दनाकरणं रत्नाधिकं प्रत्यवमरात्निकस्य कर्त्तव्यमिति बोध्यम् । अत एव यदि पर्यायेण लघुस्ततः शेषाणामपि साधूनां चैत्यसाधुवन्दनां करोति, अथाऽसौ गन्ता साधु रत्नाधिकस्ततस्ते साधवस्तस्य चैत्यसाधुवन्दनां विदधति" इत्यनन्तरमेव वृत्तौ निगदितम् ।

केचित्त्वस्यान्यथाऽप्यर्थं कल्पन्ते, स चात्रानुपयोगी आभातीति कृत्वा नोपात्त इति बोध्यम्।

## ( २६ ) स्थण्डिलादस्थण्डिलं च संक्रामता सता साधुना पादौ रजोहरणेन प्रमार्जनीयाविति विधिः । मा भूत् सचित्तपृथिव्या अचित्तपृथिव्या व्यापत्तिः । ( ओ.नि. १४ )

**चन्द्र.** इदमुपलक्षणं अस्थण्डिलात्स्थण्डिलं संक्रामताऽपि साधुना एष एव विधिः समादरणीयः । यत्त्वत्र रजोहरणेन प्रमार्जनमुक्तम्, न तु दण्डासनेन, तत् दण्डासनस्य संविग्नगीतार्थपरम्पराचीर्णत्वात् ग्रंथकाले च तदभावाद्बोध्यम् । न च संयमप्रधानोपकरणस्य रजोहरणस्य पादस्पर्शनेऽपावित्र्यापत्तिरिति मुग्धजनोचितं शङ्कनीयम् । पादप्रमार्जनादिक्रियया पृथिव्यादिरक्षार्थमेव रजोहरणस्योपयोगित्वात्, संयमक्रिययैव च तस्य पावित्र्याक्षतेः, अन्यथा तु जीवविराधनयाऽऽत्माऽपावित्र्ये रजोहरणपावित्र्यं नाममात्रेमेवेति । अत एव ममत्वविषयीभूतस्य रजोहरणस्य संसारकारणत्वमपि नासम्भवि, 'जे आसवा ते परिसवा, जे परिसवा ते आसवा' इति वचनेनोपकरणस्यापि तस्याधिकरणत्वसम्भवस्यानपायत्वादिति ।

**ननु** यथा स्थण्डिलादस्थण्डिलं संक्रामता पादौ प्रमार्जनीयौ, तथैवाऽस्थण्डिले प्रतिपदं पादौ प्रमार्जनीयौ न वा ? इति **चेत्** न, तत्र पादौ अप्रमार्ज्यैव गन्तव्यम्, यदा तु पुनः

अस्थण्डिलात्स्थण्डिलं संक्रमितव्यं स्यात्, तदा पुनः पादौ प्रमार्जनीयौ ।

**ननु** काऽत्र युक्तिरिति **चेत्** इयम् । प्रथमं स्थण्डिले गच्छतः साधोः पादौ अचित्तरजसा व्याप्तौ भवतः, यदा तु स अस्थण्डिलं सङ्क्रामति, तदा यदि पादौ न प्रमार्जयेत्, तर्हि अचित्तरजः अस्थण्डिलगतसचित्तरजस उपरि निपतेत्, ततश्च सचित्तरजःविराधना स्यात् । तस्मात्तत्र पादौ प्रमार्ज्य अचित्तरजः स्थण्डिले एव निपात्य अस्थण्डिले सङ्क्रमणं करणीयम् । अस्थण्डिले तु सर्वत्र सचित्तपृथ्वी अस्ति, ततश्च प्रतिपदं पादप्रमार्जनं न करणीयम्, सचित्ताचितयोर्मिश्रणाभावात् ।

**ननु** सर्वमेतन्निर्युक्तिकमाभाति । तथाहि – अस्थण्डिले स्थण्डिलगताचित्तरजःपतननिवारणार्थं सङ्क्रमणकाले प्रमार्जनं क्रियते, परन्तु मा भवतु अचित्तरजसा सचित्तरजोव्याघातः, साधुपादयोः सकाशात्तु स दृढतरं भवेदेव । ततश्च प्रमार्जनेन न किञ्चिदपि प्रयोजनं साध्यते, विराधनायाः तदवस्थत्वात्, प्रत्युताधिकभावात् इति **चेत्**

मैवम्, यद्यपि अचितरजःसकाशात्साधुपादौ महच्छस्त्रम्, अधिकविराधनाकारि च । तथाऽपि तौ तत्रास्थण्डिले क्षणमात्रमेव तिष्ठतः, न चिरकालं, ततश्च क्षणमात्रमेव सचित्तरजोविराधना । यदि तु अचित्तरजोऽप्रमार्जनेन तत्राचित्तरजो निपतेत्, तर्हि तत् तत्र चिरकालस्थायि इति कृत्वा चिरकालं सचित्तपृथ्वीविराधना इति परमार्थतः अचित्तरजोजन्यायाः सचितजीवविराधनाया एवाधिक्यात् अवश्यं प्रमार्जनं कर्त्तव्यम् । साधुपादजन्यविराधनायास्त्वनिवार्यत्वात् न तत्र दोषः, जिनाज्ञया यतनया प्रवृत्तत्वात् । लोकेऽप्ययं न्यायो दृश्यत एव, यदुत चिरकालसम्भविनी अल्पापि सततं भाविनी पीडाऽल्पकालभाव्यधिकपीडासकाशादतीवाधिकेति ।

**ननु** एष एव न्यायः अस्थण्डिले एव प्रतिपदं किमर्थं न लगयितव्यः ? अर्थात् अस्थण्डिलेऽपि प्रतिपदं पादौ प्रमार्जनीयौ, येन पूर्वपदस्थानीयं सचित्तरजोऽग्रपदस्थानीयसचित्तरजउपरि न निपतेदिति **चेत्** न, यथाऽचित्तरजः सचित्तरजःशस्त्रं भवति, तथा न सचित्तरजः बहुसदृशसचित्तरजः प्रति ।

**ननु** सचित्तरजसो बहुसदृशस्यापि सचित्तरजसः स्वकायशस्त्रत्वं तु भवेदेवेति **चेत्** न, बहुसदृशयोः सचित्तरजसोः परस्परं प्रायोऽशस्त्रत्वात् । अत एव स्वकायशस्त्रवर्णने 'नीलमृद् रक्तमृदं प्रति स्वकायशस्त्रम्' इति वर्णादिभेदभिन्नमेव सचितरजः गृह्यते, न तु 'नीलमृद् नीलमृदं प्रति स्वकायशस्त्रम्' इति वर्णादिसदृशतापन्नं सचित्तरज इति दृढमनुसन्धेयम् ।

तस्मादयमत्र भावार्थः, अस्थण्डिले एव गच्छन्साधुः यदि प्रतिपदं पादौ न प्रमार्जयेत्, तर्हि तत्पादविलग्नं सचित्तरजः अग्रिमस्थानीयबहुसदृशसचित्तरजःसम्पृक्तं भवेत्, परन्तु प्रायोऽशस्त्रत्वात् तत्र विराधनाऽभावः, प्रत्युत अग्रिमस्थानीयसचित्तरजः साधुपादाभ्यामनन्तरं स्पृष्टं न भवेत्, पूर्वपदस्थानीयसचित्तरजोऽन्तरितस्पर्शभावात् । तथा च साधुपादजन्याऽपि अग्रिमपदस्थानीय-सचित्तरजोविराधना अल्पैव भवेत् ।

यदि तु साधुः प्रतिपदं प्रमार्जयेत्, तर्हि परकायशस्त्रात्मकेन रजोहरणेन पादविलग्नसचित्तरजोविराधनायाः साक्षात्साधुपादसंस्पर्शेन अग्रिमपदस्थानीयसचित्त-रजोविराधनायाश्च ध्रौव्यात् अधिको दोषः स्यात् । तस्मादायव्ययपर्यालोचनेन तु ज्ञायते यदुत अस्थण्डिले गच्छता साधुना प्रतिपदं पादप्रमार्जनं नैव कर्तव्यम् ।

**ननु** यदाऽस्थण्डिलात्स्थण्डिलं संक्रामति साधुः, तदा तेन प्रमार्जनं कर्त्तव्यं न वा ? यदि क्रियेत, तर्हि रजोहरणेन परकायशस्त्ररूपेण सचित्तरजोविराधना स्यात्, तस्मान्न कर्त्तव्यमि **चेत्** न, यदि न क्रियेत, तर्हि तत्सचित्तरजः, अचित्तरजउपरि निपतेत्, तत्र च चिरकालमवतिष्ठेत्, तच्च अचित्तरजः शस्त्रमेव, रजोहरणेन सचित्तरजःप्रमार्जने तु स्वल्पविराधनासम्भवेऽपि पादलग्नसचित्तरजसः स्वस्थाननिपतनेन तत्र च तस्य चिरं जीवनसम्भवेनाल्पा विराधना स्यादिति तत्रावश्यं सचितरजः रजोहरणेन प्रमार्ज्य तस्यैव स्थाने निपातनीया, न तु अचित्तरजउपरि इति ।

अतिगहनं सूक्ष्मप्रज्ञागम्यमिदं तत्त्वं प्रशान्तमनसा चिन्तनीयम् । अविस्मरणार्थं संक्षेपार्थः पुनर्निगद्यते,

(१) स्थण्डिलादस्थण्डिलं सङ्क्रामता साधुना पादौ रजोहरणेन प्रमार्जनीयौ ।

(२) अस्थण्डिलात्स्थण्डिलं सङ्क्रामता साधुना पादौ रजोहरणेन प्रमार्जनीयौ ।

(३) स्थण्डिले एव गच्छता साधुना प्रतिपदं न पादौ रजोहरणेन प्रमार्जनीयौ ।

(४) अस्थण्डिले एव गच्छता साधुना प्रतिपदं न पादौ रजोहरणेन प्रमार्जनीयौ ।

इदमत्रावधेयं वर्णतः शुक्ला गन्धतः सुरभिगन्धा रसतो मधुरा स्पर्शतश्च मृद्वी पृथ्वी तादृशीं एव पृथ्वीं प्रति प्रायोऽशस्त्रभूता । वर्णाद्यन्यतरवैसादृश्ये तु स्वकायशस्त्रत्वं तस्यास्तां प्रति भवत्येव। यथा वर्णादिना समानाऽपि मृद्वी पृथ्वी कठिनपृथ्वीं प्रति शस्त्रं भवति... एवमन्यत्रापि विभावनीयम्। तथा च स्वकायशस्त्रत्वं वर्णाद्यन्यतरवैसादृश्ये एव व्यवहर्त्तव्यमिति निष्कर्षः ।

## ( २७ ) बालस्त्वत्र अष्टवर्षादारभ्य यावत्पञ्चविंशतिक इति । असावपि बाल इव बालः, अपरिणतत्वेन रागान्धत्वात् । ( ओ.नि. १८ )

**चन्द्र.** मार्गपृच्छा कस्य कर्त्तव्या, कस्य वा न कर्त्तव्या इति विमर्शे बालस्य मार्गपृच्छा निषिद्धा, तत्र च बालः पञ्चविंशतिकपर्यन्तो गृहीतः, ततश्च भवत्येवेयमाशङ्का यदुत सम्प्राप्तयौवनोऽप्ययं कथं 'बाल' इति व्यपदिश्यते इति । तदुत्तरदानाय "असावपि...." इत्याद्युक्तम् ।

इत्थं च न सर्वत्र शब्दस्यैक एवार्थो भवति, किन्तु पूर्वापरविचारणाधीनानेकार्थकः स भवति । अत एव सूत्रसम्बद्धशब्दार्थमात्रग्राहित्वमुन्मार्गवाहकं, परमार्थावबोधा-सम्भवात्, विपरीतबोधेनानर्थशतसम्पातसम्भवाच्च । तस्मात् न सूत्रार्थमात्रपरायणैः स्थेयम्, अपि तु निर्युक्तिभाष्यचूर्णिवृत्त्यनुगतार्थानुसारिभिर्भाव्यम् ।

न च निर्युक्त्यादिकर्तॄणां छद्मस्थत्वान्न तद्वचनं श्रद्धेयमिति शङ्क्यम्, भवदीयैतद्वचनस्यैव छद्मस्थवचनत्वेनानुपादेयत्वप्रसङ्गात्, भवतां छद्मस्थत्वस्य भवताऽपि स्वीकृतत्वात् ।

**ननु** छद्मस्थोऽप्यहं पदार्थं सम्यग्ज्ञात्वैव सोपयोगं वक्ष्ये, इति न मद्वचनमनुपादेयमिति **चेत्**, तर्हि किं ते निर्युक्त्यादिकर्तारः पदार्थं सम्यगज्ञात्वैव यथा तथा वदन्ति ? येन तद्वचनमश्रद्धेयं स्यात् । तस्मात् न छद्मस्थत्वादिना वचनस्य अनुपादेयत्वं शङ्क्यम्, किन्तु सोपयोगं संविग्नगीतार्थोक्तत्वेन वचनस्योपादेयता ग्राह्या । सा च निर्युक्त्यादिवचनेऽक्षतैव । किं बहुना ? निर्युक्त्याद्यपलापिनां सूत्रार्थमात्रनिबद्धकदाग्रहाणां निह्नवसदृशत्वमनपायम्, ततश्च अनन्तसंसारित्वमपि न दुर्लभमिति अधिकमग्रे वक्ष्यते ।

**( २८ ) तत्र शुष्केन पथा गमनमभ्यनुज्ञातमासीत्, तेनापि न गन्तव्यं यद्यसौ धूलीबहुलो भवति मार्गः किं कारणं ? यतो धूलीबहुलेनापि पथा गच्छतस्त एव दोषाः, के च ते ? संयमविराधना आत्मविराधना च । तत्रात्मविराधना अक्ष्णोर्धूलिः प्रविशति, निमज्जन्श्रान्तश्च भवति, उपकरणं च मलिनीभवति, तत्र यद्युपकरणप्रक्षालनं करोत्यसामाचारी, अथ न क्षालयति प्रवचनहीलना स्यात् । ( ओ.नि. २४ )**

**चन्द्र.** आत्मविराधना नाम धर्मसाधनीभूतसाधुशरीरविराधना, धूलिश्रमादिभिः शरीरस्यैव विराधनाया इष्टत्वात् ।

**ननु** उपधिप्रक्षालने काऽसामाचारी इति **चेत्** साधुना प्रतिवर्षं वर्षाकालादर्वाक् सकृदेव उपधिप्रक्षालनं कर्त्तव्यमिति हि सामाचारी, अन्यदोपधिप्रक्षालने तत्सामाचारीभङ्गादसामाचारीति ।

**अथ** असामाचारीप्रवचनहीलनयोर्मध्ये को महान् दोषः ? अन्यतरावश्यम्भावे च किं कर्त्तव्यम् ? किमसामाचारीं स्वीकृत्य शासनहीलना परित्याज्या ? किं वा शासनहीलनामुपेक्ष्य असामाचारी परिहर्त्तव्या इति **चेत्**

किमत्र प्रष्टव्यम् ? शासनहीलनाया महद्दोषत्वस्य जिनमतेऽत्यन्तं प्रसिद्धत्वात् केनाऽपि प्रकारेण सा निवार्या, तदर्थं च यद्यसामाचारी अवर्जनीयकर्त्तव्यताका भवेत्, तदा साऽपि आदरणीयेति ।

शासनमालिन्यस्य महद्दोषत्वं त्वष्टकप्रकरणगाथाभिरवसेयम् । तथाहि

→ य शासनस्य मालिन्येऽनाभोगेनापि वर्तते, स तन्मिथ्या-त्वहेतुत्वादन्येषां प्राणिनां ध्रुवम् ।

बध्नात्यपि तदेवालं परं संसारकारणम् ।

विपाकदारुणं घोरं सर्वानर्थनिबन्धनम् ← इत्यादि ।

## ( २९ ) महिका-धूमिकारूपोऽप्कायः । ( ओ.नि.३० )

**चन्द्र.** 'धूम्मस' इति गुर्जरभाषाप्रसिद्धनामकस्य प्रस्तुताप्कायस्य सङ्क्षेपतः स्वरूपमिदम् । परिपक्वानि जीमूतानि वर्षा वर्षन्ति, अपरिपक्वानि तु तानि यदा स्फुटन्ति, तदा तद्गर्भात्मकः सूक्ष्मोऽप्कायः प्रादुर्भवति, स एव धूम्मसापरनामिका महिका । इयं च महिका प्रायः शीतकालभाविनी, तथाऽपि तथाविधक्षेत्रादिवशतः ग्रीष्मवर्षाकालभाविन्यपि, ततश्च "महिका मार्गशीर्षादिचतुर्मासमात्रभाविनी, नान्यदा" इति न मन्तव्यम् ।

सा च यत्र भवति, तत्र चतसृष्वपि दिक्षु उपरि च सर्वत्र दृश्यते, न तु एकादिदिश्येव ।

तथा इयं अन्तरिक्षजोऽप्कायः, न तु भौमः, ततश्च भूमिस्थिततडाग-वनस्पतिप्रभृतिभ्य उत्तिष्ठन् श्वेतवर्णो वायुरूपेण दृश्यमानः पुद्गलपरिणामविशेषः 'बाफ'इत्यपरनामा न धूमिकेति विवेचनीयम् ।

तथेयं धूमिका सर्वत्र गच्छन्तीव प्रसरन्तीव प्रविशन्तीव दृश्यते ।

अस्यां च सत्यां वसत्यादिकं सर्वमप्कायभावितं भवति, ततश्च तदा आगमननिर्गमनस्वाध्यायादिकं सर्वं वर्जनीयम् । उपाश्रयस्य सर्वाभ्यन्तरस्थाने सर्वत्र कुड्यपरिक्षिप्ते सकल्पां कम्बलिकामावृत्य स्थिरैः भवितव्यम् । अक्षिनिमेषादिकमपि तत्र न कर्त्तव्यम् । केवलं मनसि चिन्तनादिके तु क्रियमाणे न दोषः । तद्विघटनानन्तरं च स्वाध्यायादिकं सर्वं क्रियताम्, न दोषः । कारणवशाद् गमनादिकं यद्यवश्यं कर्त्तव्यं स्यात्, तर्हि यथाशक्यं यतना कर्त्तव्या, येन विराधनाऽल्पा भवेत् । अस्याश्च प्रभूतासङ्ख्येयजीवात्मकत्वात् तद्विराधनापरिहारे न लेशतोऽपि प्रमादः कर्त्तव्यः, सर्वथा विराधनापरिहारोपायपरायणैर्भवितव्यमित्यधिकं बहुश्रुतसकाशाद् विज्ञेयमिति ।

## ( ३० ) उदकसङ्घट्टनं जङ्घार्धप्रमाणम् ( ओ.नि. ३३ )

**चन्द्र.** अत्र जङ्घा पादतलादारभ्य जानुं यावत्शरीरावयवः, तदर्धप्रमाणं च उदकसङ्घट्टनम् । यद्यपि जानोराभ्य कटिं यावच्छरीरावयवः जङ्घापदेन प्रसिद्धः, तथाऽपि

स अर्थो न ग्राह्यः अनुपपद्यमानत्वात् । तथा हि सङ्घट्टजले 'एगं पायं जले किच्चा' इत्यादिना नद्युत्तरणं निगदितम्, स च विधिः प्रसिद्धजङ्घार्थग्रहणे न सम्भवति, यतः तादृशे जले एकस्य पादस्य जलादुपरिकरणं दुःशकं, पृष्ठतः पतनसम्भवात् । न चैतादृशात्मविराधना यत्र भवति, तादृशो विधिर्जिनकथितः सम्भवतीति पूर्वोक्तमेव जङ्घार्धस्वरूपमवगन्तव्यमिति । अत्र स्थापना 


**( ३१ ) इदानीं जङ्घार्द्धप्रमाणं जलमुत्तरतो यो विधिः, स उच्यते - एकः पादो जले कर्त्तव्योऽन्यः स्थले – आकाशे । अथ तीरप्राप्तस्य विधिमाह – निप्पगलणत्ति, एकः पादो जले द्वितीयश्च आकाशे निष्प्रगलन्नास्ते । ततः शुष्कः स्थले क्रियते, पुनर्द्वितीयमपि पादं निष्प्रगलं कृत्वा ततस्तीरे कायोत्सर्गं करोति । ( ओ.नि. ३४ )**

**चन्द्र.** यद्यप्येष विधिः स्पष्ट एव, तथाऽपि अत्र केषाञ्चिद्व्यामोहोऽप्यस्ति, ततस्तन्निराकरणार्थं किञ्चिदुच्यते । तत्र प्रथमं तावन्व्यामोहस्वरूपमेव प्रतिपाद्यते ।

तथाहि एकं पादं जले कृत्वाऽन्यं पादमाकाशे कृत्वा स पादो निष्प्रगलितव्यः, स च पादः निष्प्रगलनेन यदा शुष्को भवति, तदा स पादो जले कर्त्तव्यः, पश्चातनपादश्च आकाशे कर्त्तव्यः, स चापि निष्प्रगलितव्यः, स चापि निष्प्रगलनेन यदा शुष्को भवति, तदा सोऽपि जले कर्त्तव्य इत्येवंविधिना नद्युतरणं कार्यमिति ।

नन्वेष एव विधिः शोभनः, कोऽत्र व्यामोह इति **चेत्** श्रूयताम् । प्रथमं तावत् एष पाठ एवैतद्विधिं व्यामोहरूपं सूचयति । यतो हि अत्र पाठे 'अथ तीरप्राप्तस्य विधिमाह....' इत्युक्त्वैव निप्रगलनं आदिष्टम्, न तु अतीरप्राप्तस्य जलमध्यवर्तिनः, ततश्च जलमध्यवर्तिनो निष्प्रगलनप्रतिपादनपरो भवदुक्तो विधिः स्फुटमेव शास्त्रबाधितः ।

अधुना युक्तिर्विचार्यते ।

जलमध्य एव आकाशे पादं कृत्वा यदि तन्निष्प्रगलनं क्रियेत, तर्हि चिरकालं यावत् पादः आकाशे स्थिरं धारणीयो भवेत्, एतच्च जलप्रवाहे एकपादावष्टम्भेन स्थानं सर्वथा आत्मविराधनाकारीति न कथञ्चिदपि इष्टं भवेत् ।

तथा एवंविधरीत्या नद्युतरणे निष्प्रगलनरहितोत्तरणविधिकालसकाशादती-वाधिककालो भवेत्, ततश्चातीवदीर्घकालं जलसंस्पर्शादिजन्या विराधना भवेत्, सा चायव्ययालोचनाकारिणा मुनिना कथं आदरणीया स्यात् ?

यदि हि जले प्रतिपदं निष्प्रगलनं युक्तं स्यात्, तर्हि सचित्तपृथिव्यामपि प्रतिपदं प्रमार्जनं युक्तं स्यात्, न च तत्र तथाप्रतिपादितम् । प्रत्युत सचित्तपृथिव्यां प्रतिपदमप्रमार्जनस्यैव विराधनाहानिकरत्वमधस्तान्निगदितमिति जलेऽपि निष्प्रगलनाऽभावस्यैव विराधनाहानिकरत्वमवश्यं मन्तव्यमिति ।

तथा यदा नद्यां नावा उत्तरणं कर्त्तव्यं भवेत्, तदा प्रथमं अधुनैव जलसम्पृक्ता जलभाविता या नौः, सा उपादेयत्वेन निगदिता, तत्र कारणं त्विदमेव यदुत जलभावितजलसम्पृक्तनौसकाशान्नदीजलजीवविराधनाऽल्पा, नदीजलस्य नावा सह सम्पर्कः नौलग्नजलान्तरित इति कृत्वा । यथा हि साक्षात् शरीरे क्रियमाणोऽसिप्रहारः शरीरस्य बहुविराधनाकारी, प्रभूतस्थूलवस्त्रावृतशरीरे क्रियमाणोऽसिप्रहारस्तु अल्पविराधनाकारीत्येवं जलसम्पृक्तनावः नदीजलस्य च मध्ये नौसंलग्नजलांशस्य नदीजलविराधनाऽल्पताप्रयोजकत्वं न दुर्घटम् ।

यथा चैवं शुष्कनौसकाशात् आर्द्रनौः जलविराधनाऽल्पताकारिणी, तथैव शुष्कपादसकाशात् आर्द्रपादः जलविराधनाऽल्पताकारीति पादनिष्प्रगलनेन तच्छुष्कताकरणं तु विराधनाबाहुल्य-कारित्वादनिष्टमेव स्यादिति स्पष्टम् ।

तदेवं जले एव निष्प्रगलनविधिरात्मसंयमविराधनाकारित्वेनानुपादेय इति ।

**ननु** तर्हि तीरे निष्प्रगलनं किमर्थं ? इति **चेत्** यदा पादः जलाद्भूमौ स्थापनीयः, तदा भूमिर्जलस्य परकायशस्त्ररूपेति पादलग्नं सर्वं जलं जलमध्ये एव निष्प्रगलनीयम्, येन भूमेः सकाशात्तद्विराधना न भवेत् । जलमध्ये निष्प्रगलज्जलं बहुसदृशजले एव निपतत् न विराधनाविषयं भवेत् । एवं द्वितीयपादस्यापि बोद्धव्यम् । इत्थं च अस्थण्डिलात्स्थण्डिलसङ्क्रमणे पादप्रमार्जनविधौ या युक्तिः, सैवात्र लगनीयेति निरर्गलोऽयं विराधनापरिहारप्रकार इत्यधिकं बहुश्रुतसकाशादवसेयमिति ।

## ( ३२ ) अचेतयति सति तस्मिन् गन्तरि बोधनं जाग्रापणं गीतार्थः करोति । ( ओ.नि. १० )

**चन्द्र.** यः साधुर्गुर्वादेशेन प्रातःकाले विहरेत्, तस्य प्रातःकाले जाग्रापणं गीतार्थः करोति, नान्यः, गीतार्थश्चात्र जघन्यतोऽपि जाग्रापणविधिज्ञो बोध्यः ।

**ननु** किमर्थमगीतार्थस्तस्य साधोः जाग्रापणं न करोतीति **चेत्** विध्यज्ञानाद् अविधिकरणे प्रत्यपायसम्भवात् । तथाहि अगीतार्थः 'हे साधो ! उत्तिष्ठत उत्तिष्ठत, विहारसमयोऽभूत्' इत्येवं महत्ता रवेण दूरत आसन्नतो वा भाषते, ततश्च रात्रौ सुप्ता कर्षकलोहकारादयः श्वादयश्च तद्रवेण जागृताः सन्तः स्वस्वपापकर्मणि प्रवर्तन्ते, तद्दोषश्चागीतार्थरवप्रत्ययिक एवेति स एवात्र दोषवान् भवतीति ।

एवमगीतार्थः तं साधुं सम्भ्रमेण जाग्रापयति, ततश्च सम्भ्रमदर्शनत उत्थितः स साधुर्बिभेति, यथा 'किमभूत्' इति । एवं कश्चिदगीतार्थः स्वपादादिना साधोः जाग्रापणं करोति, एतच्चाविनय एव । तदेवमादिदोषतोऽगीतार्थस्य साधुजाग्रापणेऽनधिकार इति बोध्यम् ।

## ( ३३ ) अथाद्यापि स्वपिति ( गुरुः ) ततः संघट्टना चाचार्यपादयोः शिरसा घट्टना-चलनं क्रियते, अथासौ प्रतिबुद्ध एव, किन्तु निश्चलो निषण्णः उपविष्टो ध्यायी चास्ते, ततस्तमेवंभूतं निश्चलनिषण्णध्यायिनं दृष्ट्वा किं कर्त्तव्यमित्याह स्थातव्यम्, तेन गुरुध्यानव्याघातेन महाहानिसम्भवात् । ( ओ.नि. १० )

**चन्द्र.** प्रातःकाले जिगमिषुः स साधुः गुरुसकाशे आगत्य वन्दित्वा च निर्गच्छति, परन्तु यदि आचार्यस्तस्मिन्काले स्वपिति, तर्हि किं कर्त्तव्यमिति प्रश्ने सत्याह → साधुः शिरसा गुरुपादौ सङ्घटयति, येन गुरोरवबोधः स्यात्, येन वन्दित्वा स शीघ्रं निर्गच्छेत् ।

विलम्बकरणमत्र नोचितमिति कृत्वा गुरुनिद्राव्याघातकरणेऽपि न कश्चिद् दोषः ।

**ननु** यदि विलम्बकरणे दोषः, तर्हि ध्यायिनं गुरुं दृष्ट्वा किं विलम्बकरणस्योपदेशो दत्तः? इति जिज्ञासायामाह **तेन गुरुध्यानव्याघातेन महाहानिसम्भवादिति ।**

अयं भावः गुरुः कदाचिदतीवसूक्ष्मार्थपर्यालोचनं करोति, कदाचिच्छासनोद्गतापन्निवारणोपायं चिन्तयति, कदाचिदपूर्वभावसन्तानं सन्धत्ते । तत्रातीवसूक्ष्मार्थपर्यालोचनात् अस्पष्टपूर्वाः पदार्थाः स्पष्टीभवन्ति, आपन्निवारणोपायमीलनात्सङ्घादिर्महदापन्महोदधिमुत्तरति, अपूर्वभावाच्च गुरुः स्वयमेवावध्याद्यतिशयज्ञानं प्राप्नोति । परन्तु यदि तत्रान्तरैव साधुः 'मत्थएणवंदामि' इति वदेत्, शिरसा हस्तेन वा गुरुं संस्पृशेत्, तर्हि धारालग्नं ध्यानं अन्तरैव विघटेत, ततश्च अस्पष्टपदार्थस्पष्टीभवनापदुत्तरणोपायातिशयज्ञानलाभादयो लाभा न भवेयुरित्येषैव महाहानिः ।

अत्र हि गुरोर्द्रव्यनिद्राव्याघातस्यानुमतत्वात् ध्यानव्याघातस्याननुमतत्वाच्च स्फुटमेव ज्ञायते यदुत गुरुध्यानं गुरुद्रव्यसुखाच्छ्रेयः । अत एवानुकूलगोचरीप्रभृति-कार्यार्थमपि ध्यानस्थस्य गुरोः विक्षेपो न कर्त्तव्यः, अनुकूलगोचरीजन्यलाभस्य ध्यानजन्यलाभादतिलघीयस्त्वात् ।

## ( ३४ ) अप्रलम्बं कल्पं कुर्वतोऽचेतनयतना ( ओ.नि. ४१ )

**चन्द्र.** यदि हि कल्पं प्रलम्बमानं कुर्यात्, तर्हि परिस्पन्दता तेनाचित्तवायूत्पत्तिः स्यात्, तेन च परम्परया सचित्तवायुविराधनाऽपि स्यात्, परन्तु कल्पं अप्रलम्बं कुर्वता साधुनाऽचित्तवायूत्पत्तिर्निरुद्धा भवति, ततश्च विराधनाऽपि हीयते । एवंरीत्याऽचेतनयतनाऽत्र बोध्या ।

**( ३५ ) आह - यदा व्याघ्रदुस्तटीन्यायेनान्यतरविराधनामन्तरेण प्रवृत्तिरेव घटां न प्राञ्चति, तदा किं कर्त्तव्यमित्याह - सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा । मुच्चइ अइवायाओ पुणो विसोही न याविरई ॥ ( ओ.नि. ४७ )**

**चन्द्र.** संयमविराधनामात्मविराधनां च परित्यज्य सर्वत्र गमनादिकं कर्त्तव्यमिति पूर्वं विस्तरतो निरूपितम् । तत्र कश्चित्प्रश्नयति - यदा संयमविराधनात्मविराधनयोर्मध्येऽन्यतराऽवश्यम्भाविनी स्यात्, तदा किं कर्त्तव्यम् ? किं संयमविराधनां परित्यज्यात्मविराधना स्वीकरणीया ? किं वाऽऽत्मविराधनां परित्यज्य संयमविराधना स्वीकरणीया ? इति ।

प्रश्नकर्तुर्गूढाभिप्रायस्त्वेवम् → स्वशरीररक्षां तु सर्वे कुर्वन्ति, तत्र न कोऽपि धर्मः, यदा तु स्वविराधनयाऽपि षट्कायरक्षा क्रियेत, तदैव महान्धर्मः । परोपकारैकरसिकानां संयतानां तु एष विशेषतो धर्मः, यदि हि तेऽपि स्वशरीररक्षार्थं षट्कायविराधनां स्वीकुर्युः, तदा को भेदस्तेषां संसारिणां च मध्ये ? तस्मादुभयोर्मध्ये संयमविराधनैव गरियसी, नात्मविराधना ← इति ।

अत्र चतुर्दशपूर्वधराः ऐदम्पर्यार्थावलोकिनः श्रुतमात्रागम्यचिन्ताभावनाज्ञानगम्यतत्त्वावबोधवन्तः श्री भद्रबाहुस्वामिनः प्राहुः **सव्वत्थ** इत्यादि । सर्वस्मिन्नपि कार्ये षट्कायरक्षात्मकं संयममेव रक्षेदित्युत्सर्गः । यदा तु तद्रक्षायामात्मविराधना-ऽवश्यम्भाविनी, तदा संयमं परित्यज्यापि आत्मानमेव रक्षेत् । तत्र कारणं तु इदमेव यत् आत्मानं रक्षन् स षट्कायविराधनायाः प्रायश्चित्तं कृत्वा विशुद्धिं प्राप्स्यति, यदि च षड्जीवनिकायं रक्षन् आत्मानं व्यापादयेत्, तर्हि स देवलोकादौ गतोऽविरतिं प्राप्नुयात्, तत्र च षट्कायविरतिर्दूरापास्तैवेति लाभमिच्छतो हानिरायाता । तस्मात् षट्कायविराधनामनन्यगत्या स्वीकृत्याऽपि षट्कायाद्यर्थमेवात्मानं रक्षेन्मुनिरिति प्रकृतगाथोत्तरार्धार्थः ।

वस्तुतस्तु साऽऽत्मरक्षा षट्कायरक्षैव, तत्कारणत्वात्, ततश्च निश्चयतः षट्कायरक्षापरिणामस्य अनाबाधात् प्राणातिपात एव न, येन प्रायश्चित्तसकाशात्तच्छुद्धिः कर्त्तव्या स्यात् । प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा इति हि प्राणातिपातलक्षणम्, अत्र तु अप्रमत्ततयैव प्राणव्यपरोपणान्न हिंसा, तदभावे च तत्प्रायश्चित्तमपि नास्त्येवेति सर्वथा

निर्दोष एवायं मार्गः ।

केवलमपवादस्य मोक्षमार्गत्वेऽपि हीनाचारस्थानतया संविग्नाध्यवसायनिवृत्तिः सुसम्भवेति कारणविलयेऽप्यपवादप्रीतिः माऽभूदिति कारणाभावेऽपवादस्य वर्ज्यत्वख्यात्यर्थमपि प्रायश्चित्तदानं सर्वज्ञाऽऽदिष्टमिति ।

तथा यतोऽपवादे इन्द्रियमनोऽनुकूलप्रवृत्तिः प्रायेण भवति, ततस्तत्र सूक्ष्मरागादिदोषसम्भूतिः सुशक्येति तच्छुद्ध्यर्थमपि प्रायश्चित्तव्यवहारः ।

ये तु 'गृहस्थसादृश्यं साधूनां भवेत्' इति उक्तवन्तः, ते हि परिणतिभेदमनालोकितवन्तः, गृहस्था हि शरीररागाच्छरीररक्षां कुर्वन्ति, षट्कार्यांश्च घ्नन्ति, साधवस्तु षट्कायरक्षार्थं षट्कायान् अपवादतो घ्नन्ति, ततश्च महान् परिणतिभेदः, अत एव तेषां हिंसायामपि निर्जरा निरूपिता, यदुक्तं पिंडनिर्युक्तौ

**"जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।**

**सा होइ निज्जरफला अज्झत्थविसोहिजुत्तस्स"** इति ।

**ननु** धर्मरुचिमुनिना 'मा विषभूतान्नसकाशात्कीटिकादयो म्रियेरन्' इति बुद्ध्या स्वयमेव तद्भुक्तम्, जीवितं च त्यक्तम् । स च जिनशासनेऽनुमोदितः । ततश्च प्रकृतदृष्टान्तबलादेतदेव सिद्ध्यति यदुत षट्कायरक्षार्थं स्वात्मव्यपरोपणं न्याय्यमिति । किञ्च जिनकल्पिकादयः जीवितहारिविघ्नोपस्थितावपि नापवादेनापि षट्कायान् हन्तुं प्रवर्तन्त इति उत्सर्गमार्गस्तावदयमेव यत् आत्मविराधनासकाशात्संयमविराधना बलीयसी, ततश्च संयमरक्षार्थमात्माऽपि व्यपरोपयितव्य इति । उत्सर्गासहत्वे तु अपवादत आत्मरक्षां कृत्वा संयमो विराधनीय इति **चेत्**

न, एवं हि उत्सर्गतः षट्कायरक्षैव कर्त्तव्या, न तां परित्यज्यात्मरक्षेत्यापन्नम्, तथा सति जिनकल्पिकादीनां पादपोपगमनमेव कर्त्तव्यं स्यात्, न गोचरीविहारादिका चर्या, यतो हि गोचरीविहारादिका चर्याऽऽत्मरक्षोपयोगिनी, परन्तु तत्र वायुकायादिविराधनाऽवश्यम्भाविनी, ततश्च तद्रक्षार्थं तां आत्मरक्षोपयोगिनीं चर्यां परित्यज्य पादपोपगमनमेवानशनं कर्त्तव्यं स्यात् ।

किञ्च जिनकल्पिकाः चतुर्थप्रहरादारभ्य पदमात्रमपि न गच्छन्ति, ततश्च तत्काले यदि ते नदीमध्ये भवेयुः, तदाऽपि ते नदीं नोत्तरेयुः, एवं कश्चित्तान् वनस्पत्यादिषु प्रक्षिपेत्, तदाऽपि ते तस्मादुत्थायाचित्तभूमौ नागच्छेयुः । अत्र हि षट्कायविराधनाऽतिप्रभूता, तन्निवारणं च नद्युत्तरणाचित्तागमनादिना सुकरमपि ते न कुर्वन्तीति तेषां यः कोऽप्याचारः, स

तथाकल्पत्वादेवेत्यवश्यं मन्तव्यम् । न तु 'जीवरक्षार्थं तैर्हि प्राणास्त्यक्ता' इत्यादि हेतुहेतुमद्भावो लगयितव्यः । तथाकल्पश्च तेषां परमविशुद्धिकारकत्वा-न्निर्दोष एव ।

यत्तु धर्मरुचिदृष्टान्तेनात्मरक्षां परित्यज्यापि षट्कायरक्षा साधनीयेति प्रसाधितं, तदपि मन्दम् । दृष्टान्तस्य सिद्धान्तासाधकत्वात् । दृष्टान्तो हि व्यक्तिविषयकः, सिद्धान्तस्तु समष्टिविषयक इति व्यक्तिगतविधिना समष्टिगतविधिप्रसाधनं न युक्तमिति भावः । यदि हि दृष्टान्तेन सिद्धान्तः प्रसाध्यते, तर्हि गणधारी गौतमस्वामी यावज्जीवं षष्ठं कृतवान्, स्वयमेव च गौचरीं गतवानिति तद्दृष्टान्तेन सर्वैरपि आचार्यैर्यावज्जीवं षष्ठमवश्यं करणीयम्, गोचरीचर्या चावश्यमादरणीया स्यात् । तथा सुनक्षत्रसर्वानुभूतिभ्यां भगवदनुरागवशाभ्यां भगवन्निषेधेऽपि सति गोशालकप्रतीकारः कृतः, भस्मसाच्च भूतौ इति दृष्टान्तबलेन सर्वैरपि साधुभिस्तथा करणीयं स्यात् । न च तौ न प्रशस्तौ इति शङ्कनीयम् । **आयरियभत्तीरागो कस्स सुनक्खत्तमहरिसीसरिसो । अवि य सरीरं चत्तं न चेव गुरुपरिभवो सहिओ** इत्युपदेशमालायां तत्प्रशंसायाः स्पष्टमेवोक्तत्वात् ।

वस्तुतस्तु स्थविरकल्पे 'षट्कायरक्षां परित्यज्यापि आत्मरक्षा विरतिरक्षणार्थं करणीया' इत्येवोत्सर्गमार्गः, तथाविधपरिणतिवशात् धर्मरुचिसदृशैः आत्मरक्षां परित्यज्यापि षट्कायरक्षा क्रियते, शास्त्रे चानुमोद्यते तदेतत्सर्वं अपवादमार्ग इति विपरीतमेव तत्त्वम् । जिनकल्पिकादीनां तु स्वकल्पानुसारेणैव प्रवृत्तत्वात् तत्रोत्सर्गापवादविचारावसर एव नेति सर्वं सुस्थम् ।

अत्र बहु वक्तव्यमस्ति, तत्तु विस्तरभिया नोच्यते ।

## ( ३६ ) सर्व एव ये त्रैलोक्योदरविवर्तिनो भावा रागद्वेषमोहात्मनां पुंसां संसारहेतवो भवन्ति, त एव रागादिरहितानां श्रद्धामतामज्ञानपरिहारेण मोक्षहेतवो भवन्तीति । ( ओ.नि. ५४ )

**चन्द्र.** स्पष्टमेव । इदमेवोक्तमाचाराङ्गे "जे आसवा ते परिसवा, जे परिसवा ते आसवा" इति । यावन्ति कर्मबन्धकारणत्वेन प्रसिद्धानि वस्तूनि, तानि सर्वाणि

शुभपरिणामवन्तमाश्रित्य कर्मनिर्जराकारणानि भवन्ति, यावन्ति च कर्मक्षयकारणत्वेन प्रसिद्धानि वस्तूनि, तानि सर्वाणि अशुभपरिणामवन्तमाश्रित्य कर्मबन्धकारणानीति बाह्यवस्तुनि एकान्ताश्रयणं जिनशासनपरिज्ञानराहित्यावेदकमेव । इत्थं च सुदेवसुगुरुसुधर्मसकाशात् बहूनां आत्मोन्नतावपि केषाञ्चिदात्मावनतिरपि न निषेद्धुं शक्या, तत्र सुदेवाद् गोशालकस्य, सुगुरोः कूलवालकस्य, सुधर्माच्च बाह्यशोभन-क्रियारूपात् विनयरत्नादीनामात्मावनतिः सुप्रतीतैव ।

एवं कुदेवकुगुरुकुधर्मसकाशात् बहूनामात्मावनतावपि केषाञ्चिदात्मोन्नतिरपि न निषेद्धुं शक्या । तत्र कुदेवादात्मोन्नतिः 'मन्ये वरं हरिहरादय एव दृष्टा, दृष्टेषु येषु हृदयं त्वयि तोषमेति' इति मानतुंगसूरिवचनात् सूपपादा । कुगुरोश्चात्मोन्नतिः अङ्गारमर्दकेनाभव्येन तच्छिष्याणामिव, कुधर्माच्च बाह्याशुभक्रियारूपात् शुद्धापवादप्रतिसेविकालिका-चार्यादीनामिवेति ।

यथा च सम्यग्दृष्टिपरिगृहीतं मिथ्याश्रुतमपि सम्यक्श्रुतकार्यकारित्वात्सम्यक्श्रुतम्, तथैव सम्यग्दृष्टिपरिगृहीतं कुदेवकुगुरु-कुधर्माद्यपि सुदेवादिकार्यकारित्वादुपचारात् सुदेवादि इति सूक्ष्ममीक्षणीयम् ।

अधिकं तु अग्रे स्फुटीभविष्यति । केवलं निश्चयनयाभिप्रायवैशद्यार्थिना ओघनिर्युक्तिगाथा ४७ आरभ्य ५८ पर्यन्ताः सूक्ष्मप्रज्ञया परिभावनीयाः, व्यवहारनयैदम्पर्यार्थिना च ५९-६० द्वे गाथे निरूपयितव्य इति ।

## ( ३७ ) अणुमित्तो वि न कस्सइ बंधो परवत्थुपच्चया भणिओ... ( ओ.नि. ५८ )

**चन्द्र.** कस्यचिदपि जीवस्य स्वल्पोऽपि कर्मबन्धो बाह्यवस्तुनिमित्तान्न भवति, किन्त्वात्मपरिणामादेवेति अत्र वृत्तिकृदभिप्रायः । युक्तञ्चैतत् । मिथ्यात्वाविरतिकषाया-दीनां कर्मबन्धप्रधानकारणानामात्मपरिणामविशेषत्वानपायात् । बाह्यक्रियादिरूपं मिथ्यात्वादिस्वरूपं तु औपचारिकमिति ।

**ननु** यदि आत्मपरिणामादेव कर्मबन्धः, तर्हि सकलप्रायश्चित्तादिव्यवहारे विरोधापत्तिः स्यात् । तथा हि – हिंसादिजन्यपापकर्मापगमाय प्रायश्चित्तं क्रियते इति तत्त्वम् । पापकर्म च भवदुक्तनीत्यात्मपरिणामादेव, न तु बाह्यनिमिताद्, एवञ्च सति बाह्यमहन्निमित्तसत्त्वेऽपि परिणाममान्द्यादल्पकर्मबन्धेनाल्पं प्रायश्चित्तम्, तुच्छबाह्यनिमित्तेऽपि च क्वचित्परिणामतीव्रतया सुबहुकर्मोपचयेनातिमहत्प्रायश्चित्तं दातव्यं स्यात् । किन्तु प्रवृत्तिप्रेक्षिव्यवहारनयप्रधानः प्रायश्चित्तव्यवहारश्च विपरीतोऽपि दृश्यत इति स्पष्टं विरोधः परस्परमिति **चेत्**

न, यद्यपि कर्मबन्ध आत्मपरिणामानुसारेणैव, तथाऽपि आत्मपरिणामस्यानतिशयज्ञानिना जीतव्यवहारिणा स्पष्टं अज्ञायमानत्वात् आत्मपरिणाममात्रेण प्रायश्चित्तव्यवहारो दुःशक एव । तस्मात् तत्र व्यवहारनयाश्रयणं क्रियते ।

तत्र च लघुप्रतिसेवायामशुभपरिणामस्य प्रायो मन्दत्वात् महत्तरप्रतिसेवायाञ्चाशुभभावस्य प्रायस्तीव्रत्वात् तदनुसारेणाल्पमधिकञ्च प्रायश्चित्तं दीयते । यद्यपि च भवदुक्तप्रकारेणात्र परिणामवैपरीत्यमपि भवत्येव, तथाऽपि तस्य प्रायोभावित्वात्, तज्ज्ञानस्य च दुःशकत्वात् यथामहत्प्रतिसेवनमेव प्रायश्चित्तदानव्यवहार इति ।

न चैवं सर्वथा व्यवहारप्राधान्यमेवात्रेत्यपि शङ्कनीयम्, निश्चयनयस्याप्याश्रयणात् । तथा हि - गीतार्था देशं कालं पुरुषमवस्थां आत्मपरिणामादींश्च प्रत्यक्षं दृष्ट्वा पृच्छादिनाऽनुमाय च तदनुसारेण हीनाधिकमपि प्रायश्चित्तं ददति, तत्र परिणामतीव्रताऽनुमाने बाह्यविराधनाऽल्पत्वेऽपि अधिकं प्रायश्चित्तं ददति, तन्मन्दताऽनुमाने च बाह्यविराधनाबाहुल्येऽपि अल्पं प्रायश्चित्तं ददति, शुद्धापवादानुमाने च बाह्यविराधनाबाहुल्येऽपि न किमपि प्रायश्चित्तं ददतीत्यत्रात्मपरिणाममेव पुरस्कृत्य प्रायश्चित्तदानं क्रियते । केवलमात्मपरिणामः अनतिशयज्ञानिभिरनुमानगम्य एवेति ।

यद्यप्येवं प्रायश्चित्तस्यानेकविधत्वम्, तथाऽपि कर्मबन्धस्तु आत्मपरिणामाधीन एव, यत्तु कुत्रचिदागमादिषु बाह्यवस्तुप्राधान्येन कर्मबन्धो निरुप्यते, तद् व्यवहारतो बाहुल्यमपेक्ष्य बोध्यम्, न तु सर्वथा परमार्थतः ।

न चैवं बाह्यवस्तुनः सर्वथाऽकिञ्चित्करत्वमेव, व्यवहारस्य निश्चयजन्यत्वेन निश्चयजनकत्वेन चात्यन्तमादरणीयत्वादिति सूक्ष्ममीक्षणीयम् ।

## ( ३८ ) कदाचित्तत्र संखडी भवति, ततश्च भक्तं गृहीत्वा व्रजतः कालक्षेपो न भवति, शीघ्रं चाभीष्टं ग्रामं प्राप्नोति । ( ओ.नि. ६४ )

**चन्द्र.** तत्र = अन्तरालवर्तिनि ग्रामे । शेषं स्पष्टम् । इदं चापवादिकं वचनं, उत्सर्गतः संखडीभक्तस्य बहुदोषत्वेन निषिद्धत्वात् । दोषाश्चात्र गृद्धिः, स्त्र्यादिस्पर्शः अलङ्कृतस्त्र्यादिदर्शनोद्गतविकारभावः, संघट्टेन भक्तपतने "अहो बहुभक्षका एते" इति अवर्णवादः, बहुभक्तलाभतो बहुभक्षणं ततश्चाजीर्णमित्येवमादयो आगमान्तरात् स्वानुभवाच्चोपयुज्यानुसन्धेया इति ।

## ( ३९ ) कदाचिद्वा तत्र चैत्यायतनं भवेत्, तद्वन्दने पुण्यावाप्तिः स्यात् । ( ओ.नि. ६४ )

**चन्द्र.** ननु अपान्तरालभाविग्रामप्रवेशे के गुणाः इति प्रतिपादने चैत्यायतनवन्दनजन्या पुण्यावाप्तिरपि अत्र गुणतया प्रदर्शिता । एतच्च न युक्तम्, अष्टकप्रकरणे श्रीहरिभद्रसूरिभिः साधोः पुण्यबन्धानिष्टतायाः निगदितत्वात् । तथा चाष्टकपाठः

**सर्वारम्भनिवृत्तस्य मुमुक्षोर्भावितात्मनः ।**
**पुण्यादिपरिहाराय मतं प्रच्छन्नभोजनम् ॥**
**भुञ्जानं वीक्ष्य दीनादिर्याचते क्षुत्प्रपीडितः ।**
**तस्यानुकम्पया दाने पुण्यबन्धः प्रकीर्तितः ॥**
**भवहेतुत्वतश्चायं नेष्यते मुक्तिवादिनाम् ।**
**पुण्यापुण्यक्षयान्मुक्तिरिति शास्त्रे व्यवस्थितम् ॥**

प्रकटं भुञ्जानं साधुं दृष्ट्वा बुभुक्षितः याचते, तत्र च साधुरनुकम्पाप्लावितमानसो यदि भोजनादिकं दद्यात्, तर्हि पुण्यबन्धः तस्य स्यात् । स च संसारकारणमिति

मोक्षार्थिनामनिष्टः, तस्य संसारकारणत्वं च 'पुण्यक्षयात्पापक्षयाच्च मुक्तिः' इति शास्त्रव्यवस्थात एव सिद्धमिति सप्तमाष्टकगाथासङ्क्षेपार्थः । अत्र च पुण्यबन्धः साधूनामनिष्टः, तत्परिहारार्थं च अनुकम्पादाननिषेधः, तदर्थं च प्रच्छन्नभोजनमिति निगदितम् । ततश्च साधूनां पुण्यबन्धो हेयस्तज्जनयित्री प्रवृत्तिरपि च हेयेति स्पष्टम् । प्रकृते च द्रोणवृत्तिवचने पुण्यावाप्तिरुपादेयतया प्रतिपाद्यते इति स्पष्टमेव विरोध इति **चेत्**

न, वचनद्वयस्य विभिन्नविषयत्वात् । तथाहि - अप्रच्छन्नभोजनेन शास्त्रार्थबाधः, ततश्च तत्र यः दानजन्यः पुण्यबन्धो भवति, स निर्जराप्रतिबन्धक इति कृत्वा हेयः, शास्त्रार्थाबाधेन तु यः पुण्यबन्धो भवति, स निर्जराप्रतिबन्धको नेति स उपादेयः । ततश्च द्रोणवृत्तिवचनं शास्त्रार्थाबाधजन्यस्य निर्जराऽप्रतिबन्धकपुण्यबन्धस्योपादेयतासूचकं, अष्टकवचनं च शास्त्रार्थबाधजन्यस्य निर्जराप्रतिबन्धकपुण्यबन्धस्य हेयतासूचकमिति न कश्चिद् विरोधः ।

एतच्च समाधानं द्वात्रिंशद्द्वात्रिंशिकावचनमनुसृत्योक्तम् । तथा चोक्तं तत्र महोपाध्यायैः **नैवं, यत्पुण्यबन्धोऽपि धर्महेतुः शुभोदयः** इति । तद्वृत्तौ च **शास्त्रार्थाबाधेन निर्जराप्रतिबन्धकपुण्यबन्धाभावान्न दोष इति गर्भार्थः** इति प्रोक्तम् ।

इत्थं च 'पुण्यकर्म सर्वथा मोक्षार्थिनां हेयं' इति एकान्तोऽपि न कान्त इति बोध्यम्। साधूनामपि शास्त्रार्थाबाधजन्यस्य पुण्यकर्मणो गुणत्वात् । पुण्यानुबन्धिपुण्यं उपादेयं पापानुबन्धि पुण्यं हेयं इत्येवमेव न्याय्यत्वात् ।

अत्र पुण्यानुबन्धिपुण्योपादेयतासूचकानि गणियशोविजयविरचितवृत्तौ प्रतिपादितानि शास्त्रवचनानि कानिचित्प्रतिपाद्यन्ते ।

→ **पुण्यानुबन्धिपुण्यं दत्ते वैराग्यकारणं भोगम्** । (वैराग्यकल्पलतायां २/९७)

→ **जइ वि पुण्णपावक्खएण मुत्ती, तहावि तस्सा कुसलाणुबन्धिपुण्णमेव कारणं, न कुसलाणुबन्धिपुण्यविवागमन्तरेण तारिसा भावा लब्भन्ति, जारिसेसु पुण्णपावक्खयनिमित्तकुसलजोयाराहणं** (समरादित्यकथायां)

→ **पुण्यानुबन्ध्यतः पुण्यं कर्त्तव्यं सर्वथा नरैः । यत्प्रभावादपातिन्यो जायन्ते सर्वसम्पदः** । (अष्टकप्रकरणे)

## ( ४० ) अथ चैत्यगृहमेव केवलं पृच्छति, ततस्तदभावे वर्गचतुष्टयभावे च तत्प्रभवगुणहानिः स्यात् । ( ओ.नि. ६६ )

**चन्द्र.** अन्तरालिकग्रामान्तर्गतः साधुः "किमत्र ग्रामे चैत्यगृहमस्ति न वा' इत्येव केवलं पृच्छेत्, तर्हि ग्रामजनः चैत्यगृहाभावे "अत्र तन्नास्ति" इति वदेत्, ततश्च साधुः प्रत्यावर्तेत। साधुना हि साधुसाध्वीश्रावकश्राविकासम्बन्धिनी पृच्छा न कृता, ततश्च ग्रामजनेन तेषां सत्त्वेऽपि तत्सम्बन्धि किमपि न कथ्यते इति सम्भवति । एवं च वर्गचतुष्टयजन्यस्य लाभस्य वञ्चना भवेत् साधोः, तस्मात्साधुना केवलचैत्यविषयकपृच्छा न कर्त्तव्येति भावः।

अत्र कश्चिदाह "किमेतादृशमपि क्षेत्रं तदानीमभूत्, यत्र चैत्यगृहं नासीत्, वर्गचतुष्टयं च आसीत् ? साधुसाध्वीभिः चैत्यसमन्वित एव क्षेत्रे निवासः कर्त्तव्य इति विधिः । ततश्च चैत्यरहितग्रामे तेषां अवस्थानं कथं घटेत ? तथा श्रावकश्राविकाणामपि जिनपूजाया नित्यकृत्यत्वात् चैत्यं विना तस्याः असम्भवात् कथं तद्रहिते स्थानेऽवस्थानमिति महतीयमाशङ्का" इति ।

अत्रोच्यते, संयतानां तावत् संयमप्रधानत्वात् न जिनप्रतिमाद्यालम्बनावश्यकत्वं तदानीं अभूत्, यानि तु चैत्यवन्दनानि प्रतिदिनमवश्यकर्त्तव्यानि, तानि भावाचार्यस्थापनाचार्ययोरन्यतरस्याग्रे भावभगवन्तं मनसिकृत्य सम्पादनीयानि भवन्तीति संयतानां चैत्यान्विते एव ग्रामे स्थेयमिति तदानीं नियमो नाभूत् ।

किञ्चैतन्नियमकरणे दोषा अपि भवन्ति, तथाहि – एतादृशनियमे सति चैत्यरहितग्रामेषु न स्थातव्यं स्यात्, ततश्च यदाऽपान्तराले बहवो ग्रामास्तादृशा भवेयुः, तदा तान् सर्वान् परित्यज्याग्रे चैत्यान्विते ग्रामे गन्तव्यं स्यात्, ततश्च तदर्थं दीर्घविहारोऽनिवार्यः, दीर्घविहारे च श्रमादयो दोषाऽनिवारितप्रसरा इति ।

तथा चैत्यरहितेषु ग्रामेषु साधूनामनवस्थाने तत्रस्थजनेषु साधुदर्शनप्रवचन-श्रवणसुपात्रदानगुणानुमोदनादिप्रभव उपकारो बीजाधानादिरुपः न सम्भवेत्, अपारपारावारसंसारोत्तरण-कल्पबीजाधानाद्यभावे चातिदुस्तर एव तेषां भवमहोदधिरिति । तथा चैत्यान्वितग्रामेष्वेव साध्ववस्थानानुज्ञायामन्यग्रामेषु जिनशासनप्रभावना-नूतनश्रावकसाध्वादिरुप-सङ्घपरिवृद्धिश्च न सम्भवेदिति ।

तथाऽन्यतीर्थिकाश्चैत्यरहितेषु ग्रामेषु गत्वा मुग्धजनान् श्रावकादींश्च विप्रतारयेयुः, ते च सुसाधुसङ्गाभावात् स्वयं तादृशप्रज्ञत्वाभावाच्च न विवेकं कर्तुं शक्नुयुः, तथा च चैत्यवन्दनार्थं तादृशग्रामावस्थानपरित्यजने बहुजनानां सम्यक्त्वादित्यागः प्रगृहीतो भवति, मिथ्यादृष्टीनां चावकाशो दत्तो भवति, न चैतद्गौरवलाघवचिन्तनचतुरप्रज्ञानां महात्मनां कथमपि सङ्गच्छत इति ।

अत एव "तादृशप्रदेशेषु गोचरीदौर्लभ्यात् आधाकर्मपरिभक्षणेनाऽपि यदि तत्रस्थानां श्रावकादीनां सम्यक्त्वादीनि सुरक्षितानि कर्तुं शक्यन्ते, तर्हि तदपि समाश्रयणीयं अपवादत आधाकर्मपरिभक्षणस्यादोषत्वात्" इति अनेके गीतार्था वर्तमानकाले प्रतिपादयन्ति ।

तदेवमादिदोषसम्भवात् 'साधूनां चैत्यरहितेषु ग्रामेषु नावस्थानं' इति न युक्तमाभाति । अत एव "**यदि तत्र चैत्यानि सन्ति, ततो वन्दन्ते**" इति अग्रेऽत्रैव वृत्तौ गदितम् । तत्र च मासकल्पक्षेत्रेऽपि 'यदि तत्र चैत्यानि सन्ति' इति शब्दैः चैत्यसद्भावभजनैव प्रकटीकृतेति दृढतरमूहनीयम् ।

**ननु** तर्हि श्रीकल्पसूत्रसुबोधिकावृत्तौ चातुर्मासक्षेत्रगुणेषु चैत्यसद्भावः किमर्थं प्रतिपादित इति **चेत्** अहो मुग्धता । यदि तत्र चैत्यं भवेत्तर्हि शोभनमेव, कस्तत्र निषेधमाह ? केवलं चैत्याऽभावे नैव स्थातव्यमिति एकान्त एव न न्याय्यः, न च सर्वक्षेत्रगुणसद्भावे एव तत्रावस्थातव्यमिति नियमः, किन्तु यथागौरवलाघवमेवावस्थानं युक्तम् । यथाऽऽचार्यस्य षट्त्रिंशद् गुणाः प्रतिपादिताः, परन्तु एकद्वित्र्यादिसामान्यगुणाभावे नाचार्यपदायोग्यत्वम् । इत्थं च यथा षट्त्रिंशद् गुणा कस्यचित्सम्भवेयुः, तर्हि शोभनमेव, परन्तु एकद्वित्र्यादिसामान्यगुणाभावेऽपि यथालाभं आचार्यपदं दीयत एव, एवं सर्वे क्षेत्रगुणाः यदि कुत्रचित्सम्भवेयुः, तर्हि शोभनमेव, परन्तु एकद्व्यादिसामान्यगुणाभावेऽपि तत्र यथालाभं अवस्थानं युक्तमेवेति ।

किञ्च सुबोधिकावृत्तौ उत्सर्गमार्गो निरुपितः, अपवादतस्तु अधिकलाभे सति चैत्यरहितेऽपि स्थानेऽवस्थानं न दुष्टमित्यपि वक्तुं शक्यते ।

अपरं च तत्तत्कालापेक्षया सामाचारीपरिवर्तनमपि न दुःशकं, ततश्चैतदपि सम्भवति यदुत मासकल्पादिसामाचारीपरिपालनसमन्विते प्राचीनकाले चैत्यसत्ता-ऽऽवश्यकता न भवेत्, विनयविजयोपाध्यायकाले तु मासकल्पादिसामाचारी-परिपालनरहिते चैत्यसत्ताऽऽवश्यकता सामाचार्यां प्रविष्टा भवेदिति न किञ्चिद्वचन-मात्रदर्शनतो व्यामोहः कार्य इति ।

चैत्यरहितेषु ग्रामेषु श्रावकश्राविकाणामवस्थानं कथं सम्भवेदिति प्रश्नोत्तरं अधुना विभाव्यते ।

यद्यपि श्रावकधर्मस्य सम्यक्त्वमूलकत्वात् सम्यक्त्वस्य च जिनप्रतिमापूजादि-बाह्यक्रियाऽधिगम्यत्वात् श्रावकस्य जिनप्रतिमापूजनादिकं भवत्येवेति तद्रहिते स्थाने तेषामवस्थानं न सम्भवतीति । तथाऽपि अत्रापि बहु चिन्तनीयमस्ति । तथाहि – तत्र ग्रामे केचिज्जना आचार्याद्युपदेशतोऽभिनवमेव जैनधर्मं प्रतिपन्ना इति व्यवहारतस्ते तत्र जैनश्रावका उच्यन्ते, तेषां च तदानीमेव धर्मप्राप्तेः चैत्यनिर्माणावकाशो न अभवत्, ततश्च तस्मिन्काले स ग्रामः चैत्यरहितो वर्गचतुष्टयसमन्वितश्च सम्भवतीति ।

किञ्च सम्यक्त्वमपि तावत् **अरिहंतो मह देवो जावज्जीवं सुसाहुणो गुरुणो । जिणपन्नत्तं ततं इअ सम्मत्तं मए गहिअं** इति वचनात् सुदेवसुगुरुसुधर्मप्रतिपत्तिरुपं व्यवहारतोऽभिमतम् । तत्र जिनपूजादिक्रियाणामवश्यम्भावनियमो न भवति । क्रियासद्भावस्य द्रव्यादिसामग्र्यानुकूल्येन नियतत्वात् । तथाहि–तथाविधदेशे चैत्याभावाद् रोगस्वामिभयाद्यापत्तितो वाऽन्यतो वा कारणाज्जिनपूजाद्यकारिणो पूर्वमपि आसन् सन्ति च साम्प्रतमपि । न चैतावता तेषां श्रावकत्वाभावः । तथा च कुत्रचिद् ग्रामेषु चैत्याभावेऽपि श्रावकवर्गसद्भावो न विरूद्धो भवति ।

तथापीदमत्रावधेयम् - सत्यामपि सामग्र्यां जिनपूजाद्याचारोपेक्षिणस्तु प्रायो श्रद्धाहानिप्रसङ्गःस्यादिति दर्शनविशुद्धिमिच्छन्तो सदा जिनपूजाद्याचारपरायणाः भवन्त्येव । प्रस्तुतेऽपि च चैत्याभावेऽपि भावतस्तीर्थयात्रादिप्रकारेण जिनपूजाद्याचारोऽनिरुद्धप्रसरो ज्ञेयः ।

## ( ४१ ) यदि चैत्यगृहमस्ति, ततस्तस्मिन्नेव गन्तव्यम् । ( ओ.नि. ६७ )

**चन्द्र.** चैत्यगृहसद्भावेऽपि तदतिक्रम्योपाश्रयादौ प्रवेशे जिनाशातनाप्रसङ्गात्, सर्वत्र सति चैत्यगृहे प्रथमं तत्रैव वन्दनार्थं गन्तव्यम् । अयं चोत्सर्गः, अपवादतस्तु प्रश्रवणादिशङ्कानिवारणग्लानादिसम्बन्धिभक्तपानाद्यानयनादिकार्यवशतश्चैत्यगृहमति-क्रम्यापि उपाश्रयप्रवेशे न दोष इति बोध्यम् ।

## ( ४२ ) असाम्भोगिकसकाशं प्रविशता तदानाक्रान्ते भूप्रदेशे निक्षिप्योपकरणं ततः कृतिकर्मादि साम्भोगिकेष्विव सर्वं कर्त्तव्यमिति । तदनाक्रान्तभूभागे चोपकरणं स्थापयति, मा भूच्छिक्षकाणां तत्सामाचारीदर्शनेऽन्यथाभावः स्यादिति । ( ओ.नि. ७२ )

**चन्द्र.** साम्भोगिकाः नाम परस्परं समानसामाचारीकाः संविग्नाः, असाम्भोगिकाश्च परस्परं विभिन्नसामाचारीकाः संविग्नाः एव, असंविग्नानां साम्भोगिकवदसाम्भोगिकव्यपदेशस्याप्यभावात् ।

**नन्वत्र** असाम्भोगिकेष्वपि साम्भोगिकेष्विव सर्वं कृतिकर्मादि कर्त्तव्यतया प्रतिपादितम्, ततश्च असाम्भोगिकानामपि वन्दनकरणादिकं शास्त्रानुसारीति आपन्नम् । किञ्चात्रैव ग्रन्थेऽग्रे 'असाम्भोगिकान् द्वादशावर्तवन्दनेन वन्दते' इति वक्ष्यते । ततश्चाधुना असाम्भोगिकानां परस्परं वन्दनव्यवहारनिषेधः कथं घटेत इति **चेत्**

संविग्नगीतार्थबहुजनाचीर्णेयं साम्प्रतकालभाविनी परम्परेति सङ्घटना कर्त्तव्या । अयं भावः '**गुणाधिके वन्दनं कर्त्तव्यं**' इति न्यायात् असाम्भोगिकानामपि दीर्घपर्यायादिगुणवतां वन्दनकरणादिकं सुसङ्गतमेव । परन्तु कस्मिंश्चित्काले तदानीन्तनानां बहूनां संविग्नगीतार्थानां "परस्परं वन्दनव्यवहारोऽपि न कर्त्तव्य" इति निर्णयोऽभवदिति तत्कालादारभ्येयं व्यवस्था वर्तत इति बोध्यम् ।

कस्मिन्काले कैः कारणैरियं व्यवस्था प्रवर्तितेति तु सम्प्रदायापरिज्ञानान्न वक्तुं पार्यते ।

**ननु** गुरुतत्त्वविनिश्चये तावदित्थमुक्तं "**चारित्रवत्त्वे सति एकसामाचारीकत्वस्यैव वन्द्यतायां तन्त्रत्वात्**" (१/१२३) एकसामाचारीकत्वं नाम साम्भोगिकत्वमेव, तथा च चारित्रवत्त्वे सति साम्भोगिकत्वं वन्दनीयत्वमित्यापन्नम् । प्रकृतपाठे च भिन्नसामाचारीकस्यापि संविग्नस्य वन्दनीयत्वं प्रतिपादितमस्ति, एवं च कथं न परस्परं विरोध इति **चेत्**

अत्रेदं समाधानं । 'पार्श्वस्थादयोऽपि यदि चारित्रवन्तः सम्भवन्ति, ततः तेषामुत्सर्गतोऽपि वन्दनीयत्वं किं न भवति ? किमर्थं तेषामपवादत एव वन्दनीयत्वं'

इत्येतादृशपूर्वपक्षसमाधानार्थं महोपाध्यायैः 'चारित्रवत्त्वे सति' इत्यादिवाक्यं समाधानतया निगदितम् । अत्र हि पार्श्वस्थादीनां व्यवच्छेदार्थं एकसामाचारीकत्वपदमस्ति, ततश्चारित्रं तु तेषामस्त्येव, केवलं एकसामाचारीकत्वस्य अभावादेवावन्द्यत्वम् । तथा चात्र प्रतिगच्छं द्रव्यक्षेत्रादिवशकृता विभिन्ना सामाचारी नाभिप्रेता, अपि तु संविग्नताप्रयुक्ता प्रायः सकलगच्छसमाना सामाचार्येवाभिप्रेता । तथा च सर्वे एव संविग्नगच्छा भिन्ना अपि सन्तः संविग्नताप्रयुक्तैकसामाचारीमन्त इति परस्परं सर्वे वन्दनीयाः, पार्श्वस्थादयस्तु चारित्रवन्तोऽपि संविग्नताप्रयुक्तैकसामाचारीकत्वाभावात् न वन्दनीया इति । तथा च ओघनिर्युक्तिवचनवत् गुरुतत्त्वविनिश्चयवचनमपि सर्वेषां संविग्नानां साम्भोगिकासाम्भोगिकानां परस्परं वन्दनीयताप्रतिपादकमिति नात्र कश्चिद् विरोध इति सूक्ष्मं निभालनीयम् ।

**ननु** तथापि न मनः संतुष्यति, 'एकगच्छव्यवहारवतां वन्दनप्रवृत्तेः' इति तत्रैवाग्रे अनन्तरमेवोक्तत्वात् । ततश्च भिन्नगच्छव्यवहारवतां वन्दनाप्रवृत्तिः सिद्धैवेति **चेत्**

न, अत्राऽपि एकगच्छव्यवहारः संविग्नताप्रयुक्तशोभनाचाररुप एव, स च पार्श्वस्थादिगच्छे नास्तीति तेऽवन्दनीया इति सर्वं सुस्थम् । इत्थमपि च शङ्काऽनिवारणे तु 'महोपाध्यायाद् पूर्वमेव असाम्भोगिकसंविग्नवन्दनव्यवहारनिषेधस्य प्रवृत्तत्वात् तैः तथोक्तम्' इति यथाकालं वचनद्वयस्यापि साङ्गत्यं चिन्तनीयमिति ।

**ननु** परस्परं वन्दनव्यवहार इव भक्तपानादिव्यवहारोऽपि किमर्थं शास्त्रेण नानुमन्यत इति **चेत्** 'मा भूच्छिक्षकाणां तत्सामाचारीदर्शनेऽन्यथाभावः स्यादिति' प्रकृतवचनोक्तकारणादिति जानीहि ।

इदमत्र तात्पर्यम्, सामाचारीभेदे एवासाम्भोगिकत्वम्, ततश्च यद्यासाम्भोगिकैः सह भक्तपानादि क्रियेत, तर्हि उभयपक्षवर्तिनोऽपरिणतसाधवः परस्परं विभिन्नसामाचारी-दर्शनात् मतिभेदादिकं दोषं प्राप्नुयुः ।

तथाहि - कुत्रचिद् गुरव एव सर्वान् भक्तपानादि परिवेषयन्ति, कुत्रचिच्चान्यतमः कश्चित्साधुरेव । कुत्रचित् आचामाम्लादितपोऽर्थं स्थापनादिदोषान्वितमपि भक्तं अनुज्ञाप्यते, कुत्रचिच्च शुद्धभोजनमेवानुज्ञाप्यते । एवमन्येऽपि बहवः सामाचारीभेदाः सम्भवन्ति, अपरिणताश्च शैक्षकाः कदाचित्स्वकीयसामाचारीमेव शोभनां मत्वाऽन्यान् साधून् शिथिलान् कल्पयन्ति, कदाचिच्चान्यदीयसामाचारीं शोभनां मत्वा स्वकीयान् शिथिलान् कल्पयन्ति, अन्यदीयसामाचारीग्रहणतश्च स्वगणे एव सामाचारीभेदं उत्पादयन्ति, ततश्चैकस्मिन्नेव गणे

सामाचारीभेदे सति परस्परं ते कलहायमाणाः सकलस्यापि गच्छस्य महान्तं खेदं *उत्पादयन्ति ।* इत्थं च निष्कषायस्वरुपस्य चारित्रपरिणामस्य मालिन्यमित्येवमादिकान् महादोषान् दृष्ट्वा विभिन्नसामाचारीकैः सह भक्तपानादिव्यवहारः *शास्त्रे निषिद्ध इति ।*

न केवलं भक्तपानादि, अपि तु सह सन्निवासादिकमपि, अत एवात्र कारणवशात् एकाकिनोऽपि गच्छतः साधोः असाम्भोगिकवसतौ अवस्थाननिषेध एवोक्तः, एकाकिनोऽपि च तस्य अन्यस्यां वसतौ अवस्थानमनुज्ञातमिति निपुणमत्या विचारणीयमेतद् यदुत भिन्नसामाचारीकैः सह सहसंवासभोजनपानादिकः सर्वोऽपि व्यवहारो बहुदोषत्वान्न कर्त्तव्य एवोत्सर्गतः, अन्यथा हि एकाकिनः साधोः अन्यस्यां वसतौ अवस्थानं नानुज्ञाप्येत, किन्तु असाम्भोगिकवसतावेवावस्थानं अनुज्ञापितं स्यादिति ।

इत्थं च "किमेते साधवः रागद्वेषरहिता अप्येकत्र न भुञ्जन्ति ?, किमेतेषां भ्रातृभावो नास्ति ? येन परस्परानीतं परस्परस्य न दीयते ?" इत्यादिकं वचनमापातमात्रमनोहरमिति निःशङ्कं अवधारणीयम् । बह्वपायनिरासार्थं एव तादृशव्यवहारप्रवर्तनात्, तथैव च रागद्वेषराहित्यस्य भ्रातृभावस्य चाक्षतत्वसम्भवादिति ।

## ( ४३ ) कालतः प्रथमपौरुष्यामुपदिष्टं, तस्यां च यदा प्रासुकं न लभ्यते, तदाऽप्रासुकमपि क्रियते, भावतः समाधिः कर्त्तव्या प्रासुकाप्रासुकैरिति । ( ओ.नि. ७५ )

**चन्द्र.** ग्लानसाध्वर्थं वैद्येनोपदिष्टं यथा 'अस्य प्रथमपौरुष्याममुकमौषधादिकं दातव्यं' इति, तच्च यदि तदा प्रासुकं लभ्यते, तदा सुन्दरम् । अथ न लभ्यते, तर्हि अप्रासुकमपि क्रियत इति । 'अत्राप्रासुकमपि क्रियते' इत्यस्यायं भावार्थः यदुत सचित्तमपि अचित्तं कारयित्वा ग्लानस्य देयमिति । न तु 'सचित्तमेव साक्षाद्ग्लानस्य देयम्' इति । एवं 'प्रासुकाप्रासुकैः समाधिः कार्या' इत्यत्रापि प्रासुकाभावे अप्रासुकेन प्रासुकीकृतेन ग्लानस्य समाधिः सम्पादनीयेत्यपि बोध्यमिति ।

**ननु** सचित्तमचित्तं कारयित्वा ग्लानदानात्सकाशात्साक्षात् सचित्तस्यैव दानमल्पदोषम् । तथाहि साक्षात्सचित्तभक्षणे केवलं सचित्तस्यैकस्यैव विराधना, तदचित्तताकरणे तु तेजस्कायवायुकायादिविराधनाऽतिप्रभूता भवेत्, सचित्तविराधना तु तत्राऽप्यस्त्येवेति कोऽयं न्यायः यदुत सचित्तमचित्तं कारयित्वा ग्लानस्य दातव्यमिति **चेत्**

**सत्यम्,** यद्यपि बाह्यविराधना सचित्ताचित्तताकरणेऽभ्यधिका, साक्षात्सचित्तभक्षणे त्वल्पा, तथाऽपि साक्षात्सचित्तभक्षणे निःशूकतारुपाऽन्तःविराधनाऽतिमहतीति तन्निवारणार्थं अचित्तताकरणमनुज्ञातमिति ।

तथैकदा भक्षितसचित्तको जातहीनसंवेगो निष्कारणमपि पश्चात् सचित्तं भक्षयेत्, तमवलम्ब्य चान्योऽपीत्यनवस्थादोषः ।

यद्यपि अपवादतो दोषसेवने निःशूकता भवेदेवेति न नियमः, तथाऽपि अपरिणतान् मन्दचारित्रपरिणामान् आश्रित्य तत्सम्भावनामाश्रित्यैतद्व्यवहारो व्यवस्थित इति । एतच्च उपदेशरहस्ये "**मन्दक्षयोपशमवति व्यभिचारवारणाय प्रायोग्रहणम्**" इति वचनेन महोपाध्यायैः स्पष्टीकृतम् ।

तथा च तत्पाठः → **द्रव्यादिप्रातिकूल्ये यतीनामेषणाशुद्ध्यादावध्ययनादौ च शक्तिविच्छेदात्कथं यतित्वाऽप्रच्यवः स्यादित्याशङ्क्याह-द्रव्यादयश्च प्रायो = बाहुल्येन बाह्याभावेऽपि = कायिकादिबहिर्व्यापारव्याघातेऽपि भावहराः = यतनापरिणामोपघातका न भवन्ति, प्रायोग्रहणं मन्दक्षयोपशमवति व्यभिचारवारणाय** ← इति ।

श्रावकाणामपि सचित्तभक्षणपरित्यागोपदेशोऽनया रीत्या यथासम्भवं विभावनीय इत्यलं विस्तरेण ।

## ( ४४ ) एस गमो पंचण्ह वि णितिआदीणं गिलाणपडियरणे... । ग्लानप्रतिचरणे एष विधिः यदुत प्रासुकेन भक्तादिना प्रतिचरणं कार्यम्, निकाचनं करोति यदुत दृढीभूतेन त्वया यदहं ब्रवीमि, तत्कर्त्तव्यम् । ( ओ.नि. भा. ३९ )

**चन्द्र.** संविग्नग्लानस्य प्रासुकेनाप्रासुकेन वा प्रतिचरणं कार्यम्, पार्श्वस्थावसन्नकुशीलसंसक्तनित्यवासिनां प्रासुकेन प्रतिचरणं कार्यम् इत्यत्र भेदः, तथा नित्यवासिप्रभृतीनां निकाचनं करोति इत्यपि विशेषः ।

अत्र भवेदियं जिज्ञासा 'किमर्थं पार्श्वस्थादीनां प्रतिचरणं प्रासुकेनैव, नाप्रसुकेन' इति ।

अत्र समाधीयते, पार्श्वस्थादयो हि स्वयमेव शिथिलाचाराः, ततश्च यदि तेषामप्रासुकेन प्रतिजागरणं क्रियेत, तर्हि ते चिन्तयेयुः "यदि संविग्ना अपि एते अप्रासुकेन प्रतिचरणं कुर्वन्ति, तर्हि निश्चितमप्रासुके न दोषः, ततश्चाद्य यावदस्माभिर्यदाचरितं, तत्सर्वं निर्दोषं" इति । इत्थं च तेऽसंयमे दृढा कृताः स्युः मिथ्यात्वं च प्रापिताः स्युः, तस्मात्तेषामप्रासुकेन प्रतिचरणं न कार्यम् ।

निकाचनं किमर्थमिति **चेत्** पार्श्वस्थादयो हि यदि संविग्नबहुमानिनः तर्हि संविग्नपाक्षिकाः, अन्यथा तु संविग्नपाक्षिकादपि हीनतराः । ततश्च यदि संविग्नपाक्षिकस्यापि श्रावकाद् हीनत्वं, तर्हि पार्श्वस्थादीनां तु सुतरां तथात्वम् । इत्थं च यदि श्रावकवैयावृत्यमपि साधूनामकरणीयम्, तर्हि तदधस्तनस्थानवर्तिनां पार्श्वस्थादीनां तु सुतरामकरणीयं तत्, तथाऽपि यदि वैयावृत्त्यवशीभूतास्ते पुनः संविग्नताप्रतिपत्तौ समुत्साहा भवेयुः तर्हि अपवादतो वैयावृत्त्यं युक्तं भवेत् । तस्मादत्र निकाचनं क्रियते । यदि च ते नैवं निकाचनं स्वीकुर्वन्ति, तदा श्रावकादिवत्तेषां वैयावृत्त्यमपि अकरणीयमेवेति ।

किं बहुना ? साक्षात्परम्परया वा मोक्षानुकूलतां सम्पादयदेव किमपि कृत्यं अनुमतम्, तदसम्पादयत्पुनः निरर्थकत्वान्निराकृतमिति ।

## ( ४५ ) तीर्थंकरसम्बन्धिवचनकरणे = वचनानुष्ठाने आचार्याणां प्रागेव पूर्वमेव कृतं भवति । ( ओ.नि. भा. ४७ )

**चन्द्र.** 'जो गिलाणं पडिसेवइ सो मां पडिसेवइ । जो मां पडिसेवइ सो गिलाणं पडिसेवइ' इति तीर्थंकरवचनम् । आचार्येण चामुककार्याय साधुः प्रेषितः । तेन चापान्तराले ग्लानं श्रुत्वा दृष्ट्वा च तत्प्रतिचरणं कृतम् । ततश्च गुरुकार्यं विलम्बितं जातम् । तत्र किं स साधुः दोषभाग्भवति न वा ? इति प्रश्नः । तत्समाधानायेदं वचनं यदुत तीर्थंकरवचनं पालयताऽऽचार्यवचनं पालितमेवेति न स मनागपि दोषभागिति । यदि हि स आचार्यकार्यार्थं तीर्थंकरवचनमुपेक्षेत, तर्हि स अवश्यं दोषभाग्भवेत् । इत्थं च जिनाज्ञा गुर्वाज्ञायाः सकाशाद्गरीयसीति अनेन ज्ञायते ।

कश्चिद् अत्राह - **ननु** यदि जिनाज्ञा गुर्वाज्ञायाः सकाशात् गरीयसी, तर्हि भाद्रपदशुक्लपञ्चम्यामेव सांवत्सरिकप्रतिक्रमणं कार्यं, तस्यैव जिनाज्ञात्वात्, न तु चतुर्थ्यां, तस्या गुरुपरम्परासमागतत्वेन गुर्वाज्ञात्वात् । न केवलमेतावदेवापितु यः कोऽपि आज्ञाविरुद्धः जीतव्यवहारः, स सर्वोऽपि, जिनागमेषु वाक्यार्थरुपेण अदृश्यमानत्वात् गुरुपरम्परासमागतत्वेन गुर्वाज्ञारुपत्वादुपेक्षणीय एव स्यात् । न चैतद् भवतामपीष्टमिति । किञ्च श्रीमहानिशीथसूत्रे → **से भयवं ! किं तित्थयरसंतियं आणं नाइक्कमिज्जा, उयाहु आयरियसंतियं । गोयमा ! चउव्विहा आयरिया पन्नत्ता, तंजहा-नामायरिया, ठवणायरिया, दव्वायरिया, भावायरिया य । तत्थ णं जे ते भावायरिया, ते तित्थयरसमा चेव दट्ठव्वा, तेसिं संतियं आणं नाइक्कमिज्जा** ← इति । अत्र हि "आचार्याज्ञा उपेक्षणीया, तीर्थकराज्ञा पालनीया" इति नोक्तम् । किन्तु भावाचार्याणां तीर्थंकरसादृश्यं निगद्य तदाज्ञापालनमेवाभिहितम् । ततश्चात्र गुर्वाज्ञाया एव गरीयस्त्वमिष्यते, प्रकृते च तीर्थंकराज्ञाया इति कथं न परस्परं विरोध इति **चेत्** ।

न, यत्र वर्तमानद्रव्यक्षेत्रकालभावाः भावाचार्यैः सम्यक् परिज्ञाताः, तत्र भावाचार्याज्ञैव *प्रधाना। यतः ते गौरवं लाघवं च पर्यालोच्य कदाचित् शास्त्रवचनानुसारेण निर्णयं कुर्वन्ति,* कदाचिच्च शास्त्रवचनस्य साक्षादनुसरणं मुक्त्वाऽन्यथा निर्णयं कुर्वन्ति, परमार्थतस्तु सोऽपि *निर्णयः जिनानुमतत्वात् जिनाज्ञैव ।* एतद्ज्ञापनार्थमेव महानिशीथे भावाचार्याणां

तीर्थंकरसदृशत्वं तदाज्ञायाश्चानतिक्रमणीयत्वं निगदितम् ।

यत्र च दूरवर्तित्वादिकारणवशतो भावाचार्यैः वर्तमानद्रव्यक्षेत्रकालभावाः न सम्यक् परिज्ञाताः, तत्र गीतार्थसाधुः कदाचिद् गुरोः पूर्वाज्ञामेवानुसरेत्, कदाचिच्च वर्तमानद्रव्यादिवशतः दोषदर्शने सति तामतिक्रम्य शास्त्रवचनं स्वगीतार्थतां च पुरस्कृत्य प्रवर्तते । तत्र च तदेव प्रमाणम्, न तु गुरोः पूर्वाज्ञा । यदि च भावाचार्याः वर्तमानद्रव्यादीन् जानीयुः, तदा तेऽपि पूर्वाज्ञां निषिध्य नूतनाज्ञां कुर्युरिति नूतना जिनाज्ञाऽपि भावाचार्याज्ञाऽभिन्नैवेति परमार्थतः तत्र गुर्वाज्ञाऽनुल्लङ्घनमेवेति सूक्ष्ममीक्षणीयमिति !

तदयमत्र निष्कर्षः, जिनाज्ञा भावाचार्याज्ञा च परमार्थतः एकैव भवति, यत्रानुबन्धतो लाभः, तत्र उभयोराज्ञाऽस्त्येव, अनुबन्धतो लाभश्च द्रव्यक्षेत्रकालभावाद्यनुसारीति ।

## ( ४६ ) ततश्च आरम्भं दृष्ट्वा एतच्च ब्रवीति - नास्मदर्थे कश्चित्कर्त्तव्य आहारविधिः । किन्त्वस्माकं विधिदानं क्रियते । ( ओ.नि. भा. ५३ )

**चन्द्र.** साध्वर्थमारम्भं कुर्वाणं श्रावकं दृष्ट्वा साधुर्निषेधयति "अस्मदर्थे कोऽपि पाकाद्यारम्भो न कर्त्तव्यः, निर्दोष एव आहारोऽस्माकं दातव्य" इति ।

**ननु** मुग्धश्रावकाणां सुसाधवेऽशुद्धदानं बहुतरनिर्जराऽल्पबन्धकारि निगदितमस्ति । ततश्च अशुद्धदानमपि तेषां हितकरमेवेति अयं निषेधः कथं युक्त इति **चेत्**

न, मुग्धतापरिहारेण शुद्धदानद्वाराऽधिकनिर्जरादिलाभसम्पादनार्थं प्रकृतोपदेशो युक्त एव । मुग्धानां अशुद्धदानजन्यनिर्जरापेक्षया परिणतानां शुद्धदानजन्यनिर्जराया अनन्तगुणत्वमिति तु सुप्रसिद्धमेव ।

किञ्च स्वशुभपरिणामबाधेन परोपकारकरणं न कथंञ्चिदपि जाघटीति, अत एवावश्यकक्रियाबाधेन धर्मोपदेशमपि कुर्वाणस्य काथिकत्वमवन्दनीयत्वं च निगदितं यतिजीतकल्पादौ । यद्यपि अत्र स्वरुपतः परोपकारकरणशुभपरिणामो दृश्यते, तथाऽपि अनुबन्धतः सदोषाहारग्रहणादिविषयकप्रमादलौल्यादयो बहवो दोषाः सम्भवदुत्पत्तिका इति अनुबन्धतोऽत्र शुभपरिणामबाधः, तस्मात् अत्र सदोषाहारनिषेधो युक्त एवेति ।

इदन्तु बोध्यम् । विशिष्टलाभं समुत्प्रेक्ष्य क्वचित्कारणविशेषे गीतार्थानामन्यथाऽऽचारोऽनुबन्धतो हिताबाधकतया न विरुद्धः । तस्मादत्रापि नैकान्तेन कुत्रापि लगितव्यम् । न केवलमत्र, किन्तु सर्वेष्वपि आचारेषु एष एव गमः सूक्ष्मधिया निभालनीयः **यावन्त उत्सर्गाः तावन्तोऽपवादाः, ये आश्रवाः ते परिश्रवाः** इत्यादिवचनानां सर्वाचारेषु अप्रतिहतत्वात् ।

**( ४७ ) 'उभएगयरे य ओयविए' उभयं श्रावकः श्राविका च ओयविअं खेदज्ञं उभयं यदि भवति, एगतरं च ओयविअं अल्पसागारिकः-श्रावकः, श्राविका वा ओयविआ अल्पसागारिकेत्यर्थः, ततो भुङ्क्ते । ( ओ.नि. भा. ५४ )**

**चन्द्र.** अत्र 'ओयविअं' इति पदस्य द्वौ अर्थौ वृत्तिकृता निगदितौ ज्ञायेते, खेदज्ञत्वमल्पसागारिकत्वं च । तत्र खेदज्ञपदं यदि 'परिवाराभावेऽपि सर्वकार्यक्षमत्वं' इत्यर्थस्य वाचकं गृह्यते, तदा परमार्थत तत्पदं अल्पसागारिकत्वार्थस्यैव वाचकमिति एक एवार्थः, केवलं शब्दभेदः खेदज्ञः अल्पसागारिकश्चेति । एवं चायमर्थो भवति 'यदि श्रावकः श्राविका चोभयं खेदज्ञं अल्पसागारिकं परिवाररहितमिति यावत् । यदि वा श्रावक एकोऽल्पसागारिकः श्राविकादिपरिवार-विरहितः इति यावत्, यदि वा श्राविका एकाऽल्पसागारिका श्रावकादिपरिवाररहितेति यावत् । तर्हि एतदन्यतरे विकल्पे सति साधुस्तत्रैव भुङ्क्ते । यतस्तत्र द्वौ एक एव वा जन इति एकान्तस्य सुलभत्वात् भुक्तिः सुकरा प्रभूतजने तु एकान्तस्य दौर्लभ्यात् भुक्तिर्दुष्करा, श्रावकश्राविकयोश्च परिणतत्वात् इतरदोषाणामप्यसम्भव इति ।

यदि च खेदज्ञपदं परिणतत्वस्य (साधुसामाचारीसंज्ञानवत्त्वस्येति यावत्) वाचकं, तर्हि अयमर्थो भवेत् "यदि तत्र उभयं परिणतं, तर्हि तत्र भुङ्क्ते, यदि च श्रावक एक एव यदि वा श्राविका एका एव, तदाऽपि तत्र भुङ्क्ते" इति । अत्रापि एकस्यैव श्रावकस्य एकस्या वा श्राविकायाः परिणतत्वं तु ग्राह्यमेव । नहि 'उभयस्य परिणतत्वं एकस्य एकस्या वा अपरिणतत्वं अनुमतं' इति अत्र काचिद् युक्तिर्विद्यते ।

इत्थं चात्र सूक्ष्मार्थविचारणया ओयविअंपदं परिवारसाहित्यस्यैव वाचकमिति ज्ञायते। खेदज्ञत्वं तु ओयविअपदस्य वाच्यं नास्ति, परन्तु वृत्तिकृताऽऽवश्यक-त्वात्तदुपात्तमिति बोध्यम्। तथा च परिणतोभयस्य परिणतश्रावकस्य परिणत-श्राविकायाश्च गृहे भोक्तव्यम्, परिवारसत्त्वे तु एकान्तदौर्लभ्यपरिवारजनशङ्कादिदोषबाहुल्यात्तत्र न भोक्तव्यमिति निर्गलितार्थः।

## (४८) आगच्छत, पश्यत पात्रके भुञ्जानः साधुर्दृष्ट इति। (ओ.नि. भा. ५८)

**चन्द्र.** कारणवशादेकाकी निर्गतः साधुः आहारं गृहीत्वा शून्यगृहे भोजनार्थं प्रविष्टः, तत्र च भुञ्जन्तं तं दृष्ट्वा कश्चिद् ब्राह्मणादिकः शीघ्रं ग्रामं गत्वा कथयति लोकपुरतः "आगच्छत यूयं, पश्यत यूयं, मयाऽद्य पात्रके भुञ्जानः साधुः दृष्ट" इति।

अत्र भवतीयं जिज्ञासा-**ननु** साधवः पात्रे आहारं गृह्णन्ति, भुञ्जन्ति चेति प्रसिद्धमेव, किमत्राश्चर्यं येन तेन ब्राह्मणादिना सकललोकाग्रतः तन्निवेदनं कृतं, लोकश्च शून्यगृहे आकारित इति। किञ्च पूर्वमपि अस्मिन्नेव ग्रन्थे प्रतिपादितं यदुत शून्यगृहे भुञ्जतः सतः साधोः पुरस्तात् कश्चित्सागारिको यद्युपस्थितो भवेत्, तर्हि साधुना भूताविष्टेनेव वर्तितव्यमिति। एतदपि 'किमर्थं' इति न ज्ञायते ? न हि भोजनं किञ्चिदनिर्वाच्यं पापमस्ति, येनैतादृशो व्यवहारः क्रियते इति।

अत्रोच्यते। भोजनपानाद्यानयने पात्रात्तद्भोजनादिकं मा परिगल्यतामित्येतदर्थं पात्रम् बृहदुण्डं च गृह्यते। तस्मिंश्च साधवः भोजनपानादिकमानयन्ति, गृहस्थाश्च चिन्तयेयुः "पात्रे गृहीत्वा ते स्थाने गत्वा स्थाल्यादिषु भुञ्जन्ति" इति। यतः तेऽपि अणुण्डाषु स्थालीषु भुञ्जन्ति न उण्डभाजनेषु..., ततस्ते साध्वर्थमेतदेव चिन्तयन्ति। साधवश्चाधिकपरिग्रहादिदोषभयात्तस्मिन्नेव पात्रके भुञ्जन्ति, यस्मिन्नानयन्ति, अत एव ते प्रच्छन्नं भुञ्जन्ति। मा भूत् "एते साधवः लोकविरुद्धचारिणः बहुभक्षका" इत्याद्याशंकेति। कथमेतादृशी आशङ्का भवेदिति **चेत्** ते हि अनुण्डायां स्थाल्यां भुञ्जते। साधवस्तु उण्डेषु बृहत्सु च पात्रेषु भुञ्जत इति दृष्ट्वा लोकविरुद्धत्वाद्याशङ्का न दुर्घटा।

ततश्चैतादृशाशङ्कानिवारणार्थं प्रच्छन्नभोजनं क्रियत इति सुस्थम् । प्रकृते च पात्रके भोजनं कुर्वन्तं साधुं दृष्ट्वा लोकविरुद्धत्वादिज्ञानाद् सागारिको लोकान् कथयति, तत्र चानयतीत्यादि यथासम्भवं सर्वं योजनीयमिति ।

**( ४९ ) अथ स्थण्डिलं नास्ति, क्षुधा च पीड्यते, ततोऽस्थण्डिल एव चीरमास्तीर्य पादयोरधस्ततश्च भुङ्क्ते, किमर्थ पुनस्तच्चीरमास्तीर्यते ? अत आह - परिशाटिनिपातसंरक्षणार्थं, तया हि परिशाट्या निपतन्त्या पृथिवीकायादि विध्वस्यत इति । ( ओ.नि. भा.६३ )**

**चन्द्र.** एकग्रामाद् ग्रामान्तरं गच्छन्साधुर्यं विधिं करोति, स अत्र प्रतिपादितः । पूर्वग्रामगृहीतमशनादि तत्र भोजनस्थानाभावे विवक्षितग्रामान्तरं गच्छन् साधुः केन प्रकारेण मार्गे भुनक्तीति अत्र प्रतिपादितमिति भावः ।

**ननु** चीरास्तरणकारणं तावत् परिशाट्या पृथ्वीकायविध्वंसनरक्षणं प्रतिपादितम्, परं न तद् घटते । यतो हि चीरास्तरणेऽपि पृथ्व्यादिविराधना भवत्येव । न हि अशनादिकणवत् चीरं पृथ्वीकायादिशस्त्रं नास्तीति एतद् निगदितुं शक्यम् । प्रत्युत परिशाटी अल्पस्मिन्नेव पृथ्व्यादिभागे निपतति, ततश्च तयाऽल्पा विराधना, चीरन्तु बहुभागे आस्तीर्यत इति तया बह्वी विराधनेति **चेत्**

न, चीरास्तरणानन्तरं भुक्तौ या परिशाटी, सा चीरे एव निपतति, तच्च सपरिशाटिचीरं भुक्त्यनन्तरं साधुना दूरीक्रियत इति स्वल्पोऽपि परिशाटीभागः तत्र भुक्त्यनन्तरं न भवेत् । इत्थं च चीरजन्या विराधना भुक्तिकालमात्रभाविनी । चीराभावे तु परिशाटी साक्षात् पृथ्व्यादिष्वेव निपतेत्, तस्माच्च तदुद्धरणं दुःशकमिति सा परिशाटी तत्र चिरकालमवतिष्ठते इति तत्रैव बह्वी विराधना । इत्थं चाधिकविराधनानिवारणार्थं चीरास्तरणं सङ्गतमेवेति । नद्युत्तरणविधिः स्थण्डिलास्थण्डिलाभ्यामस्थण्डिलस्थण्डिलसङ्क्रमणविधिश्चेममेव न्यायमनुसरतीति पूर्वापरपर्यालोचनपरायणेन भवितव्यं मतिमतेति ।

**( ५० ) फलकानामवस्थितिं पश्यति, तानि हि वर्षाकाल एव गृह्यन्ते न शेषकाले । स तु प्रविष्टः शेषकालेऽपि फलकानि गृहीतानि पश्यति, 'सेज्जा' इति शेरतेऽस्यामिति शय्या-आस्तरणं, तदास्तृतमेवास्ते । ( ओ.नि. १०३ )**

**चन्द्र.** गुर्वादिकार्यार्थं गच्छन्साधुः 'अपान्तराले ग्रामादिषु मीलिताः साधवः किं संवासयोग्याः सन्ति न वा ?' इति परीक्षार्थं बाह्याभ्यन्तरप्रत्युपेक्षणां करोति । तत्र यदि उपाश्रये शेषकालेऽपि तैः फलकानि गृहीतानि उपभुज्यमानानि च पश्यति, दिवसेऽपि आस्तरणं आस्तृतमेव पश्यति, तदा तं साधुसमूहं संवासायोग्यं जानातीति ।

**ननु** आसतां शेषसाधवः, आचार्यादयस्तु शेषकाले फलकादीनि उपभुञ्जन्त्येव, विशेषपदस्थायित्वात् । तथा दिनेऽपि तेषामास्तरणमास्तृतं भवत्येव, श्रमनिवारणार्थं निद्रायाः, तेषामनुज्ञातत्वादिति **चेत्**

न, आचार्याणामपि शेषकाले फलकादिपरिभोगेनोन्मार्गगामित्वं प्रतिपादितमस्ति गच्छाचारे आचार्यनिरुपणाधिकारे, ततश्च विशेषपदस्थायिनामपि तेषां शेषकाले फलकादिपरिभोग उत्सर्गतो निषिद्ध एव । एवं आचार्यगुणनिरुपणाधिकारे 'अल्पनिद्रः' इति गुणस्य निरुपितत्वात्, शेषसाध्वपेक्षया तेषामल्पनिद्रत्वं शास्त्राभिमतम्, ततश्च यदि शेषसाधूनामपि दिने आस्तृतमेवास्तरणं निषिद्ध्यते, तर्हि तदल्पनिद्राणां आचार्याणान्तु तन्निषेधः स्पष्ट एवेति ।

एष चोत्सर्गमार्गः । अपवादतस्तु उभयमपि आचार्यादीनां कल्पत एव । तथाहि - भूमौ उपवेशने यदि आचार्याणां अन्यतीर्थिकमध्ये गौरवहानिर्भवेत्, यथा 'एते नीचैर्वर्तिनः, अन्यतीर्थिकाश्च सिंहासनाद्युपवेशनादुच्चैस्तरा' इति, तर्हि शेषकालेऽपि फलकादिपरिभोगोऽनुज्ञायते । एवं अतिशीतोष्णकाले भूमौ उपवेशने शीतोष्णादिजन्यपीडाया असहिष्णुत्वे सति शेषकालेऽपि स अनुज्ञायते । एवमन्यान्यपि पुष्टालम्बनानि यथासम्भवमवगन्तव्यानि वर्तमानद्रव्यादिकं सम्प्रेक्ष्य । न तु शास्त्रवचनेऽपि एकान्तग्राहिणा भाव्यम्, तस्योत्सर्गापवादनिश्चयव्यवहारनय-निक्षेपादिसंवलितत्वेनानेकविधत्व-स्यावश्यंभावित्वात् ।

तथा वयोऽतिक्रमे आचार्यादयः शरीरबलवैकल्याद् दिनेऽपि निद्रान्ति, एवं

रात्रिंगतार्थचिन्तनजपजागरणाद्यनुष्ठानाचरणश्रान्तास्ते दिनेऽपि श्रमापगमाय निद्रान्ति । तथा अल्पवयस्का अपि आचार्यादयः तथाविधविषमरोगग्रस्तावस्थाः दिनेऽपि अनेकशः स्वपन्तीत्येवमादिकोऽपवादो यथासम्भवमत्रापि चिन्तनीयः ।

**( ५१ ) नित्यवास्यादयः सहितेतरे, सहिताः = संयतीभिर्युक्ताः केचन नित्यवास्यादयो भवन्ति, इतरे इत्यपरे संयतीरहिता भवन्ति, तेषु च निवसति । ये ते संयतीभिर्युक्तास्ते द्विविधाः - एके कालचारिणीभिः संयतीभिर्युक्ताः, तत्र निवसत्येव, अपरे अकालचारिणीभिः संयतीभिर्युक्ता, कश्च कालः ? पक्खिए व सज्झाए त्ति । ताः संयत्यः पाक्षिकक्षामणार्थमागच्छन्ति स्वाध्यायार्थं वा, अयं कालः शेषस्तु अकालः, तत्र वासस्तु तस्य साधोः कालचारिश्रमणीयुक्तेषु भवतीति । अथ कालचारिसंयतीयुक्ताः साधवो न सन्ति, ततः पार्श्वस्थादिषु वसति, न च वसत्यकालचारिसंयतीयुक्तेषु । ( ओ.नि. १०८-१०९ )**

**चन्द्र.** गुर्वादिकार्यार्थं निर्गतः साधुरपान्तराले रात्रौ कुत्र केन सह वसतीत्येतन्निरुपणपरं प्रकृतं शास्त्रवचनम् । तत्र चायं क्रमः प्रथमं संविग्नसमनोज्ञेषु वसतिरन्वेषणीया, तदभावे महिलारहितश्रावके, तदभावे महिलारहितभद्रकगृहस्थे, तदभावे महिलासहितगृहस्थस्य बहिरवस्थितस्थानविशेषे तद्गृहफलहिकान्तर्गतकुट्यां वा, तदभावे शून्यगृहे, तदभावे कालचारिसंयतीयुतेषु नित्यवास्यादिषु, तदभावे पार्श्वस्थादिषु वसति । न च अकालचारिसंयतीयुक्तेषु नित्यवास्यादिषु वसति ।

इत्थं च संवासमपेक्ष्य कालचारिसंयतीयुक्ताः सर्वथा संयतीरहिता वा पार्श्वस्थादय अकालचारिसंयतीयुक्तनित्यवास्यादिभ्यः सकाशाद् उत्तमा इति निर्गलितोऽर्थः ।

अत्र कश्चित्सूक्ष्मार्थावगाहननिपुणमतिकः प्रश्नयति → २०६ गाथायां

संविग्नसाम्भोगिका: नित्यवासिन: असाम्भोगिका: पार्श्वस्थादयश्च गृहीता: । तत्र संविग्नसाम्भोगिकाभावेऽन्येषां त्रयाणां मध्ये कुत्रापि निवसनं अननुज्ञाप्य स्त्रीरहितश्रावकादिपरिपाटी प्रतिपादिता । तेषामप्यभावे कालचारिसंयतीयुक्ता: नित्यवास्यादयो गृहीता: । ते च यदि अकालचारिसंयतीयुता:, ततस्तान् परित्यज्य कालचारिसंयतीयुक्तेषु पार्श्वस्थादिषु सर्वथा संयतीरहितेषु वा पार्श्वस्थादिषु निवसनमनुज्ञातम् ।

अत्र च 'कालचारिसंयतीयुता: नित्यवास्यादय:' इत्यत्र आदिपदात् केषां ग्रहणं कर्त्तव्यम्? न हि तेन पार्श्वस्थादयो गृह्यन्ते, तेषां पृथगेव गृहीतत्वात् । ततश्च अनन्यगत्या असाम्भोगिका एव गृह्यन्ते । ते च संविग्ना एव, न त्वसंविग्ना:, संविग्नेष्वेव साम्भोगिकासाम्भोगिकत्वाभ्यां द्वैविध्यस्येष्टत्वात् । यदि हि असंविग्ना अपि असाम्भोगिका भवेयु:, तर्हि पार्श्वस्थादयोऽपि असाम्भोगिका भवेयु:, ततश्चासाम्भोगिकपदेन तेषामपि ग्रहणात् तेषां पृथग्ग्रहणं निरर्थकमेवापद्येत । यदि वा पार्श्वस्थादिग्रहणेन सकलासाम्भोगिकानां ग्रहणात् असाम्भोगिकपृथग्ग्रहणं निरर्थकमा-पद्येतेति । ततश्च नित्यवासि-असाम्भोगिक-पार्श्वस्थादीनां त्रितयाणामत्र ग्रहणात् असाम्भोगिकपदेन पार्श्वस्थादिभिन्ना एव ग्राह्या:, ते च संविग्ना एव, नहि पार्श्वस्थादिभिन्ना: साधवोऽसंविग्ना भवन्तीति ।

इत्थं च नित्यवासिनां संविग्नासाम्भोगिकानां पार्श्वस्थादीनां चात्र ग्रहणं कृतमिति निश्चितम्। अत्र च नित्यवासिनां संविग्नतुल्यत्वेऽपि नित्यवासैकदोषवत्त्वेन पृथग्ग्रहणमिति बोध्यम् । तथा च नित्यवासिन: न पार्श्वस्थादय:, न वा संविग्नाऽसाम्भोगिका:, किन्तु नित्यवासैकदोषवन्तस्ते तेभ्य: पृथग्भूता: ।

अत्र च पाठे नित्यवास्यादीनामकालचारिश्रमणीयुक्तत्वं प्रतिपादितमस्ति, आदिपदात् संविग्नासाम्भोगिकग्रहणं भवतीति अस्माभिरनन्तरमेव प्रसाधितम् । ततश्च संविग्नासाम्भोगिकानामपि अकालचारिसंयतीयुक्तत्वसम्भवोऽर्थादापन्न: । एतच्च न घटते, यदि हि तेषां संविग्नत्वम्, कथं तर्हि अकालचारिसंयतीसहितत्वम्, अथास्ति तत्, कथं तर्हि संविग्नत्वम्, संविग्नताऽकालचारिसंयमिसहितत्वयो: वह्निजलयोरिव एकत्रावस्थानासम्भवादिति । तथा च अकालचारिसंयतीविरहिता: सर्वथा वा संयतीविरहिता: पार्श्वस्थादयो हि अकालचारिसंयतीसहितेभ्य: संविग्नासाम्भोगिकेभ्य: सकाशादुत्तमा इत्यापन्नम् ← इति ।

अत्र समाधीयते । पार्श्वस्थत्वादिकं संविग्नत्वादिकं च निश्चयतस्तत्तदध्यवसायरुपमपि व्यवहारतोऽत्र तत्तद्दोषगुणसेवनादिरुपं पारिभाषिकमेव ग्राह्यम् । न चैतदागमाननुपाति,

आगमे पार्श्वस्थादीनां नियतदोषसेवनादेः स्पष्टं प्रतिपादितत्वात् । इत्थं चाकालचारिश्रमणीयुक्तानामपि असाम्भोगिकानां पार्श्वस्थाद्युचितदोषसेवनाद्यभावात् न पार्श्वस्थत्वादिकं, तदभावे च साधुलिङ्गधारिणां तथाविधसाध्वाचारपरिपालकानां च तेषां संविग्नत्वमनन्यगत्याऽऽपन्नमेवेति । न चाकालचारिसंयतीयुक्तानां तेषां संविग्नत्वं दूरापास्तमेवेति शङ्कनीयम् । निर्दोषगोचरीचर्यादिरुपस्य पारिभाषिकसंविग्नत्वस्य अकालचारिसंयत्यसहित-त्वाद्यघटितस्य तेष्वनपायात् । इत्थं च पारिभाषिकसंविग्नतासहितानां तेषां संवासमपेक्ष्य पार्श्वस्थादिहीनत्वमपि न दुर्घटम् । यथा हि सम्यक्त्वमपेक्ष्योत्तमानां श्रेणिकादीनां चारित्रमपेक्ष्य साधुहीनत्वमपि सम्भवति, तथैव संविग्नतामपेक्ष्योत्तमानां असाम्भोगिकानां अकालचारिसंयतीसहितत्वमपेक्ष्य पार्श्वस्थादिहीनत्वमपि सम्भवतीति मध्यस्थेन चेतसा निभालनीयम् ।

यदि चैवमपि संविग्नताऽकालचारिसंयतीयुतत्वयोः परस्परं विरोध एव मनसि स्फुरति, तदा तु कालचारिसंयतीयुतत्वे सर्वथा संयतीरहितत्वे च नित्यवासिनां 'नित्यवास्यादयः' इत्यत्रादिपदग्राह्यसंविग्नासाम्भोगिकानां चान्वयः कर्त्तव्यः, अकालचारिसंयतीयुतत्वे तु केवलं नित्यवासिनामेवान्वयः, न तु संविग्नासाम्भोगिकानामिति यथासमाधानमूहनीयम् । अस्माकन्तु पारिभाषिकसंविग्न-त्वमपेक्ष्य संविग्नासाम्भोगिकानामपि अकालचारिसंयतीयुतत्वपदार्थे एव निर्भरः पूर्वापरपर्यालोचनान्मनसि परिस्फुरति, तथाऽपि यद् वदन्ति बहुश्रुतगीतार्थाः, तदेवास्माकमपि प्रमाणमित्यलमधिकेन ।

**ननु** नित्यवास्यादीनां श्रावकादीनां च मध्ये प्रथमं श्रावकादिषु संवासः किमर्थं ? नित्यवास्यादिषु साधुष्वेव प्रथमं स उक्तो युक्त इति **चेत्**

न, श्रावकादयोऽप्यत्र स्त्रीरहिता एव गृहीताः, नित्यवास्यादयश्चापि तादृशाः, ततश्चोभयत्र स्त्रीजन्यदोषानवकाशः, परन्तु नित्यवास्यादिषु संवासे सति तत्सेवितदोषाणां संविग्नसाधौ समारोपणम्, साधुत्वसमानतायामपि चाचारभेददर्शनतो लोके मतिभेदादिकमित्येवमादयो दोषा अधिका इति तन्निरासार्थं स्त्रीरहितश्रावकादिषु प्रथमं संवसनमनुज्ञातमित्यनुमीयते । यथायोगमन्यान्यपि कारणानि अत्र सम्भावनीयानि ।

**(५२) यः पार्श्वस्थादौ वसतो विधिः प्रतिपादितः, एवमेव अहाछन्देऽपि विधिर्दृष्टव्यः, केवलमयं विशेषः- तस्याहाछन्दस्य धर्मकथां कुर्वतोऽसन्मार्गप्ररूपिकां तेन साधुना प्रतिहननं व्याघातः कर्त्तव्यः, यथैतदेवं न भवति, अथ तद्धर्मकथायाः प्रतिघातं कर्तुं न शक्नोति ततो ध्यानं करोति, ध्यायन्नास्ते धर्मध्यानम्, अथ तथाऽपि धर्मकथां करोति, ततः धर्मकथाव्याघातार्थमध्ययनं करोति, अथ तथाऽपि न तिष्ठति, ततः कर्णौ स्थगयति धर्मकथाव्याघातार्थमिति । अथवा सुप्तः सन्घोरयति - घोरणं करोति, महता शब्देन, सोऽपि निर्विण्णः सन्नुपसंहरति धर्मकथामिति । ( ओ.नि. १११ )**

**चन्द्र.** सर्वोऽप्येष आयासः 'यथाच्छन्दस्योत्सूत्रप्ररुपणा स्वस्य परस्य च कर्णकोटरे मा प्रविशतु' इत्येतदर्थः । आस्तां तावत्तद्धर्मकथाश्रवणम्, दर्शनमपि तेषां प्रतिषिद्धं, तदाह 'संबोधसित्तरिग्रन्थे **उम्मग्गदेसणाए चरणं नासंति जिणवरिंदाणं । वावण्णदंसणा खलु न हु लब्भा तारिसा दट्ठुं**' इति । निह्नवाः उन्मार्गदेशनया स्वस्य परस्य च जिनवरेन्द्रसत्कं चारित्रं नाशयन्ति, ते चोत्सूत्रप्ररुपणाद् व्यापन्नसम्यग्दर्शनाः सन्तो दृष्टुमपि न कल्पन्त इति एतद्गाथासङ्क्षेपार्थः । यथाच्छन्दानां तु अपेक्षया निह्नवतोऽपि हीनतरत्वस्य धर्मपरीक्षादौ प्रतिपादनात्सुतरां दर्शनानर्हत्वमिति ।

इदमत्र स्पष्टीकर्त्तव्यं – पार्श्वस्थादयो हि कथञ्चिदाचारभ्रष्टाः सन्तोऽपि सम्यग्दर्शिनोऽपि सम्भवन्ति, चारित्रमोहोदयजन्ये क्रियामान्द्येऽपि मिथ्यात्वमोहक्षयो-पशमजन्यायाः जिनवचनश्रद्धाया अक्षतत्वसम्भवात् । यथाच्छन्दास्तु आचारयुक्ताः सम्भवन्तोऽपि मिथ्यात्विनो भवन्ति, तथाविधस्पृहादिवशतः क्रियोद्यमे सत्यपि मिथ्यात्वमोहोदयजन्यायास्तथाविधोत्सूत्रप्ररुपणायाः सम्यक्त्वविनाशकत्वात् ।

तथा पार्श्वस्थादयः संविग्नपाक्षिकत्वसम्भवे ससूत्रप्ररुपणाकारित्वात् न परेषां शिथिलाचार-मिथ्यात्वादिदोषापादकाः । यथाच्छन्दास्तु उत्सूत्रप्ररुपणाकारित्वात् आचारसहितानामपि परेषां मिथ्यात्वापादनेनाधिकदोषा इति अन्यदपि सूक्ष्ममूहनीयमिति ।

**( ५३ ) वर्षासु उद्भिन्ना बीजादयः आदिशब्दादनन्तकायः, तेन कारणेनापान्तराल एव तिष्ठति, तत्र च वर्षाकालप्रतिबन्धाद् ग्रामादौ तिष्ठन् किं करोति ? चिकित्सकः-वैद्यस्तमापृच्छति यथा त्वया ममेह तिष्ठतो मन्दस्य भलनीयम् । ( ओ.नि. ११४ )**

**चन्द्र.** इदमत्र बोध्यम् । वर्षाकालेन विहारप्रतिबन्धो द्विधा भवति । जीवोत्पत्त्या कालपूर्त्या च । तत्र यद्यपि आषाढीचतुर्दशीं यावद् विहारो न निषिद्धः, तथाऽपि प्रागेव प्रचुरवर्षादिकारणतः सर्वत्र अनन्तकायाद्युत्पत्तौ सत्यां विहारप्रतिबन्धो भवति । अत्र च कालापूर्तौ अपि जीवोत्पत्त्या विहारः प्रतिबद्धः । यत्र च वर्षाऽभावाज्जीवोत्पत्त्यभावेऽपि आषाढीचतुर्दशी समागता, तत्र कालपूरणादेव विहारप्रतिबन्ध इति । अयं चोत्सर्गः, अपवादतस्तु सति आगाढकारणे जीवोत्पत्तावपि कालपूर्तावपि च विहारोऽनुज्ञातः, केवलं कालपूर्तावपि विहारकरणे प्रयोजकस्य तथाविधकारणस्य पुष्टत्वापेक्षया जीवोत्पत्तावपि विहारकरणे प्रयोजकस्य कारणस्य पुष्टतरत्वमपेक्षणीयमिति ।

इत्थं च कालापूर्तावपि जीवोत्पत्तौ सत्यां विहारादिकरणे जिनाज्ञाभङ्गादयो दोषाः स्फुटा एवान्यत्रापवादस्थानमिति निश्चेयम् ।

**( ५४ ) तत्र च तिष्ठन् किं करोतीत्यत आह - दण्डकादिकमाचार्यं कल्पयति निराबाधे प्रदेशे अयं ममाचार्य इति । तस्य चाग्रतः सकलां चक्रवालसामाचारीं प्रयुङ्क्ते, निवेद्य करोतीत्यर्थः । ( ओ.नि.११५ )**

**चन्द्र.** वर्षादिप्रतिबन्धतोऽपान्तरालग्रामादौ तिष्ठन् एकाकी निर्गतः साधुः तत्र निराबाधे प्रदेशे दण्डकादिकमाचार्यं कल्पयति = स्थापयतीत्यर्थः । मासचतुष्टयं च यावत्तमेव

गुरुमिव मत्वा सकलामपि सामाचारीं तदग्रतः निवेद्य करोतीति ।

**ननु** किं तत्समीपे स्थापनाचार्याः अक्षादिरुपाः न सन्ति ? येन स दण्डकमाचार्यत्वेन कल्पयतीति **चेत् सत्यं,** न सन्त्येव स्थापनाचार्यास्तत्समीपे । यतो हि गच्छे भावाचार्याणां विद्यमानत्वात्तत्र सर्वे साधवो भावाचार्याग्रतो सकलां सामाचारीं निवेद्य कुर्वन्तीति साधूनां तावत्स्थापनाचार्यप्रयोजनं प्रायो न भवत्येव । भावाचार्याणान्तु गुर्वभावात् स्थापनाचार्यप्रयोजनं भवति । अत एव स्थापनाचार्याः आचार्योपधिरुपा निगद्यन्ते, न साधूपकरणान्तर्गता इति ।

किञ्च साधवोऽपि यदि स्थापनाचार्यान् गृह्णन्ति, तदा प्रभूतानां स्थापनाचार्याणां प्रयोजनं भवेत् ते च तथाविधाक्षादिरुपाः निर्दोषास्तु दुर्लभा एवेति आधाकर्मादिदोष-करणादौ तु महान् संयमपलिमन्थ इत्येवमादिकारणमपि साधूनां स्थापनाचार्याभावे दृष्टव्यम् । अत एव कारणवशतो गच्छान्निर्गतः साधुः अपान्तराले परिवसन् दण्डकं आचार्यत्वेन संस्थाप्य तदग्रे सकलां सामाचारीं निवेद्य करोतीत्येतन्निर्दोषमेवेति ।

एतच्च तत्त्वं निगदितम्, व्यवहारतस्तु वर्तमानां तत्तद्गच्छसामाचारीमनुसृत्य तत्तद्गच्छीयैः प्रवर्तितव्यमिति ।

**(५५) चक्रं-धर्मचक्रं, स्तूपो मथुरायां, प्रतिमा-जीवन्तस्वामिसम्बन्धिनी पुरिकायां पश्यति, जन्म-यत्रार्हतां सौरिकपुरादौ व्रजति, निष्क्रमणभुवं-उज्जयन्तादिं द्रष्टुं प्रयाति, ज्ञानं यत्रैवोत्पन्नं तत्प्रदेशदर्शनार्थं प्रयाति, निर्वाणभुमिदर्शनार्थं प्रयाति । संखडी-प्रकरणं तदर्थं व्रजति, विहारार्थं व्रजति, स्थानाजीर्णं ममात्र । यस्मिन्विषये स्वभावेनैव चाहारः शोभनस्तत्र प्रयाति । अमुकत्र विषये उपधिः शोभनो लभ्यत इत्यतः प्रयाति, तथा रम्य-देशदर्शनार्थं व्रजति ।**

**एतान्यकारणानि संयतस्य ? किंविशिष्टस्य ? असमाप्तसूत्रार्थोभयस्य संयतस्य भवन्ति अकारणानीति । तान्येव धर्मचक्रादीनि कारणानि**

**भवन्ति, कस्य ? गीतार्थविहारिण: सूत्रार्थोभयनिष्पन्नस्य दर्शनादिस्थिरीकरणार्थं विहरत इति । ( ओ.नि. १२०-१२१ )**

**चन्द्र.** सुगमार्थं सर्वम् । नवरं स्वरुपत: शोभनान्यपि कारणान्यगीतार्थ-स्याशोभनानि, स्वरुपतोऽशोभनान्यपि कारणानि गीतार्थस्य शोभनानीति निर्गलितार्थ: । अगीतार्थस्यापि गीतार्थनिश्रया सर्वाण्यपि कारणानि कल्पन्त एवेति तु अग्रिमगाथायां 'बिइओ गीयत्थमीसिओ भणिओ' इति पदेन स्पष्टमेवेति ।

## ( ५६ ) हरितं तत्र शाकादि बाहुल्येन भक्ष्यते, तच्च साधूनां न कल्पते । ( ओ.नि. १३४ )

**चन्द्र.** क्षेत्रेषु यन्मासकल्पायोग्यत्वं चातुर्मासकल्पायोग्यत्वं च भवति, तत्प्रयोजकदोष-मध्येऽयमेको दोष: यदुत तत्र क्षेत्रे शाकादि बहुलतया लोकैर्भक्ष्यन्ते, साधूनां च तन्न कल्पत इति तत्र वासो न करणीय इति भाव: ।

**ननु** आधाकर्मिकं शाकादि मा कल्प्यताम्, निर्दोषे तु तस्मिन्को दोष ? इति **चेत्** लौल्यम्, तज्जन्यं अनुमोदनम्, तत्प्रयोज्यं आधाकर्मकारापणम्, अधिकभक्षणजन्या रोगा इत्येवमादीन् दोषान् पश्यत ।

**ननु** शाकादीनामकल्प्यत्वात्तद्भक्षणमेव निवारणीयम्, न तु तद्भक्षकलोकयुत-स्थाननिवसनमपि, तस्य निर्दोषत्वादिति **चेत्** न, प्रतिदिनं गृहेषु शाकादिदर्शनतस्तद्ग्रहणाभिलाष: प्रायोऽनिवार्य:, भिक्षान्तराप्राप्तौ च तद्ग्रहणमवश्यम्भावि, तत्र च लौल्यादयो दोषास्तदवस्था एव, तस्मात् साधूनां स्वयं शाकादिभक्षणवत् शाकादिभक्षकलोकयुतस्थाननिवसनमपि उत्सर्गतो निषेधनीयमेवेति ।

## ( ५७ ) स्तुतिमङ्गलं कृत्वा - प्रतिक्रमणस्यान्ते स्तुतित्रयं पठित्वा ततश्चामन्त्रयति । ( ओ.नि. १३८ )

**चन्द्र.** आचार्यः क्षेत्रान्तःसङ्क्रान्त्यादिकार्यार्थं गच्छं कदाऽऽमन्त्रयतीत्येतदत्राह **स्तुतिमङ्गलं** इत्यादि । स्तुतित्रयं 'नमोऽस्तु वर्धमानाय' इत्यादिरुपम् ।

अत्र च 'प्रतिक्रमणस्यान्ते स्तुतित्रयं' इतिवचनेन ज्ञायते यदुत प्राचीनकाले षडावश्यकपर्यन्त एव प्रतिक्रमणविधिरासीत् स्तवनदैवसिकप्रायश्चित्तकायोत्सर्ग-स्वाध्यायदुःखक्षयकर्मक्षयनिमित्तककायोत्सर्गादयः संविग्नगीतार्थपरम्परायाताः सुविहितानां जीतव्यवहारतया समादरणीया इति ।

## ( ५८ ) इदानीं बालादीनां प्रेषणार्हत्वे प्राप्ते यतना प्रतिपाद्यते -तत्र च गणावच्छेदकः प्रेष्यते, तदभावेऽन्यो गीतार्थः, तदभावेऽगीतार्थोऽपि प्रेष्यते, तस्य को विधिः, अगीतार्थस्य सामाचारी कथ्यते, ततः प्रेष्यते, तदभावे योगी प्रेष्यते, किंविशिष्टः ? अनागाढयोगी - बाह्ययोगी, योगं निक्षिप्य भोजयित्वा प्रेष्यते, ततस्तदभावे क्षपकः प्रेष्यते, कथं ? भोजयित्वा, तदभावे वैयावृत्त्यकरः, - स च वैयावृत्त्यकरः कुलानि दर्शयति, तदभावे युगलं प्रेष्यते वृद्धस्तरुणसहितः बालस्तरुणसहितो वा – । ( ओ.नि. १४२-१४३ )

**चन्द्र.** क्षेत्रप्रत्युपेक्षणार्थं के प्रेषणीया इति विचारणायां बालः वृद्धः अगीतार्थो योगवाही वैयावृत्यकरस्तपस्वी चैते साधवः प्रेषणानर्हा निगदिताः । तेभ्योऽन्ये प्रेषणीया इति भावः।

परन्तु यदा अन्येषां क्षेत्रप्रत्युपेक्षणाय प्रेषणं न सम्भवेत्, तर्हि अपवादत एते बालादय एव प्रेषणीयाः, तत्र च केन क्रमेण तत्प्रेषणं कार्यमित्यत्र निगद्यते ।

बालादीनां षण्णां मध्ये यो गणावच्छेदकः, स प्रेषणीयः, तस्यावश्यं गीतार्थत्वात् क्षेत्रप्रत्युपेक्षणादिकार्यकुशलत्वात् प्रेषणार्हतमत्वम् । स च गणावच्छेदको बालो वृद्धो योगवाही वैयावृत्त्यकरः तपस्वी वा सम्भवति, न तु अगीतार्थः, अगीतार्थस्य गणावच्छेदकत्वनिषेधात् ।

यदि च षण्णां मध्ये न कोऽपि गणावच्छेदकः, तर्हि षण्णां मध्ये यो गीतार्थः, स प्रेषणीयः, तस्य गीतार्थत्वेनेतरापेक्षया प्रेषणार्हतरत्वम् । स च गीतार्थः बालः वृद्धो योगवाही वैयावृत्यकरस्तपस्वी वा सम्भवति, न तु अगीतार्थः, गीतार्थागीतार्थतयोः परस्परं विरोधात् ।

यदि च षण्णां मध्ये न कोऽपि गीतार्थः, तर्हि षण्णां मध्ये य अगीतार्थः, स प्रेष्यते। अत्र यद्यपि षडपि अगीतार्था एव, तथाऽपि बालादीनां अगीतार्थताबालत्वादयो बहवो दोषाः, केवलमगीतार्थस्य अगीतार्थत्वात्मक एक एव दोष इति स प्रेष्यते । स च सामाचारीकथनेन क्षेत्रप्रत्युपेक्षणायां गीतार्थः क्रियते, तदभावे योगी प्रेष्यते... इत्यादिविधिः सुबोध्य एवेति ।

## (५९) एतदसौ साधुर्ब्रवीति - न वयं दोसीणं चिअ याचयामः, किन्तु दधि याचयामः, तथा क्षीरं याचयामः इति । (ओ.नि. १४७)

**चन्द्र.** क्षेत्रप्रत्युपेक्षणार्थं गतः साधुः केन प्रकारेण प्रवर्तते इति विधिंप्रतिपादयन्नाह **एतदसौ इत्यादि** ।

**ननु** याचना तु साधूनां निषिद्धा, श्रावकाः स्वयमेव यद् ददति, तदेव तैर्ग्राह्यम्, न तु याचना करणीयेति **चेत्**

केनेदं तव कर्णे जल्पितं ? 'सव्वंपि से जाइयं होइ, नत्थि किंचि अजाइयं' इति उत्तराध्ययनद्वितीयाध्ययनवचनात् साधूनां सर्वमपि अशनादिकं याचितमेव भवति, न त्वयाचितमिति । किञ्च वसत्यादियाचना तु साधुना क्रियमाणा प्रसिद्धैव, तथाऽत्रैव साक्षाद्

दधिक्षीरादियाचना प्रदर्शितेति साधूनां याचना न कल्पते इति वचनं एकान्तेन न ग्राह्यम् । या तु साधूनां याचनायाः अकल्पनीयता श्रूयते, सा लौल्यादिवशतः क्रियमाणां शासनापभ्राजनाप्रयोजिकां वा याचनामपेक्ष्य विज्ञेया, बालाद्यनुकूलक्षेत्रप्रत्युपेक्षणार्थं विधिना क्रियमाणा दुग्धदध्यादियाचना तु निःस्पृहपरिणामजन्यत्वात् हीलनाद्यप्रयोजकत्वाच्चोपादेयैवेति दृढं विश्वास्यम् ।

**( ६० ) वसतिस्तु कीदृशे स्थाने कर्त्तव्या कीदृशे च न कर्त्तव्येति व्याख्यानयन्नाह - तत्र वामपार्श्वोपविष्टपूर्वाभिमुखवृषभरुपं क्षेत्रं कल्पयित्वा तत इदमुच्यते - शृङ्गप्रदेशे यदि वसतिं करोति. ततः कलहो भवतीति क्रियां वक्ष्यति । 'स्थानं' अवस्थितिर्न तच्चरणेषु - पादप्रदेशेषु, अपानप्रदेशे वसतौ क्रियमाणायामुदररोगो भवतीति क्रिया सर्वत्र योजनीया । पुच्छप्रदेशे अपनयनं भवति वसत्याः, मुखमूले चारी भवति, शिरसि शृङ्गयोर्मध्ये ककुदे च पूजासत्कारो भवति । स्कन्धे पृष्ठे च भारो भवति, साधुभिरागच्छद्भिराकुला भवति, उदरप्रदेशे तु नित्यं तृप्त एव भवति क्षेत्रवृषभः । ( ओ.नि. भा. ७६-७७ )**

**चन्द्र.** एतच्च सर्वं प्रायः सुबोधम् । नवरं केषाञ्चिदयं मतिभ्रमो विद्यते यदुत → उपाश्रयाभ्यन्तरे एव पूर्वोक्तं बलीवर्दं कल्पयित्वा तदनुसारेणैतत्कथनं सम्भावनीयम् ← इति । एतच्च निर्युक्तिकं, शास्त्रबाधितञ्च ।

तथा हि "वसतिस्तु कीदृशे स्थाने कर्त्तव्या...." इति वचनादेव ज्ञायते यदुत उपाश्रयः ग्रामान्तः कुत्र स्थाने ग्राह्यः ? कुत्र च न ग्राह्यः ? इति । ततश्च बलीवर्दो ग्रामव्यापी कल्पनीयः, न तु उपाश्रयव्यापीति स्पष्टमेव ।

तथाऽत्रैव ग्रन्थेऽग्रे वसत्यपरनामक उपाश्रयस्त्रिविधो वक्ष्यते, तत्र यस्मिन्नुपाश्रये, सकलसाधूनां शास्त्रोक्तक्षेत्रार्पणानन्तरं कोऽपि भागो रिक्तो नावशिनष्टि, तत्र

प्रथममवस्थानमनुज्ञातम्, तदभावे संकीर्णोपाश्रये, तस्य चाभावे महत्युपाश्रये, यत्र भागो रिक्तोऽवशिनष्टि। इत्थं च उपाश्रये रिक्तभागोऽवशिष्टो भवेदिति उत्सर्गतो न शास्त्रानुमतमिति सिद्धं । तथा च यदि उपाश्रयान्तः एव बलीवर्दः कल्पनीयः स्यात्, तर्हि बलीवर्दपादादिभागा उपाश्रये रिक्ता एव भवेयुः, तत्र साधूनामवस्थानाननुज्ञानात् । तथा च स्पष्टमेव शास्त्रविरोधः, एकत्रोपाश्रये रिक्तभागानुज्ञानादपरत्र च तन्निषेधादिति ।

किञ्च युक्त्याऽपि नैष मतिभ्रमः सद्भूत आभाति । तथा हि - उपाश्रये एव बलीवर्दो यदि कल्पनीयः स्यात्, तर्हि तत्तल्लाभार्थिनां साधूनां तत्तत्स्थानोपवेशनाग्रहाद् महान्कलहः स्यात्, तथा च भावसंयमहानिः ।

अयं भावः उदरभागेऽवस्थानात् उत्तमभोजनावाप्तिरिति जानन्तः सर्वे उत्तमभोजनार्थिनः उदरभागेऽवस्थातुमिच्छेयुः, ततश्च भवेदेव कलहः, न चैतादृशं कलहोत्पादकमाचारं प्रवदन्ति महर्षय इति ।

एवमन्यदपि बहुकमत्र वक्तव्यमस्ति, परमेतावदेवाधुना पर्याप्तम्, तस्मात् निश्चेतव्यमेतद् यदुत "पूर्वाभिमुखः वामपार्श्वोपविष्टो बलीवर्दो नोपाश्रयान्तः कल्पनीयः, किन्तु लोकनिवासाक्रान्तो यावान् ग्रामभागः, तावन्तं भागं आश्रित्य तादृशो बलीवर्दः कल्पनीय" इति ।

**( ६१ ) शय्यातरेण पृष्टाः सन्तस्ते नैवं वदन्ति - एष्यामो न वा एष्याम इति । यत एवं भणने दोषः, किं कारणं ? यद्येवं भणन्ति यदुतागमिष्यामः, ततश्च शोभनतरे क्षेत्रे लब्धे नागच्छन्ति, ततश्चानृतदोषः । अथ भणन्ति - नागमिष्यामः, ततश्च कदाचिदन्यत्क्षेत्रम् न परिशुध्यति, ततश्च पुनस्तत्रागच्छतां दोषोऽनृतजनितः । ( ओ.नि. १५७. )**

**चन्द्र.** क्षेत्रप्रत्युपेक्षकाः क्षेत्रप्रत्युपेक्षणानन्तरं शय्यातरेण पृष्टाः सन्तः कथं प्रत्युत्तरन्तीत्येतदत्र निगदितम् । तत्रागमनस्यानागमनस्य वा निकाचनायां कारणवशतस्तदकरणे मृषावादादिदोषसम्भव इत्यतस्तादृशं निकाचनं न करणीयमिति ।

नन्वधुनाऽष्टभ्यो दशादिभ्यो वा मासेभ्यः पूर्वमेवागामिचातुर्मासस्थाननिकाचनं क्रियमाणं दृश्यते, तत्र किं मृषावादादिदोषा न लगन्ति ? इति **चेत्**

निकाचनायान्तु लगन्त्येव मृषावादादिदोषाः, कस्तत्र निषेद्धुं शक्नुयात् ? परन्तु "यदि द्रव्यादिप्रातिकूल्यं कथञ्चिद् भवेत्, तर्हि अस्माकमागमनं न सम्भवेत् तदनुकूलतायान्तु सम्भवेदित्येवं आगमनं विभजनीयमेव" इत्येवं सापेक्षवचने तु न मृषावादादिदोषः ।

यद्यप्येवं मृषावाददोषपरिहारेऽपि चातुर्मासिकक्षेत्रप्रत्युपेक्षणं विनैव सापेक्षवचनेऽपि सम्भवन्त्येव क्षेत्राप्रत्युपेक्षणजन्याः संसक्तवसत्यादिदोषाः, न हि क्षेत्रप्रत्युपेक्षणं विना "तत्र वसतिः संसक्ता न वा ? तत्र प्रायोग्यद्रव्याणि सुलभानि न वा ?, तत्र स्थण्डिलभूमिर्निर्दोषा न वा ?" इत्यादि सम्यग्ज्ञातुं पार्यते, न च तज्ज्ञानं विना चातुर्मासिकक्षेत्रनिर्णयनं कर्तुं युक्तम्, तथाऽपि मासकल्पादिसामाचारीणां क्षेत्रप्रत्युपेक्षणादीनां चाधुना प्रायोऽदृश्यमानत्वात्, विलम्बकरणे संयमाद्यनुकूलक्षेत्रलाभनिष्फेटनसम्भवात् सापेक्षवचनेनानागतमपि क्षेत्रनिकाचनं कथञ्चिदपवादतो-ऽदुष्टमल्पदोषं वेति प्रतिभाति । केवलमेतादृशनिकाचनमपि संयमस्वाध्यायानुकूलतासम्भवं प्रधानीकृत्य कर्त्तव्यम्, न त्वन्यदपुष्टमैहिकं वस्तु प्रधानीकृत्येति दृढं मनसि स्थिरीकर्त्तव्यम् ।

## (६२) क्षेत्रप्रत्युपेक्षका गुरुसमीपमागच्छन्तोऽन्येन मार्गेणागच्छन्ति, कदाचित्स शोभनतरो भवेत्, ते हि सूत्रपौरुषीम-कुर्वन्तः यान्ति, मा भून्नित्यवासो गुरोरिति, किं कारणं ? यतस्तेषां विश्रब्धमागच्छतां मासकल्पोऽधिको भवति, ततश्च नित्यवासो गुरोरिति । (ओ.नि. १५७)

**चन्द्र.** नन्वाश्चर्यमिदं यदुताधिकमासकल्पे नित्यवासदोषः इति । यावज्जीवमेकत्र वासो हि नित्यवासो यतेः, नहि द्वित्रिचतुरादिदिनाधिकमासनिवासे नित्यवासदोषो वक्तुं योग्य इति चेन्न, एकत्र क्षेत्रे निष्कारणं शास्त्रोक्तकालादधिककालनिवासो नित्यवास इति हि शास्त्रमर्यादा, ततश्च रूढ्यर्थमपेक्ष्य निष्कारणमेकादिदिनाधिकमासनिवासेऽपि नित्यवासदोषकथनं निर्दोषमिति ।

**( ६३ ) प्रथमद्वितीययोः क्षेत्रयोः प्रचुरभक्तपानकेभ्यः सकाशाद् बलवान् भवति, बलिनश्च मोहोद्भवो भवति - कामोद्भवो भवतीत्यर्थः । आह-एवं तर्हि यत्र भिक्षा न लभ्यते तत्र प्रयान्तु, उच्यते दुर्बलदेहः-कृशशरीरो न साधयति - नाराधयति योगान् - व्यापारान्, यतस्ततो मध्यमबलाः साधव इष्यन्ते । ( ओ.नि. १६३ )**

**चन्द्र.** प्रथमक्षेत्रे प्रथमपौरुष्यामेव द्वितीये च द्वितीयायामेव प्रचुरभक्तपानलाभः, ततश्च तदन्यतरनिवासे प्रचुरभक्तपानाद् भवति साधुः बलिष्ठः, तस्य च कामोद्रेको भवेत् । तस्मादेतादृशे क्षेत्रे न वसनीयम्, तत्र साधोर्बलवत्ता तज्जन्यः कामोद्भवश्च स्यात् । तथा सर्वथा भिक्षाऽभावे शरीरकार्श्यात्संयमसाधनाऽपि दुष्करेति तादृशेऽपि न वसनीयम्, किन्तु यत्र साधवो मध्यमबला भवन्ति, तत्र निवसनीयमिति वृत्तिभावार्थः ।

**ननु** एवं सति यत्र भक्तिमतां श्रीमतां बहुषु गेहेषु विकृत्यादिलाभो भवति, तत्र न वसनीयम् । तथा यत्र प्रतिदिनं प्रचुरमिष्टान्नविकृत्याद्याप्तिर्भवति, तत्र तीर्थभूमिषु सामूहिकचातुर्मासे न वस्तव्यम्, छ'रीपालितसङ्घेषु न गन्तव्यम्, न वा एकोनशतयात्राकर्मणि सिद्धाचलादिसम्भविनि निवासः कर्त्तव्यः, यत्र चैकान्तरितदिने विकृतिसदृशानि प्रचुराणि निर्विकृतिकानि लभ्यन्ते, तत्रापि श्रावकोपधानविधौ न स्थिरता कर्त्तव्येति श्रीमत्सङ्घचातुर्मासछ'रीपालितसंघसिद्धाचलादि-यात्राकर्मश्रावकोपधानादीनि श्रावकाणां सम्यक्त्वादिवर्धकान्यनुष्ठानानि विच्छिद्येरन्, साधूनां तत्रावस्थानस्यानुचितत्वात्, साध्वभावे च तेषामसम्भवप्रायत्वादिति । न चैषां विच्छेदोऽप्युचितः, प्रचुरश्रावकाणां सम्यक्त्वाद्युच्छेदप्रसङ्गात् । किञ्चैतादृशानुष्ठानेभ्यः संजातविरतिपरिणामा बहवः प्रव्रजन्तीति तदभावे प्रव्रज्याया अपि हानिरिति श्रमणश्रमणीसङ्घवृद्धिरपि निरुद्धा स्यात्, ततश्च जिनशासनोन्नतिरपि दूरापास्ता स्यात्, श्रमणश्रमणीसङ्घाधीनत्वात्तस्याः । इत्थं चात्र किं कर्त्तव्यमिति सन्देहदोलादोलायमानं मे हृदयं कथं निःसंदेहं निश्चलं च स्यात् ? श्रावकहिताय प्रकृतानुष्ठानकारापणे प्रस्तुतपाठानुसारेण साधूनामहितसम्भवो दुर्वारः, साधुहितरक्षणार्थं प्रकृतानुष्ठानत्यागे तु श्रावकश्राविकावर्गे रत्नत्रय्याराधनोपेक्षिता स्यादिति **चेत्**

अत्रोच्यते । स्वहितस्य परहितस्योभयस्यानुपेक्षणीयत्वात्कश्चिन्मध्यमः पन्थाः गवेषणीयः, स चायं परिस्फुरत्यस्माकं । श्रीसूर्याभदेवेन भक्तिभरमानसेन नाट्यप्रदर्शनार्थं प्रभोरनुमतिर्याचिता । तत्र च यद्यनुमतिर्दीयेत, तर्हि सूर्याभदेवस्य भक्तिरनिरुद्धप्रसरा स्यात्, परन्तु गौतमादिमुनीनां नाट्यादिदर्शने स्वाध्यायादिहानिः स्यात् । इत्थं च साक्षात्तदनुमतिः साध्वहितप्रयोजकत्वान्नोचितेति सा न कर्त्तव्या । यदि च स्पष्टं निषेधः क्रियेत नाट्यकरणस्य, तर्हि सूर्याभभक्तिः कुण्ठिता स्यात्, एतदप्यनुचितमिति नाट्यकरणनिषेधोऽपि न श्रेयान् । ततश्च 'इतो व्याघ्रः इतस्तटी' इति न्यायापातात् भगवता अनुमतिं निषेधं च द्वयमपि उपेक्ष्य मौनमेव समाश्रितम्, परन्तु तन्मौनं अर्थापत्याऽनुमतिबोधकमेव शास्त्रे ज्ञापितम्, प्रज्ञापनीयेऽनिषिद्धस्यानुमत-त्वावश्यम्भावात्।

भवतु नामेवं साक्षान्नाट्यानुमत्यभावेऽपि अर्थापत्याऽनिषेधरूपया तदनुमतिः, परन्तु तथा तत्र नाट्यं भवत्येव, ततश्च साधूनां स्वाध्यायादिहानिदोषोऽनिवारितप्रसरः स्यादेव । तत्किं स दोषः भगवतामनुमतो भवेत् ? किं स्वाध्यायादिहानिदोषप्रयोजक-नाट्यकरणं अनिषेधेनाऽर्थापत्याऽनुमन्यमानेन भगवत स दोषोऽप्यर्थापत्याऽनुमतो भवेत् ? इति प्रश्नः । नहि भगवान् एतद्दोषमनुजानातीति सम्भाव्यते । ततश्च तत्र साधवः किं कुर्वन्तीति प्रश्ने कल्प्यते समाधानं यदुत ते तत्स्थानान्निर्गत्यान्यत्र स्वाध्यायादिकं कुर्वन्ति, यदि वा परिणताः साधवस्तत्रैव नाट्यदर्शनेऽनपेक्षाः स्वाध्यायव्यापृता भवन्तीति न सूर्याभभक्तिनिरोधो, न वा साधूनां स्वाध्यायादिहानिरिति अयं मध्यमो मार्गस्तत्र सम्भाव्यते ।

एतदेवात्राप्यनुसन्धेयम् ।

तथाहि - गुरवस्तीर्थकरतुल्याः, श्रावकश्राविकादयः सूर्याभतुल्याः, शिष्यास्तु तीर्थकरसाधुतुल्याः । तत्र गुरवो यदि श्रावकादीन् उपधानादीन्यनुष्ठानानि निषेधयेयुः, तर्हि तेषां सम्यक्त्वादिगुणहानिः, यदि च तानि अनुमन्येरन्, तर्हि साधूनां प्रचुरविकृत्यादिभक्षणजन्यविकारादिदोषापत्तिरिति गुरुभिस्तीर्थंकरदृष्टान्तमनुसृत्य न निषेधः कर्त्तव्यः, न वा साक्षादनुमतिः कर्त्तव्या । परन्त्वर्थापत्त्या तत्रानुमतिरेवावशिष्टा भवेत्, ततः श्रावकादयस्तान्यनुष्ठानानि कुर्युरेव । तत्र च साधुभिः किं कर्त्तव्यमिति प्रश्ने तदनुष्ठानासाहाय्यका मुनयस्तत्र न वसन्ति, परन्तु गुर्वनुज्ञयाऽन्यत्र निवसन्ति, येन दोषा न भवेयुः, यदि वा ते साधवस्तत्र वसन्तोऽपि अन्तप्रान्ततुल्यमेव भोजनं कुर्युः, न तु विकृत्यादिकं प्रचुरतया भुञ्जीरन् । इत्थं च न श्रावकादीनां सम्यक्त्वादिगुणहानिः न वा साधूनां कामविकारादिदोषापत्तिरिति मध्यमो मार्गः प्रकल्प्यतेऽत्र ।

**ननु** यद्येष मार्गः शक्यः स्यात्, तर्हि शोभनमेव । परन्तु 'दुग्धं दृष्ट्वाऽपि मार्जारी उच्छिष्टवदना न भवेदित्येतद् दुःश्रद्धानम् । एवमत्रापि अधुनातनाः केचन मन्दचारित्रपरिणामा मुनय इष्टं मिष्टं प्रचुरतया लभ्यमानं दृष्ट्वाऽपि न गृह्णीयुरित्येतत्प्रायोऽसम्भवि । बलात्कारेण तन्निवारणे तु अनवरतमार्तध्यानादिदोषाप्तिः स्पष्टैवैति सोऽपि न श्रेयान् । ततश्च साधूनां विकृत्याद्यनिवारणे बलवत्तादिदोषावकाश-सम्भवात्किं कर्त्तव्यं ? मध्यममार्गस्य स्वप्नदृष्टसमत्वापादनादिति **चेत्**

न, "विकृतिर्नैव भक्षणीया, स्वल्पैव वा भक्षणीया" इत्यादि आसेवनाशिक्षां निरन्तरं शिक्षतां साधूनां सकलगच्छपालनीयाया तादृशसामाचार्याः पालने न तथाविधमार्तध्यानादिकं अनिवार्यम् । यदि च तथाऽपि "ते साधवो निमित्तमासाद्य प्रचुरमिष्टान्नादीनि भुञ्जीयुरेव" इति निःशङ्कं भवतां निश्चयः, सम्भावना वा, तर्हि गौरवं लाघवं च विचारणीयम् । तथाहि प्रचुरभोजनेऽपि सति यदि स्वाध्यायवैयावृत्त्यविहारादिष्वनवरतं प्रवर्तमानानां तेषां न तथाविधबलाधानम्, येन कामोद्रेकः स्यात् तर्हि लाभाधिकतां सम्प्रेक्ष्य तेषामपि तत्र संवासो न दुष्ट इति मन्तव्यम् । यथा हि महति गच्छे गोचरीदोषाः कलहा इत्यादयो दोषा भवन्ति, तथाऽपि गच्छवासस्य बहुगुणत्वात्तान् दोषानुपेक्ष्य गच्छवास एव करणीयः प्रतिपादितः, एवमत्रापि उपधानादौ निवसतां साधूनां भोजनासक्त्यादि- दोषसद्भावेऽपि अन्येषामधिकगुणानां दर्शनात्तत्र निवासो न दुष्ट इति भावनीयम् ।

यदि च स्त्र्यादिसम्पर्कवशतो विकारादिदोषाणां सम्भवः, तर्हि तेषां तत्र निवासो न युक्तः, तैर्विनानुष्ठानासम्भवे तु अनुष्ठानपरित्याग एव श्रेयान्, स्वहितस्य सर्वोपरिताया जिनशासनसिद्धत्वादिति ।

इत्थं च संविग्नगीतार्थैः गौरवं लाघवं च सूक्ष्मधिया पर्यालोच्य प्रकृतानुष्ठानानामादरो निषेधो वा समादरणीयः, न तु कुत्राप्येकान्तकलुषमतिना भवितव्यं स्वपरहितनिरतेनानगारेणेति अलं विस्तरेण ।

**( ६४ ) अथानागतमेव कथयन्ति - अमुकदिवसे गमिष्यामः, तत्राप्येते दोषाः, तद्धि शय्यातरकुटुम्बं साधवो यास्यन्तीति विमुक्तशेषव्यापारं सत् गृह एव तिष्ठति, कृष्यादिप्रतिजागरणं न करोति, ततश्च क्षणिकं सत् स्वगृहजातहरितछेदं करोति तथा निर्व्यापारत्वादेव च ता रण्डाः षट्पदीनां परस्परनिरूपणेनोपमर्दनं कुर्वन्ति । तत्र दिवसे क्षणिका विमुक्तकृषिलवनव्यापारा वस्त्राणि शोधयन्ति । प्रकृतं-भोजनं छन्नं कुर्वन्ति, अप्रकटमित्यर्थः, प्रकटमेव ( वा ) भोजनं संयतार्थं कुर्वन्ति, तत्र चेच्छतामनिच्छतां च दोषा भवन्ति, कथं ? यदि तद्भोजनं गृह्णन्ति ततोऽशुद्धत्वात्संयमबाधा स्यात्, अथ न गृह्णन्ति ततो रोषभावं कदाचित्प्रतिपद्यते । एते दोषा अनागतकथने । ( ओ.नि. १६९ )**

**चन्द्र.** चातुर्मास्यनन्तरं मासकल्पानन्तरं वा यदा साधवो विहरेयुः, तदा शय्यातरमनापृच्छ्य न विहरेयुः, पृच्छाऽपि प्रभूतकालादर्वागेव न कुर्युः, दोषबाहुल्यसम्भवात् । के च ते दोषा इत्यत्राह **अथानागतमेव** इत्यादि सर्वं स्पष्टम् । नवरं **रण्डाः** = निर्व्यापाराः स्त्रियः, **क्षणिकाः** = कार्यलीनताऽभावेन कार्यविरहितसमयकाः ।

**नन्वेवं** यद्यनागतमेव विहारपृच्छा न न्याय्या, वक्ष्यमाणग्रन्थानुसारेण क्षेत्रप्रत्युपेक्षकप्रेषणानन्तरमेव शय्यातरस्नेहाल्पीकरणप्रयासो विहारपूर्वदिने चाग्रेतनदिनविहारकथनं कर्त्तव्यम्, तर्हि अधुना वर्षावासानन्तरभावी विहारो निश्चितकालभावितया प्रथमत एव निगद्यते, चतुर्विधसङ्घस्य च तत्काले आमन्त्रणमपि दीयते, भक्ताश्च श्रावकादयस्तस्मिन्दिनेऽन्यान्सर्वान्व्यापारान् त्यक्त्वा तत्रागच्छन्ति, महताऽऽडम्बरेण साधुभिर्विह्रीयते । अत्र च प्रभूता विराधना भवत्येवेति सर्वमेतदकरणीयमेव प्राप्तम् । तथा च शैथिल्याचरणमेवैतद् यदुत साडम्बरं सकलसङ्घप्रज्ञप्तिपूर्वकं च सङ्घसाक्षिकं विहारकरणमिति **चेत्**

न, तत्तद्द्रव्यादिसापेक्षोत्सर्गापवादपरिज्ञानविकलोऽसि ।

प्राचीनकाले चातुर्मासी एकादिशय्यातरनिश्रयाऽभवत्, वर्तमाने तु सा सङ्घनिश्रया । ततश्च प्राचीनकालेऽनागतपृच्छायां न कश्चिल्लाभोऽपि त्वनन्तरोदिता दोषा एव केवलमापद्यन्त । वर्तमानकाले त्वनागतपृच्छायां बहवो लाभाः । तथाहि - सकलसङ्घः स्वोपकारिगुरुविहारकाले धर्मभावनयोपस्थितो भवति, महताऽऽडम्बरेण विहारं कारयति, तत्र च ध्रुवैव शासनप्रभावना "अहो जैना उपकारिभक्तिमन्तः कृतज्ञाः धर्मनिरता" इति । तथा विहारकाले उपस्थितेन श्रावकादिगणेन विनयाचारः परिपालितो भवति । तथा वर्तमाने सङ्घान्तर्गताः श्रावकादयोऽतिबहवः, न च ते प्रतिदिनं गुरुं सम्पर्कयन्ति, ततश्च तेषां प्रज्ञापनायानगतमेव निश्चितविहारः कथ्यते । अन्यथा हि मुख्यश्रावकमात्रस्य विज्ञापनेन विहारकरणे तु अन्येषां श्रावकाणां श्रद्धादिभङ्गः स्यात् । एतान्यन्यानि वा कारणानि समाश्रित्यानागतविहारकथनमधुना प्रवृत्तमिति अनुमीयते ।

इदन्त्ववधेयम् । विहारकरणकामैर्मुनिभिः कतिचिद्दिनेभ्योऽर्वाग् मुख्यश्रावकगणः प्रज्ञापनीयः यदुत 'अमुकस्मिन्दिने विहारकरणाय प्रवर्ततेऽस्माकं भावना' इति । ततश्च 'ते श्रावका लेखनादिप्रकारेण सकलसङ्घं ज्ञापयन्ति न वा, शासनप्रभावनाप्रयोजकमाडम्बरं कुर्वन्ति न वा' इत्येतत्सर्वं तेषां कर्त्तव्यम् । न हि मुनीनां तत्र स्पृहोचिता । "अस्माकं विहारे बहवो जनाः समागच्छन्तु, ततश्च अस्माकं प्रभावो वर्धिष्यते, भक्तगणैश्च मीलनमनेन निमित्तेन भविष्यति, विहारनिमित्तकप्रकृष्टभोजनादि-प्रबन्धेनेष्टं मिष्टं प्राप्स्यते" इत्यादि गारवलाम्पट्यपरायणत्वे स्वजनादिसंसर्गार्द्रीभवद्-हृदयत्वे च श्रमणपरिणामः कुठारक्षतद्रुम इव क्षतियुक्तः स्यात् । केवलं श्रावकोचितकृत्यज्ञापनं शासनप्रभावनाप्रयोजककृत्यविवरणं च निःस्पृहचेतसा क्रियमाणं न दुष्टमिति परिणतचेतसा विभजनीयमिति ।

## ( ६५ ) विकालवेलायां कृतावश्यका इदं भणन्ति-यदुत कल्लं गच्छामः । पुनश्च तत आचार्याः सपरिजनं शय्यातरं आहूय धर्मकथां कुर्वन्ति । ( ओ.नि. १७४ )

**चन्द्र. ननु** सूर्यास्तमयनानन्तरं सपरिजनं शय्यातरं प्रति धर्मकथाऽनुचिता, परिजनमध्ये स्त्रीगणस्य सद्भावात्, तदग्रे च रात्रौ धर्मकथायाः असामाचारीत्वादिति **चेत्**

**सत्यं,** किन्तु आपवादिकमेतद् वचनं नोत्सर्गेण बाध्यते । चतुर्मास्यां मासकल्पे वा न कुत्रापि रात्रौ स्त्रीगणपुरतः धर्मकथा कृता गुरुणा, केवलं विहारादर्वाग्दिने एव सा कृतेति अपवादाचरणप्रवृत्तत्वान्न ते दोषभागिनः ।

किञ्च एनां धर्मकथां गुरवः धर्मकथालब्धिसम्पन्नाः विशिष्टपरिणतिमन्तः सुविहिताः कुर्वन्ति न शेषसाधवः, तथाऽग्रतः पुरुषाणामुपवेशनमस्तीति न साक्षात्स्त्रीसम्पर्कादिदोषाः इति अवस्थायामस्यां रात्रौ सपरिजनं शय्यातरं प्रति धर्मकथायामपि न दोष इति युक्तमुत्पश्यामः ।

**ननु** तथाऽपि प्राग्दिने प्रातर्मध्याह्ने एव वा किमिति न क्रियते सा ? सायंकाले एव तत्करणं किंप्रयोजनमिति **चेत्**

**श्रुणु,** अग्रेतनदिनभाविविहारज्ञापनानन्तरं धर्मकथायां हि सपरिजनः शय्यातरः "अन्तिमा हीयं धर्मदेशना, न पश्चाद् गुरवोऽत्र भविष्यन्ति" इति सबहुमानं सप्रणयं श्रुणोति । ततश्च तादृशविहारज्ञापनान्तरमेव धर्मकथोचिता । विहारज्ञापनं च सायंकाल इति तदनन्तरमेवोचिता धर्मकथाऽपि सायंकाले एव कर्त्तव्यत्वेनापतितेति ।

**ननु** अग्रेतनदिनभाविविहारज्ञापनमेव किमिति पूर्वदिने सायंकाले क्रियते, किमिति पूर्वदिने प्रार्तमध्याह्ने एव वा न क्रियते, येन तदनन्तरभाविधर्मकथाऽपि तदैव स्यादिति रात्रौ स्त्रीणां पुरतो धर्मकथाकरणं नापद्येतेति **चेत्** न, एवं सति "गुरवोऽग्रेतनदिने यास्यन्ति" इति ज्ञात्वा स शय्यातरः तत्परिजनश्च सकलानन्या-न्व्यापारान्त्यक्त्वा गृह एव तिष्ठेत्, साध्वर्थं भोजनादि **पचेत्**, निर्व्यापारतयाऽन्यानपि गृहसत्कान् सावद्यानवशिष्टान् व्यापारान् तदैव कुर्यादिति प्राक्प्रतिपादिता दोषा तदवस्था एव भवेयुः । सायंकालानन्तरं तु सकलमपि कुटुम्बं स्वयमेव गृहे एव तिष्ठतीति तदा विहारप्रज्ञापनायां कृतायामपि तज्जन्यः कश्चिदपि सावद्यव्यापारो न भवेत्, रात्रौ च साधूनां भोजनाभावात् भोजनार्थं पाकाद्यारम्भोऽपि न भवेदिति दोषाभावं पर्यालोच्य रात्रौ विहारज्ञापनं अनुज्ञातम् । तदनन्तरभाविनी च धर्मकथा पूर्वोक्तकारणान्निर्दोषेति साऽपि अनुज्ञातेति यथायोग्यं विभावनीयम् ।

उक्तकारणविशेषाभावेऽपि क्षुल्लककारणमवलम्ब्य वा यदि कश्चिदेतद्वचनमवलम्ब्य रात्रौ स्त्रीगणपुरतो व्याख्यानं कुर्यात्, स तु जिनाज्ञाभङ्गेन ब्रह्मगुप्तिबाधादिदोषजालेन च कर्मबन्धकारी भवेदिति न यथा तथाऽपवाद-प्रयोगोऽगीतार्थानामिष्टः ।

**( ६६ ) ते हि साधवः प्रभातमात्र एव प्रतिलेखयित्वा उपधिकां पुनश्च वेण्टलिकां कुर्वन्ति-संवर्तयन्तीत्यर्थः, ततश्चानिक्षिप्तोपधय एव सूत्रपौरुषीं कुर्वन्ति । चरिमवेलायां = पादोनपौरुष्यां पात्रकाणि उद्ग्राह्य-संयन्त्रयित्वा पुनश्चानिक्षिप्तैरेव पात्रकैः श्रुत्वा = अर्थपौरुषीं कृत्वेत्यर्थः, ततो मध्याह्ने व्रजन्तीति । ( ओ.नि. भा. ७९ )**

**चन्द्र.** विहारदिने गच्छवासिनः साधवः कदा कथं च विहरन्ति इत्यादिविधिप्रतिपादनपरोऽयं पाठः सर्वोऽपि सुगमः । नवरमत्रोपध्यनिक्षेपणं पात्रकानिक्षेपणं च किमर्थमिति प्रश्नावकाशः, तत्र समाधानं त्विदम्, प्रतिलेखितोऽप्युपधिः पात्रकाणि च यदि भूमौ स्थाप्यन्ते, तर्हि तेषु जीव-संसक्तिसम्भावना, ततश्च तद्ग्रहणोपभोगादिकाले पुनः तत्प्रतिलेखनमवश्यं कर्त्तव्यं स्यात् । इत्थं च यदि साधवः उपधिं पात्रकाणि च भूमौ निक्षिपेयुः, तर्हि विहारकाले तत्सर्वं पुनः प्रतिलेखनीयं स्यात्, ततश्च पलिमन्थदोषः । तद्वारणाय उपधिपात्रकाणामनिक्षेपणमत्रोक्तम् । अनिक्षेपणे तु जीवसंसक्त्यभावात्पुनःप्रतिलेखना न कर्त्तव्येति न पलिपन्थदोष इति ।

**ननु** विहारकालीन एवायं विधिरुत प्रतिदिनं कर्त्तव्य एष विधिरिति **चेत्** उत्सर्गतः प्रतिदिनं कर्त्तव्य एष विधिः, यतो हि भिक्षाटनाय गच्छता साधुनोत्सर्गतः सकलोऽप्युपधिर्ग्राह्यः, ततश्च प्रतिदिनं उपधिनिक्षेपणे तु प्रतिदिनं भिक्षाकाले पुनःप्रतिलेखनरुपः पलिमन्थदोषोऽवश्यम्भावीति तत्परिहारार्थं उपध्याद्यनिक्षेपणं प्रतिदिनं कर्त्तव्यो विधिरवगन्तव्य इति । अपवादतस्तु भिक्षोपयोग्येवोपधिर्यदा भिक्षाटने गृह्यते, तदेतरोपधीनां कारणिकातिरिक्तोपधीनां च निक्षेपणमपि न दुष्टम् । केवलं प्रतिदिनं वारद्वयं तत्प्रतिलेखनं तु भवत्येव । तथा तत्परिभोगकालेऽपि प्रतिलेखना अवश्यं कर्त्तव्येति ।

**( ६७ ) तत्रापशकुनानाह मलिनः शरीरकर्पटैः, कुचेलो-जीर्णकर्पटः, स्नेहाभ्यक्तशरीरः, श्वा यदि वामपार्श्वाद् दक्षिणपार्श्वं व्रजति कुब्जो-वक्रः, वडभो-वामनः, एतेऽप्रशस्ताः, पीवरगब्भा = आसन्नप्रसवकाला.... ( ओ.नि. ८२ )**

**चन्द्र.** विहारकाले यद्यपशकुना भवेयुः, तर्हि विघ्नसम्भावनया न निर्गन्तव्यम् । तत्र केऽपशकुना इति प्रश्नेऽपशकुनान् शकुनांश्च दर्शयत्यत्र । प्रायः सर्वं सुबोधम् ।

नवरं यः कश्चिद् विशेषः, सोऽत्राभिधीयते ।

चक्रधरे कुलालेऽपशकुने सति भ्रमणात्मकं विघ्नम् स्यात् । पाण्डुराङ्गे क्षुधा मरणं च स्यात् । तच्चनिके = श्रमणविशेषेऽपशकुने सति रुधिरपतनं स्यात् । श्यामनग्नेऽपशकुने तु ध्रुवं मरणं स्यात् । तस्मादेतादृशानामपशकुनानां प्रादुर्भावे निर्गमनं निवार्यम् ।

अथ शकुनाः ।

तत्र जंबूः = पशुविशेषः, चासः = पक्षिविशेषः, मयूरः प्रसिद्धः, भारद्वाजः = पक्षिविशेषः, नकुलः = प्रसिद्धः, एतेषां यदि दर्शनमपि भवेत्, तर्हि तदेव शोभनम् । यदि चैतेषामन्यतरोऽपि कश्चित् निर्गच्छन्तं साधुं प्रदक्षिणयति, तर्हि तत्साधोः सर्वसंपत्तिः स्यात्।

अत्र केचित् "पयाहिणे सव्वसंपत्ती" इति निर्युक्तिवचनं जिनप्रतिमाप्रदक्षिणायाः सर्वसंपत्करत्वबोधकं इति मन्यन्ते, तच्चाधिकारानुसारेण न सङ्गतमाभाति । यतो हि अत्र 'कस्य प्रदक्षिणा' इति न स्पष्टमुक्तम् । ततश्च 'जिनप्रतिमायाः साधुना क्रियमाणा प्रदक्षिणा' इत्यर्थोऽध्याहारादिनैव प्राप्यः, स चाध्याहारो न यथातथा कर्तुं शक्यते । तथा अनन्तरमेव जम्ब्वादीनां दर्शनस्य शकुनतयोक्तत्वात्तैः साधुं प्रति क्रियमाणा प्रदक्षिणैवात्र युक्तिसङ्गता आभाति।

अपि च शकुनः स उच्यते, यः न शकुनग्राहिणा क्रियते कार्यते वा, किन्तु यः अकस्मादेव भवति । तथा च प्रतिमाप्रदक्षिणा तु साधुना स्वयं क्रियते इति सा न शकुनः, जम्ब्वादिना क्रियमाणा साधुं प्रति प्रदक्षिणा तु आकस्मिकीति सहजा सा शकुनः कथयितुं शक्यते इति जम्ब्वादिक्रियमाणैव प्रदक्षिणा सर्वसंपत्करीति युक्तः पन्थाः ।

**ननु** तर्हि किं विहारकाले जिनप्रतिमाप्रदक्षिणा न कर्त्तव्या इति **चेत्** क एवमाह ?

अस्माभिर्हि तस्याः शकुनत्वमेव निषिद्धं, न तु कर्त्तव्यत्वम् । जिनप्रतिमाप्रदक्षिणायाः तीर्थंकरविनयरुपत्वेन तपोरुपत्वात् तपसश्च मङ्गलत्वात्, तत्करणेन च निर्विघ्नपरिसमाप्तिसम्भवात् तत्कर्त्तव्यत्वं तु निराबाधमेवेति भावः ।

मङ्गलं विघ्ननिवारकं, शकुनः 'विघ्नमेव नास्ति' इति ज्ञापकः, अपशकुनस्तु 'विघ्नमस्ति' इति ज्ञापक इति त्रयाणां व्यापारो विभिन्नः ।

शिष्टास्तु छद्मस्थत्वात् विघ्नं तदभावं वाऽजानन्तः कार्यारम्भे एव विघ्नसम्भावनया तन्निवारणाय मङ्गलं प्रदक्षिणादिरुपं कुर्वन्ति, यदि वा कार्यारम्भस्य पश्चात् अपशकुनदर्शनेन विघ्नशङ्काढार्यात् तन्निवारणार्थं मङ्गलं कुर्वन्तीति द्वौ विकल्पौ विघ्ननिवारणाय क्रियमाणे मङ्गले सम्भवतः । यदि वा 'श्रेयोऽर्थेऽवश्यं मङ्गलं कर्त्तव्यम्' इति शिष्टाचारपरिपालनायाश्रितावबोधाय च विघ्नाभावनिश्चयेऽपि मङ्गलं कुर्वन्तीति ।

इत्थं च प्रतिमाप्रदक्षिणायाः शकुनत्वाभावादेवात्र या प्रदक्षिणा प्रतिपादिता, सा जम्ब्वादिभिः स्वयं क्रियमाणा प्रदक्षिणैव शकुनतया प्रतिपादितेति निश्चितं मन्तव्यम् । यत एवं शकुनार्थिना स्वयं क्रियमाणः कार्यमाणो वा शकुनः परमार्थतः शकुन एव न भवति, तत एव चातुर्मासीप्रवेशाद्यनुष्ठाने साधुभिः पूर्णकलशादिकं कन्यागमनादिकं वा यत् कार्यते, तन्न शकुनरुपम्, परन्तु द्रव्यमङ्गलरुपमेव । द्रव्यमङ्गलं चात्र साधुभिः तत्कारापणे जीवविराधनासम्भवात् हिंसारुपभावामङ्गलेन प्रतिहतं सत् न स्वफलं प्रदातुमलं, प्रत्युत "न मया पूर्णकलशादिद्रव्यमङ्गलकारापणेन असंयम उत्पादयितव्य" इति परिणामेन तदकरणे, तादृशपरिणामस्य भावाहिंसास्वरुपत्वेन भावसंयमरुपत्वेन चोत्कृष्टभावमङ्गलत्वात् अवश्यं स्वफलदायकत्वमिति चारित्रपरिणतिमता न द्रव्यमङ्गलार्थं भावामङ्गलमुत्पादनीयम्, अपि तु भावमङ्गलार्थं द्रव्यमङ्गलोपेक्षणं यदि कर्त्तव्यं स्यात् तर्हि करणीयमेव ।

जिनप्रतिमाप्रदक्षिणा यद्यपि विनयरुपत्वेन तपोरुपत्वाद् उत्कृष्टं मङ्गलमभिधीयते । तथाऽपि यदि तदर्थं जिनालयोद्घाटनं कारापणीयं स्यात्, प्रदीपाद्युज्ज्वालनादिरुपा विराधना च भवेत्, प्रदक्षिणायां भूमौ सचित्तजलादिसङ्घट्टनं यदि भवेत्, तर्हि एतावद्दोषकदम्बेन क्रियमाणा जिनप्रतिमाप्रदक्षिणाऽपि परमार्थतोऽविनयत्वादतपोरुपा सती न मङ्गलं, प्रत्युत भावामङ्गलप्रयोजकत्वेनानिष्टकरीति परिणतचेतसा विभावनीयम् । न तु निश्चयनिरपेक्षव्यवहारमात्ररसिकेन भवितव्यम् ।

प्रस्तुतमुच्यते ।

तत्र नंदीतूय = वाद्यविशेषः, पूर्णस्य घटस्य दर्शनं, शङ्खशब्दः, पटहशब्दश्च । कलशः,

छत्रम्, चामरम्, ध्वजः-पताका एते प्रशस्ताः = शकुना इत्यर्थः ।

तथा लिङ्गमात्रधारी, सम्यक्संयमानुष्ठाने यत्नपरः, इन्द्रियनोइन्द्रियैर्दान्तः एते त्रयोऽपि शकुनाः । **न च** चारित्रपरिणामभ्रष्टस्य लिङ्गमात्रधारिणः शकुनत्वं कथं घटेतेति **वाच्यम्** । कलशचामरध्वजपताकादिप्रशस्तवस्तुवत् चारित्रवेषस्य शकुनत्वानपायात् ।

यथाहि चारित्रपरिणामरहितान्यपि कलशादिवस्तूनि शकुनत्वं न व्यभिचरन्ति, एवं चारित्रपरिणामविरहितोऽपि साधुस्तथेति ।

**ननु** कलशादिषु प्रशस्तपरिणामवदप्रशस्तपरिणामोऽपि नास्ति, लिङ्गमात्रधारिणि तु अप्रशस्तपरिणामोऽस्तीति न तस्य शकुनत्वमिति **चेत्** तत्किं सर्पादिभक्षकाणां मयूरनकुलादीनामप्रशस्तपरिणामो नास्ति ? येन तेषां शकुनत्वं स्वीक्रियते ? यथाहि अप्रशस्तपरिणामवतामपि तेषां द्रव्यविशेषरुपत्वात् शकुनत्वं, तथैव लिङ्गमात्रधारिणोऽपि किमिति न मन्यते इति निपुणधिया निभालनीयम् ।

एते च शकुना अपशकुनाश्चोपलक्षणमात्रम्, तेनान्येऽपि ते सम्प्रदायाद्यनुरोधतो ज्ञेयाः ।

**( ६८ ) स चैवमाह रात्रौ साधूनां गमनं न कल्पते, द्विविधविराधनासम्भवात्, यत उक्तं दिवाऽपि तावत् नीयदुवारे विराहणा दुविह त्ति । दिवाऽपि तावदयं दोषः, नीयदुवारं तमसं कोट्ठगं परिवज्जए इति वचनात् । नीचद्वारे द्विविधा विराधना सतमस्कत्वात्, आस्तां तावद् रात्रौ, एष च धर्मश्रद्धया नेच्छति । पुनश्च तस्य प्रज्ञापना-प्ररुपणा क्रियते । तत्र रात्रिगमने बहवो गुणा दृश्यन्ते बालवृद्धादयः सुखेन गच्छन्ति रात्रौ, न तृषा बाध्यन्ते। अथ तथाऽपि नेच्छति गमनम्, द्वितीयस्तस्य दीयते - तदर्थं मुच्यते इति । उपधिस्तस्य दीयते जीर्णः, तदीयश्च शोभनो गृह्यते इति, मा भूत्तत्पार्श्वे स्थितमुपधिं स्तेनका आच्छेत्स्यन्ति । ( ओ.नि.भा. ९२ )**

**चन्द्र.** खग्गूडो नामापरिणतः, स चोत्सर्गैकरुचितया रात्रौ विहारं सर्वथा निषिध्यति, एतच्च न युक्तम्, अपवादतो रात्रिगमने बहुगुणसद्भावात् । तदेतत्सर्वमत्र निगदितम्, प्रायः

सुगमम् । नवरमेतेनैतद् ज्ञायते यदुत शास्त्रेषु उत्सर्गप्ररुपकाणि प्रभूतानि वाक्यानि सन्ति, न च तानि एकान्ततो ग्राह्याणि, उत्सर्गमात्रस्यापवादसंवलितत्वात्, न वापवादसेविनां निम्नत्वं विभावनीयम्, उत्सर्गसेविवत् अपवादसेविनामपि मोक्षमार्गानुसरणशीलत्वात्, प्रत्युतापवादोचितेऽपि स्थाने आत्मगुणहानिकरमुत्सर्गं जडतया बिभ्राणस्यैवापवादसेविसकाशान्निम्नत्वादिति ।

**( ६९ ) तस्यैकाकिनः सुप्तस्य उपधिरुपहन्यते, स ह्येकाकी स्वपन् प्रमादवान् भवति, स्त्र्याद्यभियोगसम्भवात् । ततश्च निद्रावशं प्राप्तस्योपधिरुपहन्यते, अतोऽकल्पनीयो भवति, परिष्ठापनीयश्चासौ । गच्छे तु स्वपतोऽपि नोपहन्यते, किं कारणं ? यतस्तत्र केचित्सूत्रपौरुषीं कुर्वन्ति, अन्ये द्वितीयप्रहरेऽर्थानुचिन्तनं कुर्वन्ति, तृतीये तु प्रहरे आचार्य उत्तिष्ठति ध्यानाद्यर्थं, चतुर्थे तु प्रहरे सर्व एव भिक्षव उत्तिष्ठन्ति, ततश्च रात्रौ नैकोऽपि प्रहरः शून्यः अतो नोपहन्यते उपधिः, एकाकिनस्तु जागरणं नास्त्यत उपघातः । ( ओ.नि. १७७ )**

**चन्द्र.** साधुना एकाकिना न भवितव्यम्, यतः एकाकित्वे सति स्वापदशायामुपधिरक्षकाभावादुपधिः उपहन्यते, स च परिष्ठापनार्हो भवतीति प्रतिपादनपरोऽयं ग्रन्थः सर्वः सुगमः ।

**ननु** किमिदमुपधिहननं नाम ? किं स तस्यापहरणमेवोपहननम्, किं वा वह्न्यादिभिः तस्य दहनादिकमुपहननं ? एवं सति हि उपहतोपधिपरिष्ठापनकथनं निरर्थकमेव, यतो हि यदि स उपधिरुपहतः, तर्हि स अपहृतो दग्धो वेत्येवार्थः, ततश्चापहृतस्य दग्धस्य वोपधेरेवाभावात्तत्परिष्ठापनं असम्भवि । ततश्च किमिदमुपध्युपहननमिति **चेत्**

अत्र ब्रूमः । सकलोऽप्युपधिर्महता यत्नेन रक्षणीयः, उपध्यरक्षणे महापायसम्भवात् ।

तथाहि अरक्षिते उपधौ स्तेनादयः आरक्षकादिभयादितस्ततः पर्यटन्तः अपहृतं धनं स्वरक्षार्थं उपधौ गूहयित्वा नश्यन्ति, तच्च धनं गवेष्यमाणं साधूपधौ लब्ध्वाऽऽरक्षकादयः साधुं स्तेनं मत्वा कारागृहादौ निक्षिपन्ति, एवं च महती शासनापभ्राजना । तथा प्रत्यनीकाः शासनापभ्राजनार्थमेव राजसत्कममूल्यं वस्तु चोरयित्वाऽरक्षिते साधूपधौ गूहयित्वा स्वयमेव राजानं निवेद्य कपटपूर्वकं साधुं स्तेनं स्थापयित्वा शासनमपभ्राजयन्ति । इत्थं च राजकृता मरणादयो दण्डा अपि नासुलभाः । तथा संसारदुःखत्रस्तो कश्चिन्मरितुकामोऽरक्षितं साधूपधिं गृहीत्वा तेन स्वात्मानमुपहन्ति, यदि वा तेनैवोपधिना स्वप्रत्यनीकानुपहन्तीत्येवं अरक्षितोपधिरधिकरणं भवेत्, तत्रापि साधूपरि अभ्याख्यानसम्भवे आत्मविराधना शासनापभ्राजना च दुर्वारा ।

यदि तु सकलमपि कालं कोऽपि साधुः सकलमपि उपधिं जाग्रन् रक्षति, तदा रक्षकसद्भावात् न प्रतिपादितदोषावकाशः । गच्छे तु रात्रावपि पाठोक्तरीत्याऽन्यतरस्यापि जागरणावश्यम्भावात् उपधिरक्षा सुकरेति न कोऽपि प्रतिपादितदोषावकाश इति ।

इत्थं च यदा रक्षकाभावात् उपधिः आत्मसंयमप्रवचनविराधनासम्भावनादोषदुष्टो भवति, तदा स उपधिरुपहतो मन्यते । इदमेवोपद्युपहननं । तत्र च आत्मविराधनादयो दोषा भवन्तु मा वा, तथाऽपि दोषसम्भावनाप्रादुर्भावादेवोपध्युपहननं परिगण्यते ।

**ननु** तथाऽपि तत्परिष्ठापनं किमर्थं ? दुर्लभनिर्दोषोपधिकाले तु तत्परिष्ठापनं सुतरां युक्तिविरहितमिति **चेत्** न, उपधिरक्षाऽप्रमादप्रयोजकत्वादुपहतोपधिपरिष्ठापनस्य युक्तियुक्तत्वानपायात्, तादृक्काले तु सुतरां तथात्वात् ।

अयं भावः, एकं तावद् निर्दोषोपधिर्दुर्लभः, ततश्च तद्रक्षणं यत्नेन करणीयम्, तदभावे उपध्यपहरणे सति संयमविराधनादिदोषसद्भावात् । अपरं चोपध्यरक्षणे प्रतिपादितप्रभूतदोषा-वकाशादपि उपधिः महता यत्नेन रक्षणीयः, ततश्च 'उपधिरक्षणे साधवः सावधाना भवन्तु, अप्रमत्ता भवन्तु' इत्येतदर्थमियं व्यवस्था कृता, येन ते उपधिरक्षणाऽप्रमत्ता भवेयुः । एवं च "यद्यहं उपधिं न सम्यक्रक्षामः, तर्हि आत्मविराधनादिदोषसम्भावनादुष्टोऽयमुपधिरुपहतः परिष्ठापनार्हश्च भविष्यति, ततश्च तत्परिष्ठापनानन्तरं नूतन उपधिर्गवेषणीयोऽस्माभिरेव, स च दुर्लभः ततश्च महानायासः पलिमन्थश्च भविष्यति अस्माकं, इति महताऽऽदरेणोपधिं संरक्षामो वयं" इति परिणामान्विताः साधवः सम्यगुपधिरक्षणप्रवणा भवन्ति ।

किञ्च व्यवहारभाष्यवृत्तौ इत्थं निगदितमस्ति "**इत्यपि खलु कारणात्**

**क्षेत्रानाभवनलक्षणाद् एकाकिनोऽसमाप्तकल्पा वा मा भूवन्निति ।**" (१७८४) अत्र हि साधूनामेकाकित्वादिनिवारणार्थं क्षेत्रानाभवनं यथा आदृतम्, तथैव साधूनामेकाकित्वादिनिवारणार्थं उपहतोपधिपरिष्ठापनादिका व्यवस्था समादृतेति कल्प्यते न किं ?

एतत्तावत् उपध्युपहननरहस्यं उपहतोपधिपरिष्ठापनरहस्यं चास्माभिरुत्प्रेक्षितम् । तादृशस्पष्टाक्षरानुपलम्भाच्च एतत्सत्यम् न वा इत्येतत्तु बहुश्रुतगीतार्था यद् वदन्ति, तदेव प्रमाणम् । नास्माकं कोऽपि कदाग्रहः, केवलं सूक्ष्मप्रज्ञया चिन्तनीयमेतद् रहस्यमिति प्रार्थयामो वयं शिष्टान् ।

## (७०) तत्र भोजनस्थाने सागारिका यदि बहवस्तिष्ठन्ति, ततस्ते साधवो भिक्षामटित्वाऽऽगताः सन्तो यद्येवं भणन्ति-यदुत वच्चह-हे सागारिकाः ! गच्छतास्मात्स्थानात्, ततश्चैवमुच्यमाने संयम-विराधनादोषो भवति । (ओ.नि. १८९)

**चन्द्र. ननु** सागारिकाणां "गच्छतास्मात्स्थानात्" इति कथनमात्रेण संयमविराधनादोषः कथं भवेदिति **चेत्** तत्किं दशवैकालिकसप्तमाध्ययनं नाधीतं भवता ? असंयतं प्रति गमनस्थानोपवेशनादिक्रियाप्रयोजकवचनानुच्चारणं तत्र निगदितं किं न जानासि ?

जानामि, किन्तु तत्कारणं तु न जानामीति **चेत्** तत्किं सागारिकाणां तप्तायोगोलौपम्यं योगशास्त्रादिषु दृष्टं विस्मृतं ? असंयता हि तेऽयतनयैव गमनादीनि कुर्वन्ति, ततश्च तत्र षट्कायविराधनासम्भवः, ततश्च तान्प्रति गमनादिक्रियाप्रयोजकवचनोच्चारणमसंयमप्रयोजकत्वान्न कर्त्तव्यमेवेति ।

अत एव "**गिहिणो वेयावडियं न कुज्जा, गिहिजोगं परिवज्जए जे स भिक्खु, थोवो वि गिहिपसंगो जइणो सुद्धस्स पंकमावहइ...**" इत्यादिभिर्ग्रन्थैः

गृहस्थपरिचयादिकमागमे असंयमप्रयोजकत्वान्निषिद्धं दृश्यते । साधूनां अनारम्भिणां लोकाधीनत्वात् संयमोत्सर्पणानुकूलस्तु गृहस्थपरिचयो न निवार्यत इति तु सताटस्थ्यं चिन्त्यम् ।

## ( ७१ ) संस्तारकभूमित्रयमाचार्याणां निरूप्यते, एका निवाता संस्तारकभूमिरन्या प्रवाता अन्या निवातप्रवाता । ( ओ.नि. २०३ )

**चन्द्र.** सकलगच्छाधाराणामाचार्याणां चित्तस्वस्थताद्यर्थमेष अतिशयकल्प आचारः यदुत तेषामर्थं संस्तारकभूमित्रयं निरुप्यते । तत्र निवाता = वातरहिता श्लेष्मादिदोषरक्षणार्थमेषा, प्रवाता = प्रभूतवातयुता, घर्मादिदोषपरिहारार्थमेषा, निवातप्रवाता = मध्यमवाता । आचार्याश्च यथानुकूल्यमन्यतरस्यामपि संस्तारकभूमौ तिष्ठन्ति ।

**ननु** प्रवातभूमौ वायुकायविराधना भवति, प्रवातानुमत्या तज्जन्यविराधना-नुमतिरपि संयमातिचाररूपा उपढौकत इति **चेत्** न, आपवादिकत्वेन द्रव्यविराधना-सत्त्वेऽपि न भावविराधना, द्रव्यविराधना च भावविरहितत्वेना-किञ्चित्करीति न तेन संयमोपघातादिदोषः ।

तथा विराधनानुमतिरपि नास्ति, आपवादिकत्वादेव । अन्यथा कारणिकाधाकर्मादावपि तदनिवार्यत्वप्रसङ्गादिति ।

किञ्च यथा हि साधवो न स्वयं पचन्ति, पाचयन्ति, पचनमनुमोदयन्ति वा, परन्तु बुभुक्षादिनिवारणार्थं गृहस्थैः स्वयं पक्वं तु गृह्णन्त्येव, न तत्र तेषां कश्चिद् दोषः । एवमत्रापि आचार्याः न प्रवातं स्वयं परैर्वा उत्पादयन्ति, न वा अनुमन्यन्ते । परं स्वयमेव प्रवृत्तं प्रवातं स्वास्थ्याधानार्थं सेवन्ते । न तत्र तेषां कश्चिद् दोष इति ।

बुभुक्षानिवारणमपि यदि मोक्षार्थम्, तदा निर्दोषम्, अन्यथा तु गृहस्थैरपि तत्क्रियत इति को विशेषः गृहस्थसाध्वोर्मध्ये । एवं प्रवातसेवनमप्याचायार्णां मोक्षार्थमेव, अन्यथा तु सुखशीलतापोषणार्थमेव क्रियमाणं तत् गृहस्थसादृश्यापादकमिति ।

**( ७२ ) जइ रत्तिं आगया ताहे कालं न गिण्हंति, निज्जुत्तीओ संगहणीओ य सणिअं गुणंति, मा वेसित्थिदुगुंछिआदओ दोसा होहिंति, कायिकां मत्तएसु छड्डेंति, उच्चारंपि जयणाए । जइ पुण कालभूमी पडिलेहिआ, ताहे कालं गिह्णंति, यदि सुद्धो कालो, करेंति सज्झायं, अह न सुद्धो न पडिलेहिआ वा वसही ताहे निज्जुत्तीओ गुणिंति । ( ओ.नि. २०४ )**

**चन्द्र.** यदि हि कथमपि रात्रौ एव वसतिमागताः साधवः, ततश्च प्रकाशाभावात् कालभूमिरुच्चारभूमिः प्रश्रवणभूमिश्च प्रतिलेखयितुमशक्या भवेत् तर्हि तत्र कालं न गृह्णन्ति । कालग्रहणाभावे च सूत्रपाठासम्भवात् रात्रौ निर्युक्तीः संग्रहणीश्च गुणयन्ति साधवः, न च निःस्वाध्यायास्तिष्ठन्ति, मा भूत् वेश्यास्त्रीप्रभृतिजन्या दोषा इति । प्रश्रवणमपि मात्रके कृत्वा यतनया परिष्ठापयन्ति, उच्चारमपि तथैव ।

**ननु** प्रश्रवणभूमौ प्रश्रवणव्युत्सृजने मात्रकेण च परिष्ठापने को भेदः, येन अदृष्टायां प्रश्रवणभूमौ प्रश्रवणव्युत्सृजनं निषिध्यते, मात्रकेण च परिष्ठापनं अनुज्ञाप्यते इति **चेत्**

अदृष्टायां प्रश्रवणभूमौ कदाचिद्विषधरबिलानि भवेयुः, प्रश्रवणव्युत्सृजने तु कालविलम्बसम्भवात् विषधरो बिलान्निर्गत्य दशेत् । मात्रकेण परिष्ठापने तु शीघ्रमेव कार्यसमाप्तेर्न विषधरदशनादयो दोषाः ।

तथा प्रश्रवणव्युत्सृजने त्वेकस्मिन्नेव स्थाने प्रायः सकलमपि प्रश्रवणं निपतेत्, तत्र च यदि कीटिकादिगृहाणि स्युः, तर्हि तत्र गतं प्रश्रवणं प्रभूतत्वात् कीटिकादीनि विराधयेत् । मात्रकेण परिष्ठापने तु अनेकेषु स्थानेषु स्वल्पं स्वल्पं परिष्ठापनात् न भवति तथाविधा महती विराधनेत्येवमादीनि कारणान्यपेक्ष्यादृष्टायां प्रश्रवणभूमौ व्युत्सृजनं निषिद्धं, परिष्ठापनमनुज्ञातमिति कल्प्यते ।

*अत्र मात्रकं विना साक्षादेव प्रश्रवणकरणं व्युत्सृजनम्, मात्रके प्रश्रवणं कृत्वा भूमौ पातनं परिष्ठापनमिति शास्त्रीयेयं रूढिः ।*

यदि च दिवसे एव तत्रागताः, ततश्च कालभूमिः प्रतिलेखिता, तर्हि कालं गृह्णन्ति, यदि कालः शुद्धः, तर्हि स्वाध्यायं कुर्वन्ति, मूलसूत्राणि पठन्तीति यावत् । अथ कालो न शुद्धः,

न वा वसतिः प्रतिलेखिता, तर्हि निर्युक्तीर्गुणयन्ति ।

एष तावत्प्रकृतपाठभावार्थः ।

अत्र कश्चिदाह - वसतिप्रतिलेखनाऽभावे सूत्रपाठो नानुमतः, निर्युक्तिपाठस्त्वनुमत इत्यनेन ज्ञायते यदुत रुधिरादिकोऽस्वाध्यायो मूलसूत्रपाठस्यैव निषेधकः, न तु निर्युक्त्यादिपाठस्य । यदि हि रुधिरादिकेऽस्वाध्याये निर्युक्त्यादिपाठस्यापि निषेधः स्यात्, तर्हि अप्रतिलेखितायां वसतौ निर्युक्तिपाठोऽनुज्ञातो न स्यात्, मूलसूत्रपाठवत् । इत्थं चाधुनाऽस्वाध्याये यः सकलपञ्चाङ्गीपाठनिषेधः श्रूयते, स न शास्त्रीयः, पञ्चाङ्गीमध्ये मूलसूत्रपाठनिषेधस्यैव शास्त्रानुसारित्वादिति ।

अत्र केचिद् वदन्ति → "**न प्रतिलेखिता वा वसतिः**" इत्यनेन तु एतद् ज्ञाप्यते यदुत यदि कालग्रहणयोग्या वसतिर्न प्रतिलेखिता भवेत्, तर्हि कालग्रहणस्यैवासम्भवात् सूत्रपाठो दुःशक (अकर्त्तव्य) इति तदानीं निर्युक्तिगुणनं कार्यमिति । तथा च 'उपाश्रये रुधिरादिकोऽस्वाध्यायोऽस्ति न वा' इति तु तत्र निश्चितमेव, परन्तु कालग्रहणवसतौ अदृष्टायां सूत्रपाठासम्भवेन, सति अस्वाध्यायाऽभावे निर्युक्तिगुणनमनुज्ञातम् । अस्वाध्याये तु तदपि न कर्त्तव्यमिति । कालग्रहणाभावे सूत्रपाठस्यैव निषेधः, अस्वाध्याये तु पञ्चाङ्गीमात्रस्येति न वर्तमानसामाचार्याः शास्त्रविपरीतत्वम् ← इति ।

तन्न रमणीयम् । 'न पडिलेहिआ वा वसहि' इत्यत्र वसतिपदस्योपाश्रय-वाचकत्वात्, कालग्रहणस्थानार्थं तु 'कालभूमि'पदस्य प्रवर्तमानत्वात् ।

अयं भावः, केचित् "वसतिपदेन कालभूमिर्ग्राह्या" इति वदन्ति, परन्तु तन्न सम्यक्, यतो वसतिपदं उपाश्रयस्यैव ज्ञापकं । ततश्च 'उपाश्रयो न प्रतिलेखितः' इत्येवार्थो भवेत् । उपाश्रयाप्रतिलेखनं नाम 'उपाश्रयोऽस्वाध्यायवान् न वा' इति निरीक्षणाभावः । ततश्चास्वाध्यायशङ्कायां सूत्रपाठनिषेधो निर्युक्तिगुणनानुमतिश्च सिद्धेति अस्वाध्याये निर्युक्त्यादिपाठस्य शास्त्रीयत्वमेव सिद्धं स्यात् ।

किञ्च भवतु नाम वसतिरत्र कालभूमिः, तथाऽप्यत्र तदप्रतिलेखनं किंनिमित्तमिति वदतु भवान् । रात्रौ आगमनमत्राभूत्, ततश्च प्रकाशाभावनिमित्तकमत्र कालभूम्यप्रतिलेखनमिति **चेत्** तर्हि तन्निमित्तकमेवोपाश्रयाप्रतिलेखनमपि भवेदेव, न हि प्रकाशाभावे कालभूमिरिव उपाश्रयः सुप्रतिलेख्यः स्यात् । तथा चात्रोपाश्रयोऽप्य-प्रतिलेखितः एव, ततश्चास्वाध्यायसम्भवेऽपि सूत्रपाठनिषेधो निर्युक्तिगुणनानुज्ञा च स्पष्टमेव सिद्ध्येदिति ।

इत्थं च केचिन्मतं न रमणीयतां बिभर्ति ।

**ननु** तर्हि अस्वाध्याये पञ्चाङ्गीभणननिषेधसामाचारी शास्त्रविपरीता समापन्नेति **चेत्** अत्र बहुश्रुतानामयमभिप्रायः । शुद्धकालग्रहणं सूत्रपाठार्थमावश्यकं, न तु निर्युक्तिपाठार्थम् । अस्वाध्यायश्च सूत्रपाठस्य निर्युक्तिपाठस्योभयस्यापि प्रतिबन्धकः । प्रकृते च कालस्याशुद्धत्वात् सूत्रपाठो नैव कर्त्तव्यः । अथ च वसतिस्तावदप्रतिलेखितेति तत्र स्वाध्यायस्यास्वाध्यायस्य वैकस्यापि निश्चयो नास्त्येव, केवलं अस्वाध्याय-सम्भावनामात्रम्, ततश्च तदा यदि सम्भावनामाश्रित्य निर्युक्तीनामपि स्वाध्यायो निषिध्यते, तर्हि तत्र वेश्यास्त्रीजुगुप्सितादिदोषा अनिवारिता भवेयुः । ततश्चास्वाध्यायसम्भावनामात्रे निर्युक्त्यादिगुणनसकाशात् वेश्यास्त्र्यादिदोषानां गरीयस्त्वादेव तत्र निर्युक्तिपाठा-नुमतिर्दत्तेति ।

तथा चायमत्र निष्कर्षः

(१) कालस्याशुद्धत्वे सूत्रपाठो न कर्त्तव्यः, निर्युक्तिपाठस्तु कार्यः ।

(२) वसतौ अस्वाध्यायनिश्चये सूत्रपाठो निर्युक्तिपाठश्चोभौ अपि न कर्त्तव्यौ ।

(३) वसतौ अस्वाध्यायनिश्चयो नास्ति, केवलं वसत्यप्रतिलेखनादस्वाध्याय-सम्भावनामात्रम् । तत्र वेश्यास्त्र्यादिदोषाणां गरीयस्त्वमपेक्ष्य तन्निवारणार्थमपवादतो निर्युक्तिगुणनमनुज्ञातमिति ।

इत्थं चास्वाध्याये पञ्चाङ्गीभणननिषेधः शास्त्रवचनानुसार्येवेति न कश्चिद् दोषः ।

अत्रास्वाध्यायः रुधिरादिरुपो बोध्यः । संयमोपघातिके धूमिकादिरुपेऽस्वाध्याये तु क्रियामात्रस्यैव निषेधान्निर्युक्तिगुणनस्यापि निषेधोऽर्थापत्याऽऽपन्न एव ।

यदि चैवमपि न मनः परितोषमुपयायात्, तर्हि "अस्वाध्याये सूत्रपाठस्यैव निषेधः, निर्युकत्यादिपाठस्त्वनुमत एवेति श्रुतव्यवहारः, संविग्नगीतार्थैस्तथाविध-कारणवशात्पञ्चाङ्गीमात्रस्य पाठो निषिद्ध इति जीतव्यवहारः । जीतव्यवहारस्य चावश्यमादरणीयत्वात् अस्वाध्याये पञ्चाङ्गीमात्रस्य पाठो न करणीय इति निर्गलितः पन्थाः ।

तथा "अह न सुज्झो कालो न पडिलेहिआ वा वसही" इति प्रकृतपाठरहस्यं केचिद् बहुश्रुता इत्थं वदन्ति → अत्र द्वौ विकल्पौ स्तः, कालोऽशुद्धः, अप्रतिलेखिता वसतिश्च । तत्र यदि प्रकाशे एव तत्र प्राप्ताः, तर्हि कालभूम्यादिः वसतिश्च प्रतिलेखिता, कालोऽपि गृहीतः, परन्तु स अशुद्ध इति तत्र सूत्रपाठो न शक्यते कर्तुम्, अतस्तत्र निर्युक्तीर्गुणयन्ति । अत्र वसतिप्रतिलेखनमस्ति, किन्तु कालः शुद्धो नास्तीत्येष प्रथमो विकल्पः ।

यदा तु कालभूमिर्दृष्टा, परन्तु समयाभावात् सम्पूर्णा वसतिर्न प्रतिलेखिता, तत्र यद्यपि

कालः शुद्धः सम्भवेदपि, तथाऽपि वसत्यप्रतिलेखनेनास्वाध्यायसम्भावना-माश्रित्य सूत्रपाठो न कर्त्तव्य इति तत्र निर्युक्तिगुणनं क्रियते । अत्र च शुद्धकालसम्भवोऽस्ति, परन्तु वसत्यप्रतिलेखन-कारणान्निर्युक्तिगुणनमेव क्रियते, न तु मूलसूत्रपाठ इत्ययं द्वितीयविकल्पः अथवा कालभूमिः वसत्यन्तर्गतैव गण्यते, ततश्च वसत्यप्रतिलेखने कालभूमिरपि अप्रतिलेखितैवेति कालभूमिप्रतिलेखनाभावादेव सूत्रपाठो न कर्तव्य ← इति ।

निशीथचूर्णौ त्वेवं पाठो दृश्यते → **असज्झाए वा सज्झायं, सज्झाए वा असज्झायं... लहुयाइं उ अकालकारिस्स सुत्ते अत्थे य** ← इति । अत्र अस्वाध्याये स्वाध्यायकर्ता अकालकारी उक्तः, तस्य चार्थेऽपि प्रायश्चित्तं प्रदत्तम् । अर्थश्च निर्युक्त्यादिरुप इति अस्वाध्याये तस्यापि निषेध एव प्राप्यते ।

अत्रार्थे सम्यक्निर्णयो बहुगीतार्थाधीन इति कृत्वा विरम्यते । वर्तमाने तु बाहुल्येन सूत्रस्य निरुक्त्यादिरूपार्थस्यापि चोभयस्यापि पाठो निषिध्यमानो दृश्यत इति स एवाधुनाऽनुसर्त्तव्यः । अनुप्रेक्षास्वाध्यायस्य तु न क्वापि निषेधः श्रुत इति ज्ञेयम् ।

**(७३) यदा पुनः कायिकार्थमुत्तिष्ठति स, तदा किं करोतीत्याह - द्रव्यतः क्षेत्रतः कालतो भावतश्चोपयोगं ददाति, तत्र द्रव्यतः कोऽहं प्रव्रजितो गृहस्थो वा ? क्षेत्रतः किमुपरितलेऽन्यत्र वा ? कालतः किमियं रात्रिर्दिवसो वा ? भावतः कायिकादिना पीडितोऽहं नवेति । एवमुपयोगे दत्तेऽपि यदा निद्रयाऽभिभूयते तदा निःश्वासं निरुणद्धि, नासिकां बाढं गृह्णाति निःश्वासनिरोधार्थं, ततोऽपगतायां निद्रायां आलोकं पश्यति ।**

**(ओ.नि. २०७)**

**चन्द्र. ननु** प्रातरुत्थायोपयोगकरणं न निगदितम्, किन्तु रात्रौ प्रश्रवणार्थोत्थाने तु द्रव्याद्युपयोगकरणं प्रतिपादितम्, तदत्र किं प्रयोजनमिति **चेत्**

इदम् । यदा कायिकार्थं रात्रौ उत्तिष्ठति, तदा 'निद्राऽल्पकालीनैवाभूत्' इति कृत्वा स निद्राव्याकुलितः सम्भवेत् । ततश्च तद्दशायां प्राक्तनाः संस्काराः प्रादुर्भवन्ति । ततश्च साधुरपि सन् गृहस्थकालीनसंस्कारप्रादुर्भावात् तत्तुल्यां प्रवृत्तिमाचरेत्, उपयोगे दत्ते तु 'अहं प्रव्रजितः' इत्युपयोगेन गृहस्थकालीनसंस्कारनिरोधात्साधूचितप्रवृत्तिमेवाचरेत् ।

एवं पूर्वदिनेषु अधस्तलस्थानस्थितत्वात्तद्रुपाः संस्काराः भवेयुः, ततश्चाद्योपरितलस्थानस्थितत्वेऽपि पूर्वदिनसंस्कारस्य निद्राव्याकुलितदशायां प्रादुर्भावाद् अधस्तनस्थानस्थिततुल्या प्रवृत्तिर्भवेत् । एवं चात्मविराधनादि दोषाः स्पष्टा एव ।

एवं कालानुपयोगे सति दिवससंस्कारप्रादुर्भावाद् भिक्षाटनाय निर्गमनादिकमपि स्यात्, तदुपयोगे तु दत्ते रात्रिज्ञानाज्ञानुचितप्रवृत्तिः स्यात् । तथा चाधुना वैयावृत्त्यसंस्कारवशात्कश्चित्साधुः रात्रौ एव उत्थाय भिक्षाटनाय पात्रकादीन् गृहीत्वा निर्गच्छन् सङ्घाटकैर्निवारित इति श्रुतम् ।

एवं भावानुपयागे सति कायिकादिपीडासद्भावेऽपि स पुनर्निद्रायात्, ततश्च निद्रायामेव कायिकादिना उपधिरशुद्धा स्यादिति । भावोपयोगे तु सति पीडासद्भावज्ञानात् तन्निवारणानन्तरमेव पुनःनिद्राकरणान्न प्रकृतो दोषः ।

इत्थं चार्धनिद्रादशायां रात्रौ उत्थाने द्रव्याद्युपयोग आवश्यक इति स्फुटं प्रतीयते ।

किञ्च जाग्रद्दशायां स्ववशतया स्वोचिता सकलाऽपि प्रवृत्तिः कर्तुं पार्यते, अनुचितसंस्कारश्च निरोद्धुं शक्यते । अर्धनिद्रादिदशायान्तु निद्रापरवशतयाऽन्तः वर्तमानानां केषाञ्चिदपि संस्काराणां प्रादुर्भावात् सर्वथाऽनुचिताऽपि प्रवृत्तिर्दुर्निवारा भवेदिति तु दृष्टान्तबाहुल्यदर्शनतोऽप्यनुभवसिद्धमेवेति युक्तमुक्तं "कायिकार्थोत्थाने उपयोगः कर्त्तव्य" इति ।

प्रातरुत्थाने तु निद्रायाः संपूर्णत्वात् न निद्राव्याकुलितदशा भवेदिति शीघ्रमेव जाग्रद्दशाप्रापणान्न तथाविधोपयोगावश्यकता, तथाऽपि तदुपयोगकरणे तु दोषोऽपि न कश्चिद् दृश्यत इति ।

यदि च रात्रौ उपयोगकरणेऽपि निद्रा अभिभवेत्, तर्हि तत्परिहारार्थं निःश्वासं निरुणद्धि ।

**ननु** 'उसासं न निरुज्झइ' इति आगमवचनात् उच्छ्वासादिनिरोधः निषिद्धः, ततश्च कथमेतद् युक्तमिति **चेत्** सत्यम्, उच्छ्वासादिनिरोधस्य बलप्रयोगत्वेन निषिद्धत्वमेव, परन्तु स उत्सर्गमार्गः, अत्र तु प्रतिपादितदोषनिवारणार्थं निद्रापगमनायोच्छ्वासादि-निरोधोऽपि न्याय्य एव, अत एव रेचकपुरककुम्भकादिरुपसाधनाया उत्सर्गतो जिनमते निषिद्धाया अप्यपवादतो विहितत्वं पातञ्जलयोगसूत्रविवेचने प्रतिपादितं महोपाध्यायैरिति स्मर्तव्यमत्र ।

**( ७४ ) उत्सर्गतस्तावत्प्रावरणरहितः स्वपिति, अथ न शक्नोति यापयितुमात्मानं ततोऽसंस्तरमाणः प्रावृणोति एकं कल्पम्, एवं द्वौ त्रीन् वा, तथाऽपि यदि शीतेन बाध्यते, तदा बाह्यतोऽप्रावृतः कायोत्सर्गं करोति, ततश्च शीतव्याप्तोऽभ्यन्तरं प्रविशति, तत्र च प्रविष्टो निवातमिति मन्यते, तत्रापि स्थातुमशक्नुवन् कल्पं गृह्णाति, एवं द्वौ त्रींस्तावद्यावत्समाधानं जातम् ।.... अववाएणं जहा वा समाही होति तहा कायव्वं । ( ओ.नि. २१० )**

**चन्द्र.** सर्वं स्पष्टम् । नवरं अतिरिक्तोपधिपरिग्रहपरिहारार्थमेष विधिः, यदि च तेनाऽपि न समाधानम्, तदाऽन्तेऽपवादेन यथासमाधानं कर्त्तव्यत्वस्य प्रतिपादनात् अतिरिक्तोपधिपरिग्रहोऽपि अनुज्ञात इति । अपवादेन तथाकरणे तु न पञ्चममहाव्रतभङ्ग इति ।

**ननु** गृहस्था अपि शीतत्रस्ता यथासमाधानं परिग्रहादिकं सर्वं कुर्वन्ति, यदि च साधुरपि तथा करोति, तदा को विशेषस्तयोरिति **चेत्** परिणामकृतो महान्भेदस्तयोः । तथाहि - सुविहिताः साधवः प्रथमं तु परिग्रहाकरणार्थं शीतसहनायैव यतते, तथाऽपि यदि सोढुं न शक्नुवन्ति, तदा परिग्रहं परिगृह्णन्ति गृहस्थास्तु सुखशीलताव्या-कुलितान्तःकरणाः प्रथमत एव परिग्रहादिकं कुर्वन्ति ।

किञ्च "यदि अहं अधिकपरिग्रहेण शीतत्राणं न कुर्यां, तर्हि आर्तध्यानान्मम प्रभूतकर्मबन्धो भवेत् । तथाऽऽर्तध्यानपीडितोऽहं स्वाध्यायादिकमपि न सम्यक्कर्तुं पारयेयम् । तथाऽऽर्तध्याने निद्राऽभवनात् दिनेऽपि सकलसंयमयोगा निद्रादिव्या-कुलितत्वेन बाधिताः स्युः । इत्थं च मम मोक्षमार्गाराधनं तु दूरे, प्रत्युत महती हानिर्मोक्षमार्गस्य । तस्मान्मया केनाऽपि प्रकारेण यतनया शीतत्राणं कार्यं" इति शुभपरिणामादेव सुविहिताः परिग्रहादिकं अपवादतः कुर्वन्ति । न च गृहस्थास्तथेति महान्भेदस्तयोः स्पष्ट एव ।

यदि तु मुनयोऽपि गृहस्थवत् केवलं दुःखद्विषः सुखलिप्सवश्च भूत्वा सुखशीलतापारवश्यात् अधिकोपध्यादिकं परिगृह्णन्ति, तर्हि तेऽपि न निर्दोषा इति निष्पक्षपातेन मनसा निर्णेतव्यम् ।

**( ७५ ) एवमानीय कति दिनानि भक्तं प्राघूर्णकेभ्यो दीयते इत्यत आह त्रीणि दिनानि प्राघूर्णकं सर्वेषां, असति बालवृद्धानां कर्त्तव्यम् । ( ओ.नि. २१६ )**

**चन्द्र.** शक्तौ सत्यां वास्तव्यैस्त्रीणि दिनानि यावत् प्राघूर्णकानां प्राघूर्णकं कार्यमिति भावः ।

**( ७६ ) तत्र भुक्तभोगस्य आसन्नस्य स्वपतोऽन्यसाधुसंस्पर्शात्पूर्वक्रीडितानुस्मरणं भवति, यदुतास्मद्योषितोऽप्येवंविध एव स्पर्श इति । अभुक्तभोगस्यापि अन्यसाधुसंस्पर्शेन सुकुमारेण कौतुकं स्त्रियं प्रति भवति, अयमभिप्रायः तस्याः सुकुमारतरः स्पर्श इति । ततश्च द्विहस्ताबाधायां स्वपतामेते दोषाः परिहृता भवन्ति । तथा-कलहः-परस्पर हस्तस्पर्शजनित आसन्नशयने, ते च दोषा एवं वर्जिता भवन्ति । ( ओ.नि. २२९ )**

**चन्द्र.** इत्थं चोत्सर्गतः साधूनां परस्परं स्पर्शोऽपि ब्रह्मचर्यातिचारसम्भवान्न करणीय इति बोध्यम् ।

**( ७७ ) यो धर्मकथालब्धिसंपन्नः, स पूर्वमेव गत्वा शय्यातराय वसतेर्बहिर्धर्मकथां करोति । न चासौ धर्मकथां कुर्वन् अभ्युत्थानं करोति ज्येष्ठार्याणाम् । आह किमाचार्यागमने धर्मकथी अभ्युत्थानं करोति उत नेति ? आचार्य आह-अवश्यमेवाभ्युत्थानं आचार्यस्य करोति । ( ओ.नि.भा.१११ )**

**चन्द्र.** मासकल्पप्रायोग्ये स्थाने प्राप्तो गच्छः वसतिं प्रवेष्टुमिच्छति, तत्र च को विधिरित्यत्र प्रतिपादितम् । अत्र हि धर्मकथालब्धिसम्पन्नस्य धर्मकथाव्यापृतत्वकारणा-ज्ज्येष्ठार्याणामभ्युत्थानं निवारितम् । अनेन च ज्ञायते यत् धर्मकथाव्यापृतत्वाभाव-दशायान्तु ज्येष्ठार्याणामपि अभ्युत्थानादिकं कार्यम् । तथा चोपाश्रयेऽपि साधुभिः स्वस्थानमागच्छतां ज्येष्ठार्याणां अभ्युत्थानं करणीयम्, न तूपविष्टैनैव भवितव्यमिति ।

**( ७८ ) यदा तु पुनराचार्यस्य धर्मकथालब्धिर्न भवति, तदा शिष्यं नियुङ्क्ते धर्मकथाकथने । ( ओ.नि.भा. ११४ )**

**चन्द्र. ननु** चित्रमिदं यदाचार्यस्य धर्मकथालब्धिराहित्यम्, धर्मकथालब्धेरेवाचार्यस्य प्रधानगुणत्वात् । तदुक्तं "तित्थयरसमो सूरि सम्मं जो जिणमयं पयासेइ" इति । अत्र तीर्थंकरसमत्वं सूरेः सम्यक् जिनमतप्रकाशनगुणेन प्रतिपादितम् । ततश्च जिनमतप्रकाशनमेवाचार्यास्य प्रधानगुण इति ज्ञायते । एतदेव यदि आचार्यस्य न भवेत्, कथं तर्हि तस्याचार्यत्वं ? कथं तद्गुरुणा तस्मै आचार्यपदं प्रदत्तमिति **चेत्**

न, जिनमतप्रकाशनगुणसत्त्वेऽपि धर्मकथालब्धिराहित्यसम्भवान्न दोषः ।

**ननु** किमिदमसम्बद्धं भाष्यते, जिनमतप्रकाशनं धर्मकथालब्धिश्चैक एव गुणः, न तयोर्भेद इति **चेत्**

न, तयोर्भेदात् । सम्यक् सूत्रार्थज्ञापकत्वं हि जिनमतप्रकाशनम्, आक्षेपण्यादिकथानैपुण्यं तु धर्मकथालब्धिः, आचार्यस्य तावत् सम्यक् सूत्रार्थप्रज्ञापकत्वगुणो भवत्येव, तं विनाऽऽचार्यपदायोग्यत्वात्, आक्षेपण्यादि-कथानैपुण्यं तु भजनीयं इति आचार्यस्य धर्मकथालब्धिराहित्येऽपि आचार्यप्रधानगुण-युक्तत्वं सूत्रार्थप्रज्ञापकत्वरुपं सम्भवतीति यथायोग्यं चिन्तनीयमिति ।

अत्र सूत्रार्थप्रकाशनं साधुगणपुरतः, आक्षेपण्यादिकथा तु गृहस्थपुरतः इति सामान्यतः श्रोतृनिमित्तको भेदोऽप्यगन्तव्य इति ।

## (७९) इदानीं यदि क्षपकास्तस्मिन्दिवसे साधव उपवासिकास्तत्र च सन्निवेशे यदि श्रावकाः सन्ति, ततस्तद्गृहेषु चैत्यानि वन्दन्तो दर्शयन्ति, कानि ? स्थापनादीनि कुलानि आगन्तुकेभ्यः । (ओ.नि.भा. ११७)

**चन्द्र.** मासकल्पप्रायोग्ये क्षेत्रे वसतौ च यस्मिन्दिवसे प्राप्ताः, तद्दिने यदि ते साधवः उपवासिकाः, तर्हि किं कुर्वन्तीत्येतत्प्रतिपादनपरोऽयं पाठः प्रायः सुगमः ।

**ननु** पाठः सुगमः, किन्तु पदार्थो न सुगमः । तथा हि "तत्र च सन्निवेशे **यदि** श्रावकाः **सन्ति**" इत्यत्र **यदि** पदेन मासकल्पयोग्येऽपि क्षेत्रे श्रावकाणां सद्भावो भजनाप्राप्त एव प्रदर्शितः, अर्थात् 'तत्र सन्निवेशे श्रावका भवन्ति न वा भवन्ति' इति अर्थोऽत्र प्राप्यते । श्रावकाभावे च चैत्याभावोऽपि स्पष्टः, ततश्च श्रावकसद्भावभजनायां चैत्यसद्भावभजनाऽप्यत्रार्थाद् ज्ञायत एव । तत्किं श्रावकरहितः चैत्यरहितश्च सन्निवेशो मासकल्पयोग्यो भवति ? येन क्षेत्रप्रत्युपेक्षकैस्तत्स्थानं अङ्गीकृतम्, सकलगच्छश्च तत्र मासकल्पाय समुपस्थित इति **चेत्**

**उच्यते** । सामाचारी हि तत्तत्कालाद्यधीना न नियतेति तदानींतनतादृशसामाचारी-दर्शनान्न व्यामोहः कार्यः ।

अयं भावः - यत्र क्षेत्रे उच्चारप्रश्रवणभूमिर्निर्दोषा, बालाद्याकूलगच्छप्रायोग्या-हारपानकादिलाभः सुलभः, मांसाद्यनाकीर्णत्वात्स्वाध्यायो निराबाधः, संयमोत्सर्पणानुकूला

सकलाऽपि व्यवस्था, तत्र तैर्मासकल्पादि क्रियते । एतच्च सर्वं श्रावकविरहितेऽपि ग्रामादौ शक्यमेव । न हि तदानीं भद्रका मिथ्यादृष्टिनः साधुभक्ता नासन्, न वा साधवस्तत्र भिक्षार्थं नागच्छन् । ततश्च मासकल्पादिकरणाय श्रावकसद्भावोऽनावश्यकस्तदानीमासीत् । चैत्यालम्बनमपि स्वाध्यायादिप्रकृष्टालम्बनवतां तदानीन्तनसाधूनां नावश्यकतां बिभर्ति । केवलं यदि तदस्ति, तर्हि शोभनम् अथ चेन्नास्ति, नैतावता मासकल्पाप्रायोग्यत्वं क्षेत्रस्येति चैत्यालम्बनाऽभावेऽपि तेषां तत्रावस्थानं कथं नु नाम दुष्टं वक्तुं शक्यं स्यात् ?

अधुना तु यदि चैत्यालम्बनावश्यकत्वं साधुसामाचार्यां प्रविष्टं भवेत्, भवतु नाम, न तेन तदानीन्तनसामाचारीबाधः, कालभेदेन सामाचारीभेदस्य प्रत्यक्षसिद्धत्वात् । न च प्रतिदिनं चैत्यदर्शनादेव साधूनां सम्यग्दर्शनशुद्धिरन्यथा तु तन्मालिन्यमिति युक्तिविरहितं वाच्यम् । एवं सति चैत्यपूजादिपरायणैश्चैत्यवास्यादिभिः "प्रतिदिनं चैत्यपूजनादेव साधूनां सम्यग्दर्शनशुद्धिरन्यथा तु तन्मालिन्यं" इत्यपि वक्तुं शक्यं स्यात् ।

वस्तुतस्तु सालम्बनयोगप्रधानानां गृहस्थानां चैत्यदर्शनादिकमावश्यकतां बिभर्ति, निरालम्बनयोगप्रधानानां तु नेति अधिकारिभेदानुसरणे न कोऽपि दोषः, तदुक्तमष्टकप्रकरणे "**अधिकारिवशाच्छास्त्रे धर्मसाधनसंस्थितिः**" इति ।

इदन्तु निर्णेतव्यं शासनरसिकैः मध्यस्थसंविग्नगीतार्थैः यदुत-चैत्यादिविरहिते क्षेत्रे यदि शासनप्रभावना, जैनेतराणां बाहुल्येन मार्गानुसार्यादिधर्मप्राप्तिश्च सम्यक्तया तथाविधप्रभावकैः कर्तुं शक्येत, तर्हि किं तैस्तत्र गन्तव्यं, वसनीयं न वेति ।

## (८०) यदा पुनस्तत्र श्रावककुलेषु चैत्यानि न सन्ति ततोऽसति चैत्यानां भिक्षामेव हिण्डन्तः कथयन्ति (दानादिकुलानि) (ओ.नि.भा.१२)

**चन्द्र.** एतच्च प्रागेव भावितम्, यदुत श्रावकसद्भावेऽपि चैत्याभावः कथं सम्भवेदिति न भूयो भाव्यते ।

**ननु** मा भवतु गृहचैत्यम्, सङ्घचैत्यं तु भवेदेवेति **चेत्** न यदि हि सङ्घचैत्यं स्यात्, तर्हि "असति गृहचैत्यानां सङ्घचैत्यं वन्दन्तः कथयन्ति" इत्येवमवक्ष्यट्टीकाकृत् ।

## ( ८१ ) आयरियअणुकंपाए गच्छो अणुकंपिओ महाभागो । गच्छाणुकंपयाए अव्वोच्छित्ती कया तित्थे । ( ओ.नि.भा.१ )

**चन्द्र.** आचार्यानुकम्पया महाभागो गच्छोऽनुकम्पितो भवति । गच्छानुकम्पया च तीर्थेऽव्यवच्छित्तिः कृता भवतीति सङ्क्षेपार्थः ।

अत्राह कश्चित् – सुपात्रे भक्तिरनुकम्प्ये चानुकम्पा इति उचितः पन्थाः, आचार्यश्च महत् सुपात्रम्, ततश्च तत्र भक्तिरेव कर्त्तव्या, न त्वनुकम्पा, प्रकृते च पाठे आचार्यं प्रति अनुकम्पा प्रतिपादितेति कथमिदं सङ्गच्छेत । तथा चाह दानद्वात्रिंशिकायां, "अनुकम्प्ये सुपात्रत्वस्य सुपात्रे चानुकम्प्यत्वस्य बुद्धिस्तु दातृणामतिचाराय" इति ।

अत्रोच्यते – भक्त्यर्थकमेवेदमनुकम्पापदमिति न दोषः । यदि वा यद्दुःखोद्धारः स्वस्येष्टः, तद्वानेव यदि अनुकम्प्यः, तर्हि तादृशानुकम्प्यत्वमत्या क्रियमाणाऽनुकम्पापि नातिचारापादिका, परन्तु तादृश्यनुकम्पायां यदि "अयं मत्सकाशाद्धीनः" इति बुद्धिर्भवेत्, तर्हि तदा क्रियमाणाऽनुकम्पाऽतिचारापादिका ।

तथा चोक्तं द्वात्रिंशिकायामेव → अपरे त्वाहुः तत्र प्रागुक्तं निर्विशेषणमनुकम्प्यत्वं प्रतीयमानं साहचर्यादिदोषेण यदा हीनबुद्धिं जनयति, तदैवातिचारापादकं, नान्यदा । अन्यथाधियो हीनोत्कृष्टयोरुत्कर्षापकर्षबुद्ध्याधानद्वारैव दोषत्वात् । अत एव "न चानुकम्पादानं साधुषु न सम्भवति "आयरियअणुकम्पाए गच्छो... इति वचनात्" इति अष्टकवृत्त्यनुसारेणाचार्यादिष्वपि उत्कृष्टत्वधियोऽप्रतिरोधेऽनुकम्पाऽव्याहता ← इति ।

इत्थं चाचार्यादिषु यदि हीनत्वबुद्धिर्न भवेत्, तर्हि तद्दुःखोद्धारेच्छारुपाऽनुकम्पा नातिचारापादिकेति आचार्यादिष्वपि अनुकम्पा सम्भवति इति निश्चेयम् ।

**ननु** तर्हि "भगवान्वीरो गर्भे मातुरनुकम्पया निश्चलोऽभवत्" इति कल्पसूत्रपाठस्य कोऽर्थः? इति **चेत्**

तत्रापि मातुर्दुःखोद्धारेच्छारुपा अनुकम्पा भगवत्यस्ति, तया च स स्थिरोऽभवत् । न चात्र हीनत्वबुद्धिरस्तीति अनुकम्पा निर्दोषैव ।

**ननु** तर्हि सुबोधिकावृत्तौ 'साऽनुकम्पा भक्तिः' इति कथं स्पष्टीकृतमिति **चेत्** लोकव्यवहारानुसरणादित्यवजानीहि । लोके हि मातुःदुःखप्रतिक्रिया नानुकम्पा उच्यते,

परन्तु भक्तिरेव । दीनादिदुःखप्रतिक्रियैवानुकम्पोच्यत इति ।

इदमत्रावधेयं । सा भक्तिरपि लौकिकव्यवहारत एव । लोकोत्तरभक्तिस्तु सुपात्रे सुपात्रत्वधिया भक्तदानादिरुपा । न हि भगवता "मम माता सुपात्रम्, तस्मात् तद्दुःखमपहरामि" इति मतिः कृता । केवलं मातुः दुःखं उद्दीधिर्षतैव भगवता निश्चलत्वं कृतमिति न सा भक्तिः सुपात्रभक्तिवद् साक्षाद् रत्नत्रय्याराधनरुपेति ।

## (८२) अलसं घसिरं सुविरं खमगं कोहमाणमायालोहिल्लं । कोऊहलपडिबद्धं वेयावच्चं न कारिज्जा । (ओ.नि.भा. १३३)

**चन्द्र.** अलसः, बहुभक्षकः, स्वपनशीलः, क्षपकः क्रोधी, मानी, मायावी, लोभी, कुतुहलप्रतिबद्धश्चैते वैयावृत्त्यकरा न कर्त्तव्याः, बहुदोषसम्भवात् । के ते दोषाः इति तु सुगमत्वात् वृत्तावुक्तत्वाच्च नात्रोच्यते । विशेषार्थिना वृत्तिर्दृश्येति ।

एतादृशदोषविमुक्तं कृतयोगिनं = गीतार्थमिति यावत्, प्रसिद्धशोभनशीलाचारं वैयावृत्त्यकरं कुर्यादिति ।

## (८३) प्राघूर्णकाय विशेषदाने सति निर्जरा = कर्मक्षयो भवति, इहलोके कीर्तिश्च भवति । यदि प्राघूर्णकविशेषदानं न क्रियते ततश्च निर्जराकीर्ती न भवतः । (ओ.नि.भा.१४१)

**चन्द्र.** तथा च "जो गिलाणं पडिसेवइ सो मां पडिसेवइ "इति जिनवचनवत् जो पाहुण्णं पडिसेवइ, सो मां पडिसेवइ" इति वचनमप्याध्याहार्यं, ग्लानप्रतिसेवयेव तत्प्रतिसेवयापि सदृशफलजननसम्भवादिति ।

**( ८४ ) अन्यग्रामे भिक्षाटनेन उद्गमदोषाः आधाकर्मादयः विजढाः परित्यक्ता भवन्ति, प्रचुरस्य भक्तादेर्लाभो भवति, न वा अपमानं अनादरकृतं भवति लोके, तथा मोहचिकित्सा च कृता भवति, श्रमातपवैयावृत्त्यादिभिर्मोहस्य निग्रहः कृतो भवति-अवकाशो दत्तो न भवति, वीर्याचारश्चानुष्ठितो भवति । ( ओ.नि. २५०. )**

**चन्द्र.** तथा च समर्थेन श्रमणेन दूरं गन्तव्यं भिक्षायै इति निष्कर्षः । कारणवशतस्तु समीपेऽपि गम्यत एवेति ।

**( ८५ ) एकान्ते यतनयाऽसंसृष्टं च यथा भवति तथा प्रथमालियंति - मात्रके पृथगाकृष्य भुङ्क्ते हस्तेन वा द्वितीयहस्ते कृत्वा ( ओ.नि. २५१ )**

**चन्द्र.** ग्रामान्तरं भिक्षार्थं गतस्य सङ्घाटकस्य यदि बुभुक्षा भवेत्, तर्हि स तत्रैवैकान्ते प्रथमालिकां कुर्यात् । तत्र प्रथमालिका नाम मध्याह्नभोजनमण्डलीसकाशाद् बहिः पूर्वमेव भोजनम्, तच्च प्रातःकालेऽपि भवेत् उपमध्याह्न अपि भवेत् । तथा च प्रथमालिकापदं न नमस्कारसहितप्रत्याख्यानमात्रपरमित्यवगन्तव्यमिति सप्रसङ्गमुक्तम् ।

प्रकृतमुच्यते । तत्र सङ्घाटको नाम द्वौ साधौ, द्वयोः समीपे एकमेकं पात्रमेकमेकं च मात्रकमिति । तत्रैकस्मिन्पात्रके उभयोः भक्तमेकस्मिंश्चोभयोः पानकं, एकस्मिन्मात्रके संसक्तपानकमेकस्मिंश्चाचार्यप्रायोग्यं गृह्यत इतीयं व्यवस्था । तत्र आचार्यप्रायोग्ययोग्ये मात्रके न प्रथमालिका करणीया, परन्तु संसक्तपानकयोग्ये मात्रके संसक्तपानकाग्रहणात् रिक्ते प्रथमालिका कर्त्तव्या । तत्र संसक्तपानकग्रहणे तु कृते भक्तपात्रके एव पृथगाकृष्य भोक्तव्यम् । अथवा हस्तेन द्वितीयहस्ते कृत्वा भोक्तव्यमित्येवं द्विधा प्रकारेण भोजनस्यासंसृष्टत्वं

सम्भवति । एतच्च प्रायः शुष्कभक्ते एव सम्भवेत् न तु आर्द्रभक्ते । तत्र मिश्रीभवनसम्भवादिति ।

अधुना तु पात्रके पृथगाकृष्य भोजनेऽपि पात्रकगतं सर्वमेव संसृष्टं व्यवह्रीयमाणं दृश्यते, मण्डकमर्मरादिकं तु एकेन हस्तेन गृहीत्वाऽपरहस्ते कृत्वा भक्ष्यमाणं असंसक्तं व्यवह्रीयमाणं दृश्यते, तदत्र स्वसामाचार्यनतिक्रमेण प्रवृत्तिः कर्त्तव्येति ।

**( ८६ ) संसज्यते-प्राणिभिः सह संसर्गमुपयाति 'ध्रुवं' अवश्यं एतत् वस्त्रादि अप्रत्युपेक्षितं सत्, तेन पूर्वमेव केवलिनः प्रत्युपेक्षणां कुर्वन्ति, यदा तु पुनरेवं संविद्रते, इदमिदानीं वस्त्रादि प्रत्युपेक्षितमपि उपभोगकाले संसज्यते, तदा जिनाः केवलिनः प्रत्युपेक्षन्ते न त्वनागतमेव, पलिमन्थदोषात् । ( ओ.नि. २५९ )**

**चन्द्र.** अयमत्र स्पष्टार्थं दृष्टान्तः-सूर्योदयकाले वस्त्रादि प्रतिलेखनीयं, तत्परिभोगश्च द्वितीयप्रहरान्ते कर्त्तव्यः । ततश्च यदि 'सूर्योदयकाले प्रत्युपेक्षितं तद्वस्त्रं द्वितीयप्रहरान्ते न जीवसंसक्तं भवति' इति यदि केवलज्ञानेन केवलिनो जानन्ति, तदा ते सूर्योदयकाले एव वस्त्रादि प्रतिलेखयन्ति, उपयोगकाले तु विना प्रतिलेखनामेवोपभुञ्जन्ति । यदा तु ते जानन्ति यदुत "अधुना वस्त्रादीदं प्रतिलेख्यते न वा, तथाऽपि उपभोगकाले तु तदवश्यं संसक्तमेव भविष्यति" इति, तदा ते न सूर्योदयकाले प्रतिलेखयन्ति परन्तु द्वितीयप्रहरान्त एव उपभोगकरणकाले प्रतिलेखयन्ति, येन द्विः प्रतिलेखयितव्यं न स्यादिति पलिमन्थदोषो न भवेत् ।

छद्मस्थास्तु प्रतिदिनं नियतकाले एव द्विः प्रतिलेखयन्ति, उपभोगकाले तु पुनरपि प्रतिलेखयन्ति, यदि तद्वस्त्रादि भूम्यादौ निक्षिप्तं स्यात् । नियतकालीनप्रतिलेखनानन्तरं यदि तद् वस्त्रादि भूम्यादौ निक्षिप्तं न स्यात्, तदा तूपभोगकालेऽपि प्रतिलेखनां विनैवोपभुञ्जन्ति, न कश्चित्तत्र दोष इति पूर्वं भावितमप्यविस्मरणार्थं पुनरुक्तमिति ज्ञेयम् ।

अत्र छद्मस्थानां असंसक्तमपि वस्त्रं प्रतिदिनं वारद्वयं किमर्थं प्रतिलेखनीयमिति प्रश्नस्य समाधानं तु ओघनिर्युक्तिवृत्तिसकाशादेवावगन्तव्यम्, तत्र स्पष्टमुक्तत्वात् ।

**( ८७ ) स्थानं - कायोत्सर्गस्तं कुर्वन् प्रथमं चक्षुषा प्रत्युपेक्षते पश्चात्प्रमार्जयति, तथा निषीदनं उपवेशनम्, त्वग्वर्तनं - स्वपनं तथोपकरणादीनां ग्रहणे निक्षेपे च, आदिग्रहणात्स्थण्डिलमवष्टम्भश्च गृह्यते, एतानि सर्वाणि पूर्वं चक्षुषा प्रत्युपेक्ष्य पश्चाद् रजोहरणेन प्रमृज्यन्ते ।**

**( ओ.नि.भा. १५१ )**

**चन्द्र.** सर्वं स्पष्टम् । नवरं दिवसेऽपि सप्रकाशेऽपि स्थाने केवलं प्रत्युपेक्षणं केवलं वा प्रमार्जनं प्रायश्चित्तार्हं भवति, उभयकरण एवाप्रायश्चित्तम् । उभयमपि सुष्ठु करणीयम्, अन्यथा दुष्प्रतिलेखने दुष्प्रमार्जने च पुनःप्रायश्चित्तं भवत्येवेति ।

अत्र चतुर्भङ्गी (१) अप्रतिलेखनमप्रमार्जनं (२) अप्रतिलेखनं प्रमार्जनं (३) प्रतिलेखनमप्रमार्जनं (४) प्रतिलेखनं प्रमार्जनं ।

अत्र यश्चतुर्थो भङ्गः, तस्य पुनरपि चत्वारो भङ्गाः, तथाहि (१) दुष्प्रतिलेखनं दुष्प्रमार्जनं (२) दुष्प्रतिलेखनं सुप्रमार्जनं (३) सुप्रतिलेखनं दुष्प्रमार्जनं (४) सुप्रतिलेखनं सुप्रमार्जनम् ।

अत्र सर्वसंख्यया सप्त भङ्गाः,

**ननु** चतुर्भङ्गीद्वयसद्भावादष्टौ भङ्गा अत्र भवन्तीति **चेत्** सत्यम्, परन्तु प्रथमचतुर्भङ्गीसम्बन्धी यो चतुर्थो भङ्गः, तस्यैव द्वितीया चर्तुभङ्गीति स भङ्गः पृथग् न गण्यत इति कृत्वा सप्तैव भङ्गाः, तत्र सप्तमो भङ्गः शुद्धः, अपरे तु षड् दोषान्विता इति ।

**ननु** केवलं प्रतिलेखनकरणेऽपि जीवरक्षासद्भावात् कथं तत् दोषान्वितमिति **चेत्** अतिसूक्ष्मास्त्रसा सुप्रतिलेखनेनापि न दृश्यन्ते, ते च प्रमार्जनेनैव रक्ष्यन्ते इति प्रतिलेखनकरणेऽपि प्रमार्जनमावश्यकं ।

**ननु** तर्हि प्रमार्जनमेकमेव क्रियतां, किं प्रतिलेखनेनेति **चेत्** न, यदि प्रतिलेखनं विनैव प्रमार्जनं क्रियते, तर्हि यदि तत्राप्कायादिकः स्थावरकायो भवेत्, तर्हि तस्य प्रमार्जनेन विराधनैव स्यात्, न तु रक्षा । न हि स्थावराः त्रसवत् प्रमार्जनेन रक्षितुं शक्यन्ते, प्रत्युत विराध्यन्ते । किञ्च प्रतिलेखनं विना प्रमार्जने मर्कटकसन्तानविघातो भवेत्, ततश्च त्रसविराधनाऽपि सम्भवत्यत्र । यदि च तत्र प्रतिलेखनं क्रियते, तर्हि स्थावरसद्भावज्ञानात्प्रमार्जनाद् विरम्यते, ततश्च स्थावरविराधना न स्यात् । तस्मात् स्थावररक्षार्थं प्रतिलेखनं त्रसरक्षार्थं च प्रमार्जनमुभयमप्यावश्यक-मित्येकतरस्याप्यकरणे ध्रुवं प्रायश्चित्तम् ।

अत्रापवादः, गमने केवलं प्रतिलेखनमेव कर्त्तव्यम्, न तु प्रमार्जनम्, अत एव प्रकृतपाठे गमनं नोक्तम् । तथा रात्रौ प्रमार्जनमेव क्रियते, प्रतिलेखनन्तु सान्धकारत्वात्तत्र दुःशकमेवेति तन्न क्रियते । तथा कारणवशाद्रात्रौ विहारकरणे न प्रतिलेखनं न चापि प्रमार्जनं क्रियते । एवं यथासम्भवमपवादो विभावनीयः ।

अत्रार्थेऽधिकं तु अष्टप्रवचनमातापुस्तकान्तःप्रतिपादितादानभण्डमात्र-निक्षेपणसमितिसकाशादवसेयम् ।

## (८८) संदंशं - जङ्घोर्वोरन्तरालं, तं प्रमृज्य उत्कुटुकः स्थित्वा पुनर्भुवं प्रमृज्य निषीदेत् । (ओ.नि.भा. १५५)

**चन्द्र.** अयं च निषीदनविधिरुक्तः ।

अत्र चालना - प्रथमं जङ्घोर्वोरन्तरालप्रमार्जनम्, द्वितीयं उत्कुटुकतया स्थानम्, तृतीयं भूमिप्रमार्जनम्, चतुर्थं च भूमिनिषीदनमित्यत्र क्रमः प्रतिपादितः, परन्तु अस्माकमेषोऽभिप्रायः यदुत प्रथमं जङ्घोर्वोरन्तरालस्य भूमेश्च प्रमार्जनम्, द्वितीयं उत्कुटुकतया स्थानम्, तृतीयं भूमिनिषीदनमिति द्वयोः प्रमार्जनयोः समकमेव करणे लाघवात् इति ।

प्रत्यवस्थानं त्विदं – प्रमार्जननिषीदनक्रिययोर्मध्ये यथाशक्यमल्पकालान्तरमेव

युक्तम्, अधिककालान्तरे त्रसादिजीवागमनसद्भावात्, ततश्च विराधनाभवनात् प्रमार्जननैरर्थक्यप्रसङ्गात् । इत्थं च पाठोक्तरीत्या भूमिप्रमार्जनभूमिनिषीदनयोर्मध्ये-ऽन्तराभावात् जीवविराधनाऽसम्भवः, भवदुक्तरीत्या करणे तु भूमिप्रमार्जनभूमि-निषीदनयोर्मध्ये उत्कुटुकस्थानस्यान्तरभूतत्वात् जीवविराधनासम्भवः, तस्मान्नैतद् भवदुक्तं युक्तमिति ।

**ननु** उत्कुटुकासनमेव न कर्त्तव्यम्, प्रमार्जनानन्तरं निषीदनमेव कर्त्तव्यमिति अन्तराभावान्न दोष इति **चेत्** सत्यम्, तथाऽपि जङ्घोर्वन्तरालप्रमार्जनस्य तत्सङ्कोचस्य च मध्ये भूमिप्रमार्जनस्यान्तरभूतत्वात्, जङ्घोर्वन्तरालप्रमार्जनस्य निरर्थकत्वसम्भवात् ।

अयं भावः, यदि हि भवदुक्तरीत्या क्रियेत, तर्हि प्रथमं जङ्घोर्वन्तरालस्य संदंशापरपर्यायस्य प्रमार्जनम्, द्वितीयं भूमिप्रमार्जनं तृतीयं च निषीदनं स्यात् । निषीदने संदंशसङ्कोचोऽवश्यंभावी, अत एव तस्य प्रमार्जनं कृतम्, येन सङ्कोचेन संदंशगतजीवविराधनं न स्यात् । परन्तु अत्र भूमिप्रमार्जनस्यान्तरभूतत्वात् तत्र जीवविराधनासम्भवः, ततश्च संदंशप्रमार्जननैरर्थक्यमिति नायं पन्थाः श्रेयान् । ग्रन्थोक्तरीत्या तु संदंशप्रमार्जनानन्तरमेवोत्कुटुकासनं भवतीति तत्र संदंशप्रमार्जन-सङ्कोचयोर्मध्येऽन्तराभावान्न जीवविराधनासम्भव इति न कश्चिद् दोषः ।

किञ्च भूमिप्रमार्जनात्पूर्वं भूमिप्रतिलेखनमावश्यकं, तच्चोर्ध्वस्थितेन सता न सम्यक् कर्तुं पार्यते, चक्षुःभूम्योर्मध्ये बह्वन्तरभावात् । ततश्चोत्कुटुकासनस्थितेनैव भूमिप्रतिलेखनं करणीयम्, येन चक्षुःभूम्योर्मध्येऽल्पमेवान्तरं स्यात् । इत्थं चोत्कुटुकासनमावश्यकमेव सञ्जातम्, ततश्च "उत्कुटुकासनमेव न कर्त्तव्यं" इति भवद्वचनं न ग्रहीतुं युक्तमिति पूर्वोक्तः दोषो दुर्निवार इति ।

**ननु** गमने तु उर्ध्वस्थितः सन्नेव भूमिं प्रतिलेखयति, तद्वदत्रापि तथाकरणे को दोषः ? इति **चेत्** न, गमने प्रतिपदमुत्कुटुकासनकरणेन भूमिप्रतिलेखनस्याशक्य-प्रायत्वादेव तत्रोर्ध्वस्थितेन भूमिप्रतिलेखनमनुज्ञातम् । निषीदने तु तच्छक्यमिति तत्तत्रैवानुज्ञातमिति किं न विभाव्यते ?

**ननु** अप्रमत्तो मुनिः प्रतिपदं भूमिं प्रतिलेख्य गच्छन्नपि कदाचिच्छीघ्रमागतं विकलेन्द्रियं विराधयेत् इति शास्त्रे उक्तम् । अत्र च प्रतिलेखनस्य पादनिषीदनस्य च मध्ये क्रियान्तराभावेऽपि विराधना भवति, ततश्च क्रियान्तरसत्त्वे इव क्रियान्तराभावेऽपि विराधनासम्भवात् क्रियान्तराकरणस्याग्रहो निरर्थक इति भूमिप्रमार्जन-भूमिनिषीदनयोर्मध्ये *उत्कुटुकासनादिरुपस्य क्रियान्तरस्य करणेऽपि न दोषः,* सत्यामपि च तत्र

कथञ्चिज्जीवविराधनायां अप्रमत्तमुनिवदयमपि निर्दोष एवेति **चेत्**

न, अप्रमत्तमुनेः सकाशाद् भूमिप्रतिलेखनानन्तरकालीनपदनिषीदनक्रियया या विराधना विकलेन्द्रियादीनां शीघ्रमागमनादिना भवति, तत्र तद्विराधनानिवारकस्य यत्नस्याभावात्तस्य न दोषः, शक्ययतनायाः कृतत्वात् । अत्र तु भूमिप्रमार्जन-भूमिनिषीदनयोर्मध्ये क्रियान्तरकरणेऽधिककालविलम्बः, ततश्च जीवविराधना-सम्भवोऽपि, स च क्रियान्तराकरणेन निवारयितुं शक्यः, इति तत्र यदि क्रियान्तरत्यागो न क्रियते, तर्हि शक्ययतनाया अकृतत्वाद्ध्रुवः प्रमाददोषः, ततश्चावश्यं तत्र कर्मबन्धादिदोषः । यदि तु भूमिप्रमार्जनभूमिनिषीदनयोर्मध्ये क्रियान्तराकरणेऽपि शीघ्रं त्रसागमनादिना विराधना भवेत्, तदा तु तत्राऽपि शक्ययतनायाः कृतत्वात् अप्रमत्तभावस्याक्षततत्वादेव जीवविराधनायामपि न कश्चिद् दोष इति दृढं विभावनीयम् ।

इत्थं च शक्ययतना चारित्रप्राणम्, तत्सत्त्वे सत्यामपि विराधनायां चारित्रपरिणामस्य अक्षततत्वात्, तदसत्त्वे पुनः असत्यामपि जीवविराधनायां चारित्रपरिणाम-क्षतेरवश्यम्भावित्वादिति । तदाहुः **द्वयमिह शुभानुबन्धः शक्यारम्भः शुद्धपक्षश्चेति** अध्यात्मसारेऽनुभवाधिकारे महोपाध्याया इत्यलमधिकेन ।

**( ८९ ) दिवा पुनस्त्वग्वर्तनं न कल्पते, नोक्तं भगवद्भिः, किं सर्वथैव न कल्पते ? इति, न इत्याह अध्वनि परिश्रान्तस्तथा ग्लानो वृद्धश्च, एते त्रयोऽप्यनुज्ञाप्याचार्यांस्ततश्च संस्तारकोत्तरपट्टौ आस्तीर्य स्वपन्ति सावकाशं प्रदेशं मुक्त्वाऽभ्यन्तरे स्वपन्ति, मा भूत् सागारिकस्य शङ्का स्यात् यदुत-नूनं रात्रौ सुरतप्रसङ्गे स्थितोऽयमासीत् कुतोऽन्यथाऽस्य निद्रेति ।**

**( ओ.नि.भा. १५६ )**

**चन्द्र.** सुबोधं सर्वम् । नवरं सुरतं-मैथुनम् । इयं च शङ्का उपलक्षणम् । ततश्च "प्रमादिन एते साधवः" इति "धन्यमेतच्चारित्रम्, यत्र कुटुम्बपरिपोषणाजीविका-

दिभाराभावात् निःशङ्कं दिवाऽपि सुप्यते, वयन्त्वधन्याः, यत्सकलमपि दिवसं बलीवर्द इव भारं वहामः संसारस्य" इत्यादिरुपा वा असद्भावाः सहासोल्लापा वाऽपि सम्भवन्तीत्यवगन्तव्यमिति ।

**( ९० ) उत्कुटुकस्थितस्तिर्यक् प्रसार्य वस्त्रं प्रत्युपेक्षेत, एतदेव च नः कायोर्ध्वं वस्त्रोर्ध्वं च, नान्यत् यथा चन्दनादिना विलिप्ताङगः परस्परमङ्गानि न लगयति एवं सोऽपि प्रत्युपेक्षते । ततश्चैवमुत्कुटुकस्य कायोर्ध्वं भवति, तिर्यक्प्रसारितवस्त्रस्य वस्त्रोर्ध्वं भवति । ( ओ.नि. १५९ )**

**चन्द्र.** स्पष्टम् । नवरं "पूतपार्ष्णिसमायोगे प्राहुरुत्कुटुकासनम्" इति योगशास्त्रचतुर्थप्रकाश-वचनात् भूमिलग्नपार्ष्णिभ्यां पूतयोः समायोगे सति उत्कुटुकासनं निगद्यते, ततश्च 'प्रतिलेखनायां पार्ष्णी भूमौ अस्पृष्टे क्रियेते' इति यत्केषाञ्चिन्मतम्, तन्निर्युक्तिकमवगन्तव्यम् । "पार्ष्णिभ्यां तु भुवस्त्यागे तत्स्याद्गोदोहिकासनं" इति उत्तरार्धवचनात् पार्ष्णिद्वये भूमौ अस्पृष्टे क्रियमाणे तु गोदोहिकासनमेव स्यात्, न तूत्कुटुकासनम्, उत्कुटुकासनेन प्रतिलेखनाकरणे पार्ष्णी भूमिलग्ने एव कर्त्तव्ये इति दृढं निश्चेयमिति ।

**( ९१ ) आह-वेलायां न्यूनाधिकायां प्रत्युपेक्षणायां क्रियमाणायां दोष उक्तस्तत्कस्यां पुनर्वेलायां प्रत्युपेक्षणा कर्त्तव्या तत्र केचनाहुः- अरुणादावश्यकं पूर्वमेव कृत्वा ततः अरुणोद्गमनसमये-प्रभास्फुटनवेलायां प्रत्युपेक्षणा क्रियते १, अपरे त्वाहुः-प्रभायां स्फुटितायां सत्यामावश्यकं**

**प्रथमं कृत्वा ततः प्रत्युपेक्षणा क्रियते २, अन्ये त्वाहुः परस्परं यदा मुखानि विभाव्यन्ते, तदा प्रत्युपेक्षणा क्रियते ३, अन्ये त्वाहुः- यस्यां वेलायां पाणिरेखा दृश्यते, तस्यां वेलायां प्रत्युपेक्षणा क्रियते, ४ । सिद्धान्तवाद्याह - एते सर्वे एव अनादेशाः - असत्पक्षाः, यतः अन्धकारे प्रतिश्रये उद्‌गतेऽपि सूर्ये रेखा न दृश्यन्ते, तस्मादसत्पक्षोऽयम्, शेषं पक्षत्रयं सान्धकारत्वादेव दूषितमेव द्रष्टव्यम्, तत्कस्यां वेलायां प्रत्युपेक्षणा कार्या ? इत्यत आह 'मुख' इति मुखवस्त्रिका 'रय'इति रजोहरणं 'निसिज्जा' रजोहरणस्योपरितनपट्टो 'चोले ति चोलपट्टकः, 'कप्पतिगं'ति एक और्णिको द्वौ सौत्रिकौ, 'दुपट्टत्ति' संस्तारकपट्ट उत्तरपट्टश्च 'थुइ'त्ति प्रतिक्रमणसमाप्तौ ज्ञानदर्शनचारित्रार्थं स्तुतित्रये दत्ते सति एतेषां मुखवस्त्रिकादीनां प्रत्युपेक्षणासमाप्त्यनन्तरं यथा सूर्य उद्‌गच्छति, एष प्रत्युपेक्षणाकालविभाग इति । ( ओ.नि. ६९ )**

**चन्द्र.** प्रातः प्रतिलेखनाकालनिरुपणं प्रायः सर्वं स्पष्टम् । नवरं किञ्चिदुच्यते । अत्र चत्वारोऽसत्पक्षाः उपपादिताः । तत्र प्रथमः प्रभास्फुटनसमये प्रतिलेखनाकरणप्रतिपादकः, द्वितीयः यदा प्रभा स्फुटिता भवति, तदा प्रतिलेखनाकरणप्रतिपादकः, ततश्च प्रथमादयं विशुद्धः, तृतीयः परस्परं मुखावलोकनकाले प्रतिलेखनाकरणप्रतिपादकः, ततश्च स द्वितीयाद् विशुद्धतरः, चतुर्थः हस्तरेखादर्शनकाले प्रतिलेखनाकरणप्रतिपादकः, हस्तरेखादर्शनं च परस्परमुखदर्शनोपयोगि-प्रकाशादधिकप्रकाशे सत्येव सम्भवतीति स तृतीयाद् विशुद्धतमः । वृत्तिकृत्तु चतुर्थमेवासत्पक्षं खण्डयति, ततश्च ततोऽविशुद्धा अन्ये त्रयेऽप्यसत्पक्षा स्वयमेव निरस्ता भवेयुरिति ।

तत्र हस्तरेखादर्शनपक्षखण्डनायेयं युक्तिः प्रदत्ता ग्रन्थकृता यदुत "सान्धकारे प्रतिश्रये उद्गतेऽपि सूर्ये रेखा न दृश्यन्ते" इति । अस्याश्चायं भावार्थः "यदि हि हस्तरेखादर्शनसमये एव प्रतिलेखना कर्त्तव्या स्यात्, तर्हि कदाचिदुपाश्रयस्य सान्धकारत्वादुद्गतेऽपि सूर्ये हस्तरेखा न दृश्यन्ते, ततश्च भवदुक्तरीत्या तत्प्रतिलेखनं सूर्योदये सत्यपि अकर्त्तव्यं स्यादिति

न युक्तोऽयं भवत्पक्ष" इति। अनेनैतद् ज्ञायते यदुत तादृशोपाश्रये यद्यपि हस्तरेखा न दृश्यन्ते, तथाऽपि प्रतिलेखना कर्त्तव्यैवेति ग्रन्थकृतामभीष्टम् । यदि हि तदा सान्धकारत्वात् प्रतिलेखना नेष्टा स्यात्, तर्हि ग्रन्थकृता प्रतिपादिते मतेऽपि स एव दोष आपद्येत, यदुत 'सूर्योदये सत्यपि सान्धकारोपाश्रये रेखाणामपि अदृश्यमानत्वाद् भवताऽपि तदा प्रतिलेखना न करणीया' इति ।

यदि चेदमुत्तरं प्रदीयेत यदुत प्रत्युपेक्षणासमाप्त्यनन्तरमेव सूर्योदयो यथा भवेत्तथा कर्त्तव्यम्, परन्तु सान्धकारे तु सति विलम्बोऽपि अस्माकमभिप्रेत इति । तदा तु चतुर्थासत्पक्षेणापि एतद् वक्तुं शक्यमेव यदुत "हस्तरेखादर्शनसमय एव प्रतिलेखनं कर्त्तव्यम्, परन्तु यदि सान्धकारे प्रतिश्रये सत्यपि सूर्योदये रेखा न दृश्यन्ते, तदा विलम्बोऽप्यस्माकमिष्ट" इति ।

ततश्च ग्रन्थकृतामिदमभिप्रेतं यदुत "प्रतिलेखनासमाप्त्यनन्तरं यथा सूर्योदयः स्यात्, तथा प्रतिलेखना कर्त्तव्या, तत्र प्रतिश्रयः सान्धकारो भवतु, निरन्धकारो वा" इति ।

यद्यपि प्रतिलेखनं प्रकाशे एव सम्भवति, सान्धकारत्वे तु प्रतिलेखनं न नाममात्रादन्यद् किञ्चिदपि । तथाऽपि प्रतिपादितविधौ प्रायः प्रकाश एव भवति, कदाचित्सान्धकारत्वे सत्यपि प्ररूढा सामाचारी तथैव परिपालनीया, अन्यथा हि सान्धकारत्वस्यापि प्रतिव्यक्त्यपेक्षयाऽनेकभेदसम्भवात् गच्छे कलहावकाशः स्यात् । निरन्धकारत्वं वर्ततेऽधुना, ततश्च प्रतिलेखना प्रारब्धव्या इति केनचिदुक्ते अद्यापि सान्धकारत्वमेव, तस्मान्न प्रारब्धव्या इत्यन्येनोक्ते कषायोदयसम्भवादिति ।

**ननु** 'शेषं पक्षत्रयं सान्धकारत्वादेव दूषितमेवावगन्तव्यं' इति वृत्तिवचनाद् ज्ञायते यदुत वृत्तिकृतः 'यत्रान्धकारः तत्र न प्रतिलेखनाकरणं' इत्येवाभिमतम् । ततश्च भवदुक्तं कथं सङ्गतं स्यादिति **चेत्**

न, शेषपक्षत्रयस्य सर्वदा सान्धकारत्वादेव दूषितत्वम्, सिद्धान्तपक्षस्य तु कदाचिदेव सान्धकारत्वात्, तत्र च नियतसमयानुष्ठानानां विलम्बे विशेषप्रयोजनाभावात्, प्रत्युत प्रतिलेखनकालनियामकस्य असम्भवत्त्वापत्तेः स्फुटा एव कलहादिदोषा इति प्रायः प्रकाशापेक्षः प्रतिलेखनासमाप्त्यनन्तरकाले यथा सूर्योदयो भवति, तथा प्रारब्धव्या प्रतिलेखना इति सिद्धान्तपक्ष एव श्रेयान्, सूर्योदयस्य प्रतिलेखनासमाप्ति-नियामकत्वसद्भावादित्यलं विस्तरेणेति ।

**( ९२ ) प्रत्युपेक्षणां कुर्वन्मिथः कथां मैथुनसम्बद्धां करोति जनपदकथां वा, प्रत्याख्यानं वा श्रावकादेर्ददाति, वाचयति कञ्चित्साधुं पाठयतीत्यर्थः, स्वयं वा प्रतीच्छति, आत्मना वाऽऽलापकं दीयमानं प्रतीच्छति-गृह्णाति, एतच्च वक्ष्यमाणं कुर्वन्षण्णामपि जीवनिकायानां विराधको भवति ।**

**( ओ.नि. २७३ )**

**चन्द्र.** अत्र च प्रत्युपेक्षणाकरणवेलायां श्रावकादीनां प्रत्याख्यानप्रदानमपि निषिद्धमिति ध्येयम्

**ननु** 'प्रत्युपेक्षणाकरणवेला' इति अस्य कोऽर्थः, असत्कल्पनया दश वस्त्राणि प्रतिलेखनीयानि सन्ति, तत्र किं प्रथमादारभ्य दशमवस्त्रप्रतिलेखनं यावत्सर्वोऽपि कालः प्रतिलेखनाकरणवेला उच्यते ? किं वा प्रथमवस्त्रप्रतिलेखनप्रारम्भात्प्रथम-वस्त्रप्रतिलेखनसमाप्तिं यावत् यः कालः स प्रतिलेखनाकालः, एवं द्वितीयतृतीयादिष्वपि वक्तव्यम्, ततश्च प्रथमवस्त्रप्रतिलेखनसमाप्तेः द्वितीयवस्त्रप्रतिलेखनप्रारम्भस्य च मध्ये यः कालः, स न प्रतिलेखनाकालः ततश्च तत्र प्रत्याख्यानदानादीनि कर्तुं शक्यन्ते । किं वा एकस्यापि वस्त्रस्य प्रतिलेखनमर्धसमाप्तमपि स्थगयित्वा प्रत्याख्यानदाने न दोषः, प्रतिलेखनक्रियायां वर्तमानायामेव प्रत्याख्यानदाने दोषः, न तु अन्तराले एव तां स्थगयित्वा तथाकरणे दोष इति त्रयोऽत्र विकल्पाः, कतमः श्रेयान् इति **चेत्**

तृतीयविकल्पस्तु अनवस्थादिदोषापादकत्वादुपेक्षणीय एव । उत्सर्गतस्तु प्रथमो विकल्प आदरणीयः, कारणे सति द्वितीयविकल्पोऽपि कथञ्चिददुष्ट एवेति ।

अत्र षड्जीवनिकायविराधना सम्भावनामाश्रित्य दृष्टव्या, न तु सा सर्वथा सर्वत्र प्रतिलेखनप्रमत्तस्य भवत्येवेति नियमः । कर्मबन्धस्तु षड्जीवनिकायविराधनायां सत्यामसत्यां वा यथाऽध्यवसायं भवतीति ।

## ( ९३ ) अजीवेषु पनकसंसक्तपुस्तकादिषु गृहीतेषु असंयमो भवति, येन तन्न ग्राह्यम् । ( ओ.नि. भा.१६९ )

**चन्द्र.** पनकादिजीवविराधनासम्भवादत्रासंयम इति ।

**ननु** पनकासंसक्तमपि पुस्तकं न ग्राह्यमेव, तत्रापि अनेकशो जीवविराधनासम्भवस्य बृहत्कल्पग्रन्थे उक्तत्वात् । ततश्च शुद्धपुस्तकग्रहणेऽपि असंयम एवेति 'पनकसंसक्त' विशेषणमन्याय्यम्, अर्थापत्त्या पनकासंसक्तपुस्तकग्रहणस्य संयमत्वापत्तेरिति **चेत्**

न, अपवादोत्सर्गपरमेतद् वचनमिति न कश्चिद् दोषः । अयं भावः, पुस्तकमात्र-ग्रहणेऽसंयमदोष इत्युत्सर्गः, कालादिवशान्मत्यादिहानौ जीवासंसक्तपुस्तकग्रहण-मपवादतोऽनुमतम् । परन्तु यदि तद् पनकादिसंसक्तम्, तर्हि न ग्राह्यमित्येवमपवादे उत्सर्गपरमेतद् वचनमिति ।

## ( ९४ ) परित्यजतोऽपि पानकादि अतिरिक्तं संयम उक्तः । ( ओ.नि.भा.१७० )

**चन्द्र.** अत्र 'अपि' पदं साभिप्रायकं, 'पर्याप्तभोजनपानानन्तरमवशिष्टं यत्पानकादि, तद्व्युत्सर्जने कीटिकादिजीवविराधनासम्भवात् अन्नदेवावमानसम्भवात् पिपासितबुभुक्षितप्रभूत-जनोपहासाच्च महानसंयम' इति हि केषाञ्चित् मनसि परिस्फुरति । ततश्चात्र तन्निरासायोच्यते यदुत पानकादिव्युत्सृजनेऽपि संयम एव, न तत्रासंयमकल्पनाऽपि श्रेयसीति ।

**ननु** कथं तत्र संयमत्वमिति **चेत्** प्रभूतासंयमनिवारकत्वादिति जानीहि ।

तथाहि - 'अतिरिक्तमपि पानकादि न परित्याज्यमेव' इति मत्या मुग्धः पर्याप्तभोजनानन्तरमपि बलात्कारेण तत् पिबेत् भुञ्ज्याच्च । ततश्च भवति कदाचिदजीर्णं, कदाचिन्मरणं, कदाचिद् विसूचिका, कदाचिन्निद्रादिपारवश्यात् स्वाध्यायादिहानिः, कदाचित्

अधिकभोजनेन विकारप्रादुर्भावः तज्जन्यश्च चतुर्थव्रतविनाशः, अनेकशः उच्चारसम्भवे तु षट्कायविराधनाऽतिमहती, तत्र च संमूर्च्छिममनुष्योत्पादादि-दोषाश्चाधिका एव । अजीर्णे च सति कृमयः प्रादुर्भवन्ति, उच्चारे च तन्निर्गमनादिना महती त्रसविराधनेति अतिरिक्तपानकादिपरिभोगे अतिरिक्तपानकादिव्युत्सृजन-सकाशादतिप्रभूतदोषसम्भवं दृष्ट्वैव तद्दोषनिवारकस्यातिरिक्तपानव्युत्सृजनस्य संयमत्वमत्रोक्तं, येन मुग्धाः तत्रासंयमत्वाशङ्कां निराकृत्य प्रवर्तेरन्निति ।

न चेत्थं सति अल्पस्यापि पानकादेरतिरेके व्युत्सृजनमेव न्याय्यमिति वैपरीत्येन शङ्क्यम् । अतिरिक्तपरिभोगजन्यदोषाणामनुत्पत्तिर्यथा स्यात्, तथा तत्परिभोगस्तु प्राथमिक एव, तदसम्भवे एव अयं संयमः कर्त्तव्य इति यथायोगं विभजनीयमिति ।

## ( ९५ ) साधुं विषीदन्तं दृष्ट्वा संयमव्यापारेषु चोदयतः संयतव्यापारोपेक्षा, उपेक्षाशब्दश्चात्र 'ईक्ष दर्शने' उप-सामीप्येनेक्षा उपेक्षा, तथा गृहस्थव्यापारोपेक्षा, गृहस्थमधिकरणव्यापारेषु प्रवृत्तं दृष्ट्वाऽचोदयतो गृहस्थव्यापारोपेक्षा उच्यते । उपेक्षाशब्दश्चात्रा-वधीरणायां वर्तत इति । ( ओ.नि.भा. १७१ )

**चन्द्र.** स्पष्टम्, नवरं संयतव्यापारोपेक्षा साम्भोगिकसंयतमाश्रित्य कर्त्तव्या, न त्वसाम्भोगिकमाश्रित्य इति अन्यत्रोक्तम् । कारणविशेषात्तु असाम्भोगिकेऽपि सा क्रियते, न कश्चिद् दोषः ।

तथोपेक्षाशब्दस्य रुढ्यर्थस्तु अवधीरणैव, परन्तु संयमव्यापारोपेक्षायां स अर्थो न घटते इति तत्र व्युत्पत्त्यर्थ आदृतो ग्रन्थकृतेति बोध्यम् ।

असाम्भोगिके उपेक्षासंयमस्याकरणं तु सामाचारीभेदवशतः तस्य तथा प्रवृत्तत्वात् कलहादिसम्भवात् अन्यस्माद् वा तथाविधकारणादिति सूक्ष्मधिया विभावनीयम् ।

वस्तुतस्तु असाम्भोगिकैः सह सामान्येन संवासाद्यभावादेव तान् प्रति उपेक्षासंयमो-

ऽसम्भवीति साम्भोगिक एवोपेक्षासंयमसम्भवात्स तत्र गृहीतः, अत एवात्र साम्भोगिका-साम्भोगिकविभागो न प्रदर्शितः, इति नात्र न्यूनता विभावनीयेति ।

**( ९६ ) समाप्तायां प्रत्युपेक्षणायां स्वाध्यायः कर्त्तव्यः, सूत्रपौरुषीत्यर्थः । पादोनप्रहरं यावत् । इदानीं पात्रप्रत्युपेक्षणामाह चरमायां = पादोनपौरुष्यां प्रत्युपेक्षेत, तदा = तस्मिन्काले स्वाध्यायानन्तरं पात्रकद्वितयं प्रत्युपेक्षते । ( ओ.नि.भा. १७३ )**

**चन्द्र.** तथा च पात्रकप्रत्युपेक्षणा न सम्पूर्णायां प्रथमपौरुष्यां सत्याम्, किन्तु पादोनायां तस्यामिति स्पष्टमेव ।

**( ९७ ) निश्चयपौरुषीप्रमाणकालप्रतिपादनायाह दक्खिणानयने उत्तरायणदिनानि उत्तरायणे दक्खिणायनदिनानि मीलयित्वा गण्यन्ते, स च राशिरष्टभिर्गुण्यते, एकषष्ट्या भागो ह्रीयते लब्धेऽङ्गुलानि, द्वादशाङ्गुलैः पादः यावत्पुनरपि मकरदिने पादाः । ( ओ.नि. २८३ )**

**चन्द्र.** अतिगहनमिदं तत्त्वमिति कृत्वा विस्तरतोऽत्र निरूप्यते ।

भरतक्षेत्रे दिनकरः मेरुं प्रदक्षिणयति, सा च प्रदक्षिणा नैकस्मादेव मार्गात्, परन्तु क्रमशो दूरवर्तिनः क्रमशः समीपवर्तिनश्च मार्गात् । तत्र यदा दिनकरः मेरुं प्रदक्षिणयन् क्रमशः सर्वसमीपमार्गात् दूरतरं मार्गं गच्छति, तदा तद् दक्षिणायनमुच्यते । यदा तु स एव सर्वदूरवर्तिमार्गात् क्रमशः समीपवर्तिमार्गं आगच्छति, तदा तत् उत्तरायणमुच्यते ।

दक्षिणायने एतादृशा मार्गाः त्र्यशीतिशतम्, उत्तरायणे चापि तथैव । त एव मार्गा मण्डलानि इति उच्यन्ते । एकमण्डलपरिभ्रमणे एको दिवसो भवतीत्येवं सर्वेषां दक्षिणायनमण्डलानां परिभ्रमणे त्र्यशीतिशतदिवसा भवन्ति, एवमेवोत्तरायणे च । तथा चोभयदिनमीलने जातं षट्षष्ठित्रिशतं एकस्य सूर्यवर्षस्य दिनप्रमाणमिति ।

तत्र सर्वाभ्यन्तरमण्डलाद् यदा दिनकरः द्वितीयमण्डलम् सङ्क्रामति, तदा स दिनो दक्षिणायनप्रथमदिवसो गण्यते । यदा तु सर्वबाह्यमण्डलाद् अभ्यन्तरवर्तिमण्डलं सङ्क्रामति, तदा स उत्तरायणप्रथमदिवसो गण्यते । अत्र दक्षिणायनप्रथमदिवसः 'कर्कसंक्रान्तिः'इति उत्तरायणप्रथमदिवसो 'मकरसङ्क्रान्तिः' इति भण्यते ।

उत्तरायणप्रथमदिने मकरसंक्रान्तिनामके चत्वारि पदानि अष्टचत्वारिंशदङ्गुलप्रमाणानि पौरुषीमानम्, दक्षिणायनप्रथमदिने कर्कसंक्रान्तिनामके द्वे पदे चतुर्विंशत्यङ्गुलप्रमाणे पौरुषीमानमिति एतत्तावन्निश्चितमेव ।

प्रकृतपाठे यत्करणं प्रतिपादितम्, तत् मकरसंक्रान्तिकर्कसंक्रान्तिव्यतिरिक्तानां ३६४ दिनानां मध्ये प्रत्येकस्मिन् पौरुषीमानानयनाय प्रतिपादितमिति बोध्यम् ।

तथेदमपि निश्चेयं यदुत उत्तरायणप्रथमदिनादारभ्यान्तिमदिनं यावत् अङ्गुलमानं क्रमशः परिहीयते । ततश्च उत्तरायणप्रथमदिने यदङ्गुलमानम्, तस्मात् प्रकृतकरणागतोत्तररुपं मानं निष्काशनीयम् । एवं अन्तिमदिनं यावत्कर्त्तव्यम् । दक्षिणायनप्रथमदिनादारभ्यान्तिमदिनं यावत्तु अङ्गुलमानं क्रमशः परिवर्धते । ततश्च दक्षिणायनप्रथमदिने यदङ्गुलिमानम्, तस्मिन् प्रकृतकरणागतोत्तररुपं मानं मीलनीयम्, एवं अन्तिमदिनं यावत्कर्त्तव्यम् ।

विनेयजनहितायात्रोत्तरायणदिनानां सर्वेषां प्रकृतकरणसमागतं पौरुषीमानं प्रतिपाद्यते ।

| दिन | पद | अङ्गुल | अङ्गुलांशः | दिन | पद | अङ्गुल | अङ्गुलांशः |
|---|---|---|---|---|---|---|---|
| १ | ४ | — | — | २ | ३ | ११ | ५३/६१ |
| ३ | ३ | ११ | ४५/६१ | ४ | ३ | ११ | ३७/६१ |
| ५ | ३ | ११ | २९/६१ | ६ | ३ | ११ | २१/६१ |
| ७ | ३ | ११ | १३/६१ | ८ | ३ | ११ | ५/६१ |
| ९ | ३ | १० | ५८/६१ | १० | ३ | १० | ५०/६१ |
| ११ | ३ | १० | ४२/६१ | १२ | ३ | १० | ३४/६१ |
| १३ | ३ | १० | २६/६१ | १४ | ३ | १० | १८/६१ |

| दिन | पद | अङ्गुल | अङ्गुलांश: | दिन | पद | अङ्गुल | अङ्गुलांश: |
|---|---|---|---|---|---|---|---|
| १५ | ३ | १० | १०/६१ | १६ | ३ | १० | २/६१ |
| १७ | ३ | ९ | ५५/६१ | १८ | ३ | ९ | ४७/६१ |
| १९ | ३ | ९ | ३९/६१ | २० | ३ | ९ | ३१/६१ |
| २१ | ३ | ९ | २३/६१ | २२ | ३ | ९ | १५/६१ |
| २३ | ३ | ९ | ७/६१ | २४ | ३ | ८ | ६०/६१ |
| २५ | ३ | ८ | ५२/६१ | २६ | ३ | ८ | ४४/६१ |
| २७ | ३ | ८ | ३६/६१ | २८ | ३ | ८ | २८/६१ |
| २९ | ३ | ८ | २०/६१ | ३० | ३ | ८ | १२/६१ |
| ३१ | ३ | ८ | ४/६१ | ३२ | ३ | ७ | ५७/६१ |
| ३३ | ३ | ७ | ४९/६१ | ३४ | ३ | ७ | ४१/६१ |
| ३५ | ३ | ७ | ३३/६१ | ३६ | ३ | ७ | २५/६१ |
| ३७ | ३ | ७ | १७/६१ | ३८ | ३ | ७ | ९/६१ |
| ३९ | ३ | ७ | १/६१ | ४० | ३ | ६ | ५४/६१ |
| ४१ | ३ | ६ | ४६/६१ | ४२ | ३ | ६ | ३८/६१ |
| ४३ | ३ | ६ | ३०/६१ | ४४ | ३ | ६ | २२/६१ |
| ४५ | ३ | ६ | १४/६१ | ४६ | ३ | ६ | ६/६१ |
| ४७ | ३ | ५ | ५९/६१ | ४८ | ३ | ५ | ५१/६१ |
| ४९ | ३ | ५ | ४३/६१ | ५० | ३ | ५ | ४५/६१ |
| ५१ | ३ | ५ | २७/६१ | ५२ | ३ | ५ | १९/६१ |
| ५३ | ३ | ५ | ११/६१ | ५४ | ३ | ५ | ३/६१ |
| ५५ | ३ | ४ | ५६/६१ | ५६ | ३ | ४ | ४८/६१ |
| ५७ | ३ | ४ | ४०/६१ | ५८ | ३ | ४ | ३२/६१ |
| ५९ | ३ | ४ | २४/६१ | ६० | ३ | ४ | १६/६१ |
| ६१ | ३ | ४ | ८/६१ | ६२ | ३ | ४ | — |
| ६३ | ३ | ३ | ५३/६१ | ६४ | ३ | ३ | ४५/६१ |
| ६५ | ३ | ३ | ३७/६१ | ६६ | ३ | ३ | २९/६१ |

| दिन | पद | अङ्गुल | अङ्गुलांशः | दिन | पद | अङ्गुल | अङ्गुलांशः |
|---|---|---|---|---|---|---|---|
| ६७ | ३ | ३ | २१/६१ | ६८ | ३ | ३ | १२/६१ |
| ६९ | ३ | ३ | ५/६१ | ७० | ३ | २ | ५८/६१ |
| ७१ | ३ | २ | ५०/६१ | ७२ | ३ | २ | ४२/६१ |
| ७३ | ३ | २ | ३४/६१ | ७४ | ३ | २ | २६/६१ |
| ७५ | ३ | २ | १८/६१ | ७६ | ३ | २ | १०/६१ |
| ७७ | ३ | २ | २/६१ | ७८ | ३ | १ | ५५/६१ |
| ७९ | ३ | १ | ४७/६१ | ८० | ३ | १ | ३९/६१ |
| ८१ | ३ | १ | ३१/६१ | ८२ | ३ | १ | २३/६१ |
| ८३ | ३ | १ | १५/६१ | ८४ | ३ | १ | ७/६१ |
| ८५ | ३ | — | ६०/६१ | ८६ | ३ | — | ५२/६१ |
| ८७ | ३ | — | ४४/६१ | ८८ | ३ | — | ३६/६१ |
| ८९ | ३ | — | २८/६१ | ९० | ३ | — | २०/६१ |
| ९१ | ३ | — | १२/६१ | ९२ | ३ | — | ४/६१ |
| ९३ | २ | ११ | ५७/६१ | ९४ | २ | ११ | ४९/६१ |
| ९५ | २ | ११ | ४१/६१ | ९६ | २ | ११ | ३३/६१ |
| ९७ | २ | ११ | २५/६१ | ९८ | २ | ११ | १७/६१ |
| ९९ | २ | ११ | ९/६१ | १०० | २ | ११ | १/६१ |
| १०१ | २ | १० | ५४/६१ | १०२ | २ | १० | ४६/६१ |
| १०३ | २ | १० | ३८/६१ | १०४ | २ | १० | ३०/६१ |
| १०५ | २ | १० | २२/६१ | १०६ | २ | १० | १४/६१ |
| १०७ | २ | १० | ६/६१ | १०८ | २ | ९ | ५९/६१ |
| १०९ | २ | ९ | ५१/६१ | ११० | २ | ९ | ४३/६१ |
| १११ | २ | ९ | ३५/६१ | ११२ | २ | ९ | २७/६१ |
| ११३ | २ | ९ | १९/६१ | ११४ | २ | ९ | ११/६१ |
| ११५ | २ | ९ | ३/६१ | ११६ | २ | ८ | ५६/६१ |
| ११७ | २ | ८ | ४८/६१ | ११८ | २ | ८ | ४०/६१ |

| दिन | पद | अङ्गुल | अङ्गुलांश: | दिन | पद | अङ्गुल | अङ्गुलांश: |
|---|---|---|---|---|---|---|---|
| ११९ | २ | ८ | ३२/६१ | १२० | २ | ८ | २४/६१ |
| १२१ | २ | ८ | १६/६१ | १२२ | २ | ८ | ८/६१ |
| १२३ | २ | ८ | — | १२४ | २ | ७ | ५३/६१ |
| १२५ | २ | ७ | ४५/६१ | १२६ | २ | ७ | ३७/६१ |
| १२७ | २ | ७ | २९/६१ | १२८ | २ | ७ | २१/६१ |
| १२९ | २ | ७ | १३/६१ | १३० | २ | ७ | ५/६१ |
| १३१ | २ | ६ | ५८/६१ | १३२ | २ | ६ | ५०/६१ |
| १३३ | २ | ६ | ४२/६१ | १३४ | २ | ६ | ३४/६१ |
| १३५ | २ | ६ | २६/६१ | १३६ | २ | ६ | १८/६१ |
| १३७ | २ | ६ | १९/६१ | १३८ | २ | ६ | २/६१ |
| १३९ | २ | ५ | ५५/६१ | १४० | २ | ५ | ४७/६१ |
| १४१ | २ | ५ | ३९/६१ | १४२ | २ | ५ | ३१/६१ |
| १४३ | २ | ५ | २३/६१ | १४४ | २ | ५ | १५/६१ |
| १४५ | २ | ५ | ७/६१ | १४६ | २ | ५ | ६०/६१ |
| १४७ | २ | ४ | ५२/६१ | १४८ | २ | ४ | ४४/६१ |
| १४९ | २ | ४ | ३६/६१ | १५० | २ | ४ | २८/६१ |
| १५१ | २ | ४ | २०/६१ | १५२ | २ | ४ | १२/६१ |
| १५३ | २ | ४ | ४/६१ | १५४ | २ | ३ | ५७/६१ |
| १५५ | २ | ३ | ४९/६१ | १५६ | २ | ३ | ४१/६१ |
| १५७ | २ | ३ | ३३/६१ | १५८ | २ | ३ | २५/६१ |
| १५९ | २ | ३ | १७/६१ | १६० | २ | ३ | ९/६१ |
| १६१ | २ | ३ | १/६१ | १६२ | २ | २ | ५४/६१ |
| १६३ | २ | २ | ४६/६१ | १६४ | २ | २ | ३८/६१ |
| १६५ | २ | २ | ३०/६१ | १६७ | २ | २ | २२/६१ |
| १६८ | २ | २ | १४/६१ | १६९ | २ | २ | ६/६१ |
| १७० | २ | १ | ५९/६१ | १७१ | २ | १ | ५१/६१ |

| दिन | पद | अङ्गुल | अङ्गुलांशः | दिन | पद | अङ्गुल | अङ्गुलांशः |
|---|---|---|---|---|---|---|---|
| १७२ | २ | १ | ४३/६१ | १७३ | २ | १ | ३५/६१ |
| १७४ | २ | १ | २७/६१ | १७५ | २ | १ | १९/६१ |
| १७६ | २ | १ | ११/६१ | १७७ | २ | १ | ३/६१ |
| १७८ | २ | — | ५६/६१ | १७९ | २ | — | ४८/६१ |
| १८० | २ | — | ४०/६१ | १८१ | २ | — | ३२/६१ |
| १८२ | २ | — | २४/६१ | १८३ | २ | — | १६/६१ |
| १८४ | २ | — | ८/६१ | | | | |

अत्र यद्यपि १८४ दिवसाः सञ्जाताः, परन्तु प्रथमो दिवसोऽत्र न गण्यते, सम्पूर्णचतुष्पदप्रमाणपौरुषीमत्त्वात् । ततश्च द्वितीयदिनादारभ्य गणनायां १८३ दिवसाः सञ्जाताः । एवमेव दक्षिणायनप्रथमदिवसादारभ्य १८४ दिवसाः कर्त्तव्याः, तत्र प्रथमदिवसस्य संपूर्णद्विपदमानपौरुषीमत्त्वात् तदगणनेऽतिरिक्ताः १८३ दिवसाः गणनीयाः । तत्र च प्रतिदिनं ८/६१ वृद्धिः कर्त्तव्याः, यावत् १८४ तमदिवसे त्रीणि पदानि एकादशाङ्गुलानि द्वादशाङ्गुलस्य च ५३/६१ अंशाः पौरुषीमानं भवेत् ।

अत्र च प्रतिदिनमङ्गुलस्य ८/६१ भागो वर्धते, हीयते वेति कृत्वैव करणे अष्टसंख्यया गुणनं एकषष्ठिसंख्यया भागहारश्च प्रतिपादित इति बोध्यम् ।

इदं तावन्निश्चयतो मानम् । एतच्च प्रतिदिनं ज्ञातुं व्यवहर्तुं च दुःशकमिति व्यवहारतः पौरुषीमानं शास्त्रे प्रतिपादितम् ।

तच्चैवं — आषाढे मासे पौर्णमास्यां द्विपदा पौरुषी भवति, पदं च द्वादशाङ्गुलप्रमाणम् । तत्र प्रतिसप्तदिनं एकमङ्गुलं वर्धापनीयम्, प्रतिपक्षं च द्वेऽङ्गुले वर्धापनीये । ततश्चेवंक्रमेण अश्वयुजपौर्णमास्यां त्रिपदा पौरुषी भवति, पौषे मासे पौर्णमास्यां चतुष्पदा पौरुषी भवति । चैत्रपौर्णमास्यां पुनस्त्रिपदा पौरुषी भवति, पोषमासपौर्णमास्याः सकाशात्प्रतिसप्तदिनमेकाङ्गुलस्य प्रतिपक्षं च अङ्गुलद्वयस्य हीयमानत्वादिति । एवं यावत् आषाढे मासे पौर्णमास्यां पुनर्द्विपदा पौरुषी भवतीति ।

अत्रापि विनेयजनानुग्रहाय स्पष्टं किञ्चिदुच्यते ।

| | |
|---|---|
| आषाढपौर्णमास्यां द्विपदा पौरुषी | पौषपौर्णमास्यां चतुष्पदा पौरुषी |
| श्रावणामावस्यायां द्विपदा द्व्यङ्गुलाधिका पौरुषी | माघामावस्यायां त्रिपदा दशाङ्गुलाधिका पौरुषी |
| श्रावणपौर्णमास्यां द्विपदा चतुरङ्गुलाधिका पौरुषी | माघपौर्णमास्यां त्रिपदा अष्टाङ्गुलाधिका पौरुषी |
| भाद्रपदामावस्यायां द्विपदा षडङ्गुलाधिका पौरुषी | फाल्गुनामावस्यायां त्रिपदा षडङ्गुलाधिका पौरुषी |
| भाद्रपदपौर्णमास्यां द्विपदा अष्टाङ्गुलाधिका पौरुषी | फाल्गुनपौर्णमास्यां त्रिपदा चतुरङ्गुलाधिका पौरुषी |
| अश्वयुजामावस्यायां द्विपदा दशाङ्गुलाधिका पौरुषी | चैत्रामावस्यायां त्रिपदा द्व्यङ्गुलाधिका पौरुषी |
| अश्वयुजपौर्णमास्यायां त्रिपदा पौरुषी | चैत्रपौर्णमास्यां त्रिपदा पौरुषी |
| कार्तिकामावस्यायां त्रिपदा द्व्यङ्गुलाधिका पौरुषी | वैशाखामावस्यायां द्विपदा दशाङ्गुलाधिका पौरुषी |
| कार्तिकपौर्णमास्यां त्रिपदा चतुरङ्गुलाधिका पौरुषी | वैशाखपौर्णमास्यां द्विपदा अष्टाङ्गुलाधिका पौरुषी |
| मार्गशीर्षामावस्यायां त्रिपदा षडङ्गुलाधिका पौरुषी | ज्येष्ठामावस्यायां द्विपदा षडङ्गुलाधिका पौरुषी |
| मार्गशीर्षपौर्णमास्यां त्रिपदा अष्टाङ्गुलाधिका पौरुषी | ज्येष्ठपौर्णमास्यां द्विपदा चतुरङ्गुलाधिका पौरुषी |
| पौषामावस्यायां त्रिपदा दशाङ्गुलाधिका पौरुषी | आषाढामावस्यायां द्विपदा द्व्यङ्गुलाधिका पौरुषी |
| पौषपौर्णमास्यां चतुष्पदा पौरुषी | आषाढपौर्णमास्यां द्विपदा पौरुषी । |
| इत्यलं विस्तरेणेति । | |

## ( १८ ) प्रत्युपेक्षणाकाले अतिक्रान्ते एकं कल्याणकं यतः प्रायश्चित्तं भवति । ( ओ.नि.भा. १७४ )

**चन्द्र.** अत्र प्रमादे सति प्रायश्चित्तं भवतीति बोध्यम् । यदि तु तत्काले मार्गे एव विहरन्तः साधवः पात्रकप्रत्युपेक्षणार्थमुपविशेयुः, तर्हि तादृशक्रियां दृष्ट्वा कदाचिदन्यधार्मिका शङ्केयुः "नूनमेते मन्त्रतन्त्रादिकं कुर्वन्ति" इति । ततश्चैवं कथञ्चित्कस्मिंश्चिदनिष्टे सञ्जाते सति साधव एव अपराधिनः शङ्क्येरन्, ततश्चैवंविधकारणकलापात् यदि मार्गे पात्रकप्रत्युपेक्षणं न क्रियते, तदा न कश्चिद् दोष इति ।

"एकं कल्याणकं" इतिपदं पारिभाषिकं उपवासाचामाम्लनिर्विकृति-कैकाशनपुरिमार्धात्मकप्रत्याख्यानपञ्चकसमूहे रुढमिति ।

( ९९ ) अत्राह परः उत्कुटुकः सन् गोच्छकादीनि प्रत्युपेक्षयेत्, यतो वस्त्रप्रत्युपेक्षणा उत्कुटुकेनैव कर्त्तव्या, आचार्य आह-तदेतन्न भवति, यच्चोदकेनोक्तम्, यतः पलिमन्थः सूत्रार्थयोर्भवति, कथं ? प्रथममसौ पादप्रोञ्छने निषीदति, पश्चात् पात्रकवस्त्रप्रत्युपेक्षणाय उत्कुटुको भवति, पुनः पात्रकप्रत्युपेक्षणायां पादप्रोञ्छने निषीदति, एवं तस्य साधोश्चिरयतः सूत्रार्थयोः पलिमन्थो भवति, ततः पादप्रोञ्छने निषण्णेनैव पात्रकवस्त्रप्रत्युपेक्षणा कर्त्तव्येति । ( ओ.नि. २८९ )

चन्द्र. सकृद् द्विर्वा उत्थानोपवेशनादौ कतिचिच्क्षणानामेव विलम्बो भवति, तथाऽपि तावत्कालस्य स्वाध्यायस्य हानिर्मा भूदित्येतदर्थं 'वस्त्रप्रतिलेखनमुत्कुटुकेन कर्त्तव्यम्' इति प्रसिद्धाऽपि सामाचारी पात्रप्रतिलेखनकाले सङ्कोचितेति ज्ञायतेऽनेन सूत्रार्थस्वाध्यायमाहात्म्यमिति ।

( १०० ) इदानीं सर्वेषामेवैतेषां यतनां प्रतिपादयन्नाह मूषकोत्केरः स्वस्थाने मुच्यते यतनया मूषकोत्केरमध्ये एव स्थाप्यते प्रमृज्य अथ हरतनुः = अधस्तात्सलिलबिन्दव उन्मज्ज्य लग्नास्ततस्तावत्प्रति-पालयति, यावदेते शोषमुपगच्छन्ति, ततः पश्चात्पात्रम् प्रत्युपेक्षते । कोत्थलकारिआघणसंताणियादीणं प्रहरत्रयं यावत्तत्पात्रकं संचिक्खावेत्तु = प्रतिपाल्य, यदि तावत्याऽपि वेलया नापैति ततः पात्रकस्थापनादेस्तावन्मात्रं छित्त्वा परित्यज्यते । अन्येषां वा पात्रक-स्थापनादीनां सद्भावे सर्वमेव तत्पात्रकस्थापनकं परित्यजति । अथ

**तत्कोत्थलकारिगृहकं न सचेतनया मृत्तिकया कृतम्, किन्तु पुराणमृत्तिकया, ततस्तां पुराणां मृत्तिकां तस्मिन्नेव प्रतिलेखनाकालेऽपनयति यदि तत्र कृमिकास्तया न प्रवेशिता इति । ( ओ.नि. २९४ )**

**चन्द्र.** पात्रकप्रत्युपेक्षणाकाले यदि पात्रकं मूषकोत्कीर्णसचित्तरजसाऽवगुण्डितं भवेत्, यदि वा सार्द्रभूमेरुन्मज्ज्य सलिलबिन्दवः पात्रकेऽधस्ताद् लग्ना भवेयुः, यदिवा तत्र कोलिकतन्तवो लग्ना भवेयुः, यदि वा भ्रमरेण तत्र मृदमानीय मृन्मयं गृहं कृतं भवेदित्येवमत्र अवस्थाचतुष्के कया यतनया प्रतिलेखनीयं पात्रमित्येतदत्र निगदितम् ।

तत्र मूषकोत्कीर्णसचित्तरजः पात्रकलग्नं प्रमृज्य शनैः शनैः मूषकोत्केरमध्ये एव स्थापनीयः, उदकबिन्दवस्तु यावत्स्वयमेव शोषमुपगच्छन्ति, तावत्प्रतीक्षणं कर्त्तव्यम्, शोषमुपगतेषु तेषु प्रतिलेखनीयं पात्रम् । कोलिकसन्ताने भ्रमरगृहे च प्रहरत्रयं यावत्प्रतीक्षणं कार्यम्, यदि तावता कालेन ते स्वयमेव निर्गच्छतः, तर्हि शोभनमेव, तदसम्भवे पात्रकस्थापनादीनां कोलिकसन्तानादिव्याप्तं तावन्तं भागं अपनीयऽवशिष्टस्य प्रतिलेखनं करणीयमिति तावत् प्रकृतपाठसमुदायार्थः ।

अधुना चालना –

**ननु** यथा भ्रमरगृहे सति प्रहरत्रयं यावत्प्रतीक्षणं क्रियते, तथैव मूषकोत्कीर्णरजसि सति प्रहरत्रयं प्रतीक्षणं किमर्थं न क्रियते ? उभयत्र सचित्तपृथ्व्या एव यतनायाः करणीयत्वात् इति प्रथम प्रश्नः, यदि च मूषकोत्कीर्णरजः प्रमृज्यापनीयते, तर्हि उदकबिन्दवो भ्रमरगृहं च कथं प्रमृज्य नापनीयन्ते ? स्थावरकायत्वेन समानानां तेषां यतनाया अपि साम्यस्यैव युक्तत्वादिति द्वितीयः प्रश्नः ।

अधुना प्रत्यवस्थानं –

यद्यपि भ्रमरगृहं मूषकोत्कीर्णरजश्चोभे अपि सचित्ते पृथ्वीकायरुपे स्तः, तथाऽपि स्थावरकायानामेष स्वभावः यदुत ते स्वोत्पत्तिस्थाने स्वकायं संलग्नाश्चिरं जीवन्ति, स्वकायात्पृथग्भूतास्तु प्रायो न चिरं जीवन्ति, ततश्च मूषकोत्कीर्णरजः यदि पात्रके प्रहरत्रयं यावत्प्रतिपाल्येत, तर्हि तत् स्वकायभ्रष्टं सत् शीघ्रमेव विराध्येत । शनैः शनैः प्रमृज्य मूषकोत्केरमध्ये तत्स्थापने तु यद्यपि सङ्घट्टनदोषो भवति, तथाऽपि तत् स्वकाये स्थापितं सत् चिरं जीवति, न विराध्येतेति आयव्ययौ पर्यालोच्य तस्य तत्र स्थापनं युक्तमेव ।

एवमेव भ्रमरगृहेऽपि सम्भवेत्, यदि तत्सत्का मृद् कस्मात्स्थानाद् भ्रमरेणानीतेति ज्ञातं भवेत् । परन्तु भ्रमरेण तु 'सा कस्मादानीता, अनेकेभ्यो वा स्थानेभ्य आनीता' इति ज्ञानाभावात् तस्याः स्वस्थानमेवाज्ञातमिति तस्याः कुत्रचित्स्थापनं न युक्तम् । यदि हि भ्रमरगृहमृद् यस्मिन्कस्मिंश्चित् स्थाने स्थाप्येत, तर्हि स्वपरकायशस्त्रेण तस्याः विराधनमधिकं स्यादिति तत्र प्रहरत्रयं प्रतीक्षणं युक्तम् । एतेन उभययोरपि प्रश्नयोः समाधानं प्रतिपादितं भवति । तथापि द्वितीयप्रश्ने किञ्चिदधिकमुच्यते । यद्यपि मृद् उदकबिन्दवश्च उभौ अपि स्थावरकायौ, तथाऽपि पृथ्व्याः संहननं बलिष्ठमिति तत्प्रमार्जनेऽपि सङ्घट्टनादिकमेव भवेत्, न तु सर्वथा सर्वपृथ्वीजीवानां व्यापादनम्, उदकबिन्दूनां तु मृदुसंहननत्वात् प्रमार्जनेन प्रायो व्यापादनमेव भवेत् । तस्मात् उदकबिन्दूनां स्वस्थाने तत्रैव विद्यमानेऽपि सति तत्र तेषां स्थापनमधिकविराधना-प्रयोजकत्वान्निषिध्यते । किञ्च यदि प्रभूतं सचित्तं जलं भवेत्, तर्हि तदस्पृष्ट्वा धारया तस्य स्वस्थाने स्थापनं कर्तुं शक्येत, उदकबिन्दूनां तु धारया स्थापनमशक्यमेव, धाराया एवासम्भवात् । प्रमार्जनेन स्थापनं अपि तेषामशक्यमिति अनुभवसिद्धमेवेति तेषां स्वस्थाने स्थापनमत्र नोक्तमिति सूक्ष्मप्रज्ञया विचारणीयमेतत्तत्त्वम् ।

शेषं सर्वं सुबोधमिति न विव्रियते ।

## ( १०१ ) तत्पात्रकं भुव उपरि कियद्दूरे प्रत्युपेक्षणीयमित्यत आह चतुर्भिरङ्गुलैर्भुव उपरि धारयित्वा प्रत्युपेक्षणीयं, मा भूत्पतनभङ्गभयं स्यादिति । ( ओ.नि. २९५ )

**चन्द्र.** स्पष्टम्, अस्मादेव कारणात् साधोः उर्ध्वस्थानेन भोजनं पात्रकादिलुञ्छनं च प्रतिषेध्यमिति बोध्यम् ।

**( १०२ ) तत्र ये ते संयतास्ते संविग्नाश्चासंविग्नाश्च, ये ते संविग्नास्ते मनोज्ञा इतरे अमनोज्ञाश्च, असंविग्ना अपि द्विविधाः - संविग्नपाक्षिकाः इतरे च - असंविग्नपाक्षिकाः, निर्धर्मा नैव श्लाघन्ते तपस्विनश्च निन्दन्ति । ( ओ.नि. २९९ )**

**चन्द्र.** तथा च संविग्नानामेव मनोज्ञामनोज्ञत्वेन द्वैविध्यम्, न तु असंविग्नानामिति न तेषां असाम्भोगिकत्वं कल्पनीयम् । असाम्भोगिकपदं संविग्नस्यैव सम्भवतीति भावः ।

**ननु** असाम्भोगिका नाम भिन्नसामाचारीमन्तः, एकसामाचारीरहिता इति यावत् । ततश्चासंविग्ना संविग्नसामाचारीरहिता इति तेषामसाम्भोगिकत्वं घटत एवेति **चेत्** न, एवं सति गृहस्थादीनां अपि संविग्नसामाचारीरहितत्वादसाम्भोगिकत्वं स्यादिति यत्किञ्चिदेतत् ।

**ननु** साधुवेषवत्त्वे सति एकसामाचारीरहितत्वमसाम्भोगिकस्य लक्षणमिति न गृहस्थादीनां असाम्भोगिकत्वापत्तिरिति **चेत्**

न, एतादृशलक्षणस्य शास्त्रेऽनुक्तत्वादर्थापत्त्याऽपि चालभ्यमानत्वात् । स्वमत्यैव लक्षणकरणे तु संविग्नत्वे सति एकसामाचारीरहितत्वमसाम्भोगिकत्वमित्यस्माभिरपि सुवचत्वादिति ।

इत्थं च सातिचारसंयमा निरतिचारसंयमाश्चैवं द्वौ भेदौ यथा विरतिमतामेवेति अविरतानां निरतिचारसंयमाभावात्सातिचारसंयमो न वक्तुं शक्येत, तेषां विरत्यभावात्, विरतिमतामेव चान्यतरसंयमसद्भावात् । तथैव साम्भोगिका असाम्भोगिकाश्चैवं द्वौ भेदौ संविग्नानामेवेति असंविग्नानां साम्भोगिकत्वाभावात् असाम्भोगिकत्वं न वक्तुं शक्यते, तेषां संविग्नताऽभावात्, संविग्नानामेव च साम्भोगिकासाम्भोगिकान्यतरत्वसम्भवादिति निश्चेयम् ।

**( १०३ ) संयत्यापातं तु एकान्तेनैव वर्जनीयम् । ( ओ.नि. ३०४ )**

**चन्द्र.** यत्र संयत्यः उच्चारप्रश्रवणव्युत्सृजनार्थमागच्छन्ति, तत्र संयतैरेकान्तेन न गन्तव्यमिति ।

**(१०४) याम्या दक्षिणा दिक्, तस्यां च रात्रौ पृष्ठं न दातव्यम्, किमिति ? रात्रौ निशाचरा:-पिशाचादय: अभिमुखा आगच्छन्ति, एतदुक्तं भवति - रात्रौ दक्षिणाया दिश उत्तरायां दिशि देवा: प्रयान्तीति लोके श्रुति: ततश्च तत्र पृष्ठं न दातव्यम्, प्रयच्छतो लोकविरोधो भवतीति । (ओ.नि. भा. १८४)**

**चन्द्र.** इदं च लोकमतम्, न जैनमतम्, केवलम् लोकविरोधपरिहारायैव रात्रौ दक्षिणदिशि पृष्ठदानं प्रतिषिद्धमिति । इत्थं च रात्रौ दक्षिणदिगभिमुखं मस्तकं कृत्वा न निद्रातव्यमिति सामाचार्यपि लोकविरोधपरिहारायैवेति ज्ञेयम् । अत एवोपाश्रये रत्नाधिकान्प्रति पादौ मा भवतामित्येवमादिकारणै: अपवादत: दक्षिणाभिमुखमपि मस्तकं कृत्वा निद्रायत इति ।

**(१०५) अवष्टम्भ: स्तम्भादौ न कर्त्तव्य:, यत: प्रत्युपेक्षितेऽपि तस्मिन्पश्चादपि अनवरतं त्रसा: प्राणा भवन्ति, ततश्च तत्र प्रत्युपेक्षणा न शुद्ध्यति, तम्हा हट्ठपहट्ठस्स = हृष्टो-नीरोग:, प्रहृष्ट:-समर्थस्तरुणस्तस्य एवंविधस्य साधोरवष्टम्भो न कल्पते नोक्त: । (ओ.नि. ३२३)**

**चन्द्र.** स्पष्टम्, नवरं अपवाद: ग्लानवृद्धादीनां सम्भवतीत्येतदग्रेऽत्रैव ग्रन्थे प्रतिपादितमस्ति ।

**( १०६ ) पृथिवीकायस्त्रिविधः - सचित्तो मिश्रोऽचित्तश्च । तत्र सचित्तो द्विविधः - निश्चयसचित्तो व्यवहारसचित्तश्च । निश्चयसचित्तः पृथिवीनां - रत्नशर्कराप्रभृतीनां सम्बन्धी यः महापर्वतानां हिमवदादीनां च 'बहुमध्ये' मध्यदेशभागे । इदानीं व्यवहारसचित्तप्रतिपादनायाह - अचित्तवर्जः मिश्रवर्जश्च, एतदुक्तं भवति - योऽचित्तो न भवति, न च मिश्रः, स व्यवहारतः सचेतन इति । स चारण्यादौ भवति, यत्र वा गोमयादिर्नास्ति । ( ओ.नि. ३३८-३३९ )**

**चन्द्र.** यः पृथ्वीकायः केवलिदृष्ट्याऽपि सदैव सचित्त एव भवति, स निश्चयसचित्तः, यस्तु कदाचित् केवलिदृष्ट्याऽचित्तोऽपि भवति, परन्तु बाह्यशस्त्राहतत्वात् छद्मस्थेन शास्त्रचक्षुषा तस्याचित्तत्वं निर्णेतुं न पार्यते, स व्यवहारसचित्तो भवति । बाह्यशस्त्रोपहतत्वे तु छद्मस्थेनापि शास्त्रचक्षुषा तदचित्तत्वनिर्णयः क्रियत एवेति । एवमप्कायादावपि आयोज्यमेतत् ।

**( १०७ ) उष्णोदकमनुद्वृत्ते दण्डे मिश्रं भवति, तत्थ य मज्झे जीवसंघाओ पिंडीभूओ अच्छइ, पच्छा उव्वत्ते सो परिणमइ, सो जाव परिणमइ, ताव मीसो, वासे य पडियमित्ते - वर्षे च पतितमात्रे मिश्रो भवत्यप्कायः । ( ओ.नि. ३४५ )**

**चन्द्र.** दण्डः = उत्कालिकः, अनुद्वृत्तः = न समुद्भूतः । उत्कालिकत्रये सत्येव जलमचित्तं भवति, तदभावे तु मिश्रमिति व्यवहारः प्रकृतपाठे स्पष्टं प्रतिपादितः,

केवलमत्रोत्कालिकसङ्ख्या न प्रतिपादिता, सा तु सम्प्रदायानुरोधादवगन्तव्या । तदप्रतिपादनन्त्वत्र उत्कालिकत्रयस्य शीघ्रमेव भवनात् पृथक्तया सम्यगज्ञायमानत्वाद् इति अवसीयेत ।

**ननु** वह्निसंयोगेन उदकस्यात्युष्णत्वं स्पष्टमेवानुभूयते, ततश्चोत्कालिकत्रयाभावेऽपि अत्युष्णत्वानुभवात्तत्सर्वमेव जलं किमित्यचित्तं न स्वीक्रियेतेति **चेत्**

तत्कारणमत्रैव प्रतिपादितमस्ति । बहिर्वर्तिजलस्य अचित्तत्वसम्भवेऽपि सर्वाभ्यन्तरवर्तिजलस्य बहिर्वर्तिजलावृतत्वेन वह्निशस्त्रसंपर्कस्याल्पतया मिश्रत्वसम्भवाद् । उत्कालिके तु सति सर्वाभ्यन्तरवर्तिजलस्यापि तत्स्थानात्परावर्तनेनात्युष्णजलानुवेधेन चाचित्तत्वभवनादिति युक्तमेवोक्तं अनुद्वृत्ते दण्डे उष्णोदकं मिश्रं भवतीति ।

**( १०८ ) ऋतुबद्धः-शीतकालोष्णकालौ मिलितावेव भण्येते, तत्र यदि चीवराणां धावनं क्रियते, ततो बाकुशिको भवति विभूषणशील इत्यर्थः, यदा च विभूषणशीलो भवति, तदा ब्रह्मविनाशो भवति, तथाऽस्थानस्थापनं च भवति, यदुत नूनमयं कामी तेनात्मानं मण्डयति, ततश्चास्थानस्थापनं - अयोग्यतास्थापनं भवतीति । तथा संपाति-मसत्त्वानां वायोश्च वधो भवति, तथा प्लवनेन च सत्त्ववधो भवति, तथाऽऽत्मोपघातश्च भवति हस्ते कण्डकपतनादिति । ( ओ.नि. ३४९ )**

**चन्द्र.** स्पष्टम्, नवरमयमुत्सर्गमार्गः, तत्काले च लोकः न प्रायोऽतिशौचवादी, तथा मासकल्पाद्यनुसारेण विहारस्तदाऽऽसीत्, ततश्च विहारस्यात्यल्पत्वादुपधिमालिन्यमपि न शीघ्रं भवति, तथा गृहस्थपरिचयस्याप्यल्पत्वात् शासनाप्रभाजनाजुगुप्सादयो दोषा अपि प्रायोऽल्पसम्भवाः । उपकरणोपयोगस्य च तदानीमल्पत्वादपि तन्मालिन्यं प्रायोऽल्पसम्भवीत्येवमादिकारणवशात्तदानीं प्रकृताचारस्य योग्यत्वेऽपि वर्तमाने तद्योग्यत्वविचारणं अवश्यं कर्त्तव्यम् । यतो हि वर्तमाने काले साधवः प्रायो

नगरनिवासिनः, नगरजनाश्चाधुनातना अतिशौचवादिनः, विशेषतश्च श्रीमन्तो जैनाः, तथा श्रीमज्जैनगृहस्थपरिचयोऽपि प्रभूतोऽधुना, विहारोऽपि प्रचुरतयाऽधुना भवति, तदेतत्सर्वं पर्यालोच्य दोषगुणांश्च परिभाव्य ऋतुबद्धकाले वस्त्राणां प्रक्षालनेऽप्रक्षालने वा यत्राल्पदोषो भवति, तत्कर्त्तव्यम्, न तु सूत्रार्थमात्रग्राहिणा भवितव्यं स्याद्वादैकजीवनजिनशासननिरतेन संयमिना । तादृशक्षयोपशमाभावात् प्रकृतपर्यालोचनासामर्थ्ये तु गीतार्थशरणं ग्राह्यम्, तद्वचनानुसारेण च वर्तितव्यमित्युपदेशः ।

**( १०९ ) इदानीं स साधुः, प्रक्षालयन्कर्पटानि नाच्छोटयति रजकवत्, नापि च पिट्टयति काष्ठपिट्टनेन स्त्रीवत्, किन्तु हस्तेन मनाग्यतनया धावनं करोति, धौतानि च वस्त्राणि आतपे न प्रतापयति, मा भूत्तत्र काचित् षट्पदी स्यात्, कानि पुनरातपे कर्त्तव्यानि कानि वा न कर्त्तव्यानि ? इत्याह तानि कर्पटानि द्विविधानि भवन्ति-परिभोग्यानि अपरिभोग्यानि च, तत्र यथासङ्ख्येन छायातपयोः कर्त्तव्यानि, परिभोग्यानि छायायां शोष्यन्ते, मा भूत्तत्र षट्पदी स्यात्, अपरिभोग्यान्यातपे शोषयन्ति, तानि च कर्पटानि शुष्यन्ति सन्ति निरूपयत्यपहरणभयात् । पश्चात्तस्य प्रक्षालनप्रत्ययमेककल्याणकं प्रायश्चित्तं दीयते । ( ओ.नि. ३५८ )**

**चन्द्र.** वस्त्रप्रक्षालनविधिरत्र सामान्यतया प्रतिपादितः, तत्र यानि परिभोग्यानि वस्त्राणि छायायां कर्त्तव्यानि उक्तानि, तानि वार्षिकप्रक्षालनापेक्षया, सकलसंवत्सर-मप्रक्षालितानां तेषां परिभोगे मलादिवशात्षट्पदिकोत्पत्तिसम्भावनम्, ततश्च तद्रक्षणार्थं तानि छायायां शोष्यन्ते । यदि तु प्रतिपक्षं प्रतिमासं वोपधिप्रक्षालनं भवेत्, तर्हि प्रायः षट्पदिकाऽसम्भवात् आतपे शोषणेऽपि न दोष इति सम्भाव्यते ।

**ननु** अपरिभोग्यान्यपि छायायामेव शोष्यन्तां, किमिति आतपे शोषणेन प्रयोजनमिति

**चेत्** वायुकायविराधनापरिहारार्थं स्वाध्यायहानिनिवारणार्थं चेति जानीहि ।

तथा हि–छायायां तानि विलम्बेन शुष्यन्तीति वायुविराधनाऽधिका । आतपे तु तानि शीघ्रमेव शुष्यन्तीति तत्राल्पा विराधना । तथा तन्निरूपणमपि अल्पकालमेव कर्त्तव्यं स्यादातपशोषणे इति तत्र स्वाध्यायादिहानिरल्पा स्यात्, छायायां तु अधिककालं तन्निरूपणावश्यकत्वादधिका स्वाध्यायादिहानिरिति यथायोग्यं परिभावनीयम् ।

कल्याणकं प्रायश्चित्तं तपोविशेषः ।

**( ११० ) अतिहिमपाते यो वायुरतिदुर्दिने च यो वायुः, स नैश्चयिकः सचित्तः, व्यवहारतः पुनः प्राच्यादि – पूर्वस्यां यो दिशि, आदिग्रहणादुत्तरादिग्रहणपरिग्रहः । एतदुक्तं भवति–अतिहिमाति–दुर्दिनरहितो यः प्राच्यादिवायुः स व्यवहारतः सचित्तः । ( ओ.नि.३६१ )**

**चन्द्र. ननु** तर्हि अतिहिमपातादौ सचित्तवायुविराधनापरिहारार्थं उपाश्रयाभ्यन्तरेऽपि किं औणिकः कल्पः परिधातव्यो न वा ? इति **चेत्** यद्यप्यधुनाऽयं व्यवहारो न दृश्यते, तथाऽपि यथा पूर्वं षट्काययतनायां अतिवाते कम्बलपरिधापनादिका यतनोक्ता, तथैवात्रापि सा सम्भवेदिति सम्भाव्यते ।

**ननु** एवं सति प्राच्यादिवायुविराधनापरिहारार्थं सकलमपि कालं औणिककल्पः परिधातव्यः स्यात्, तद्वायोः सार्वदिकत्वादिति **चेत्** न, अशक्यपरिहाररूपत्वेन तद्यतनाया अभावादिति तद्विराधनायां न कश्चिद्दोषः, यत्र तु तद्विराधनापरिहारः शक्यः, तत्र तु तदकरणे दोषो भवेदिति अग्रे स्फुटीभविष्यति ।

**( १११ ) सर्व एवानन्तवनस्पतिकायो निश्चयनयेन सचित्तः, शेषः परित्तवनस्पतिर्व्यवहारनयमतेन सचित्तः । ( ओ.नि.३६४ )**

**चन्द्र.** ननु अग्न्यादिशस्त्रोपहतोऽनन्तवनस्पतिकायोऽपि अचित्त एव, ततश्च कथं तस्य निश्चयतः सचित्तत्वं ? पृथ्व्यादौ यः निश्चयतः सचित्तः प्रतिपादितः, स न कदाऽप्यचित्तो भवति, अयन्तु अनन्तवनस्पतिकायः शस्त्रोपहतः सन् अचित्तोऽपि सम्भवतीति निश्चयतस्तस्य सचित्तत्वनिरूपणं न सङ्गतमिति **चेत्** ।

**सत्यं,** शस्त्रानुपहतस्यैवानन्तवनस्पतिकायस्य निश्चयतः सचित्तत्वमवबोध्यमिति न दोषः । न हि शस्त्रानुपहतः कोऽपि अनन्तकायः केवलिदृष्ट्या कदाचिदप्यचित्तो भवतीति ।

**( ११२ ) अत्र परः पुनरपि चोदयति-एवं नामानीय लेपमाश्रये लिम्पतु पात्रकं, किन्तु लेपयित्वा ततो हस्ते लिप्तं स धारयंस्तिष्ठतु यावत्तद्धस्तस्थितमेव शोषमुपयाति, किं कारणं ? यतो यूयं सद्रवनिक्षेपपरिहारिणः, सद्रवस्य निक्षेपः, सद्रवनिक्षेपः, तं परिहर्तुं शीलं येषां भवतां ते सद्रवनिक्षेपपरिहारिणः, एतदुक्तं भवति- पात्रकं तोयार्द्रमपि न निक्षिपथ, किं पुनर्लेपलिप्तमिति । ( ओ.नि.भा.२०० )**

**चन्द्र.** यद्यप्ययं पूर्वपक्षः, तथापि सद्रवनिक्षेपपरिहारस्तु जिनमतावलम्बिनामाचारो भवत्येव, सद्रवनिक्षेपे प्रभूतजीवविराधनासम्भवादिति ।

तथाहि-सपानके पात्रके निक्षिप्ते तत्र मक्षिका-भ्रमर-पीपिलिकाप्रभृतयस्त्रसा पतेयुः, ते च तस्मान्निर्गन्तुमशक्नुवन्तः पीड्यन्ते म्रियन्ते च । एतच्चाधुनाऽप्यस्माकं प्रत्यक्षसिद्धं । अतएव भोजनपानादिसम्भृतं पात्रकटोक्करिकादि कुत्रापि न निक्षेप्तव्यम् । यदि चाधुना

निक्षेपणत्यागो दुःशकः, तर्हि तन्निरावरणं न निक्षेपनीयम्, केनाऽपि अन्योपकरणादिना तदावरणं कर्त्तव्यमितीयं यतना चारित्रातिचाराल्पतापादिकेति ।

यद्यपि चात्र पूर्वपक्षस्य निराकरणं कृतमेव, तथाऽपि प्रकृताचारस्तु उत्सर्गतोऽभिमत एव, न तत्र कश्चिदपि विवाद इति ।

**( ११३ ) यस्मिन्दिवसे पात्रकं लेपयति, तस्मिन्दिवसे घटग्रीवादीनां प्रत्युपेक्षणं कृत्वा ततश्च गृह्णाति, येन लिप्तं पात्रकं बहिस्तस्यां ग्रीवायां तस्मिन्दिवसे क्रियते । निशायां तु छन्ने तत्पात्रकं कुर्यात् आत्मसमीपे, कृते च कार्ये व्युत्सर्गः कर्त्तव्यस्तेषां घटग्रीवादीनां तस्मिन्नेव दिवसे, येन परिग्रहकृतो दोषो न भवेत्, अन्यस्मिन्दिवसेऽन्यानि भविष्यन्ति ।**

**( ओ.नि.भा. २११ )**

**चन्द्र.** परिग्रहदोषनिवारणाय घटग्रीवादीनामेकमपि दिवसं यावत् परिग्रहो नानुमत इति प्रकृतपाठाद् ज्ञायते ।

**ननु** तदानीं घटानामेव प्रभूतोपयोगात्प्रतिदिनं घटग्रीवादि सुलभं आसीत्, ततश्च तत्परिग्रहो निरर्थक एवेति तत्परिष्ठापनमेव युक्तम् । परन्तु यानि वस्तूनि तदानीमधुना वा यस्मिन्काले दुर्लभानि, तानि तु परिगृह्यमाणानि न दोषायेति **चेत्** शास्त्रोक्तयतनया तथाकरणे तु सत्यम्, तदुल्लङ्घने तु दोषो भवेदेव, अपवादशुद्धेः पुष्टकारणान्वितयतनाऽधीनत्वादिति ।

**( ११४ ) तत्र भिक्षाप्रवेशप्रमाणप्रतिपादनायाह - भिक्षार्थं वाराद्वयं प्रविशति, एकमकालसंज्ञायाः पानकनिमित्तम्, द्वितीयं भिक्षाचर्याकाले प्रविशतीति । जदि पुण तइयवारं भिक्खायरिअं करेइ, ततो खेत्तं चमढिज्जइ, उड्डाहो य हवइ, जहा णत्थि एएसिं भिक्खहिंडणे नियमो, तम्हा दोण्णिवाराउ हिंडियव्वं, एयं च पुव्वभणियमेव-पुणो पुणो पविसणे सड्ढयकुलाणि चमढिज्जंतित्ति । ( ओ.नि.भा.२१३ )**

**चन्द्र.** कालसंज्ञा नाम सूत्रार्थपौरुषीकरणानन्तरं भिक्षाटनं कृत्वा ततश्च भुक्त्वा यदुच्चारव्युत्सृजनं क्रियते, सा । तदन्यकाले तु प्रातरादौ भवन्ती सा अकालसञ्ज्ञा । ततश्चाकालसंज्ञायां पानकनिमित्तं तदन्यकाले च भिक्षानिमित्तं गृहस्थगृहे प्रविशन्ति साधवः, एवं उत्सर्गतो वाराद्वयं भिक्षार्थप्रवेशोऽनुज्ञात इति । तदधिकवाराप्रवेशे तु जिनशासनापभ्राजनादिदोषा प्रकृते उक्ताः स्पष्टा एवेति ।

**ननु** प्रातरुच्चारव्युत्सृजनार्थं पानकनिमित्तं गृहप्रवेशः किमर्थः ? यतः रात्रौ क्षारयुक्तं पानकं उपाश्रये रक्षितमेव, ततश्च तेनैव निर्वाहो भवति । तस्मात्केवलं भिक्षार्थप्रवेश एव न्याय्यः, तदैव पानार्थं पानकमपि ग्राह्यम् । तस्मादुद्धरितं पानकं रात्रौ क्षारयुक्तं कृत्वा रक्ष्यमिति प्रतिदिनमेष एव क्रमः इति **चेत्**

न, रात्रौ क्षारयुक्तस्यापि पानकस्य रक्षणे परिग्रहदोषसम्भवेन शास्त्रे निवारितत्वात् । किञ्च ग्रीष्मकाले अतीव तृषितः कश्चित्तदेव क्षारयुक्तं पानकं उपाश्रये रक्षितं पिबेदिति षष्ठव्रतभङ्गोऽपि सम्भवेत् ।

तथा पानकरक्षणार्थं तदाधारभूतं किञ्चिद् गृहस्थभाजनमपि परिग्रहीतव्यं स्यात्, तत्रापि अनेके दोषा इति उत्सर्गतः रात्रौ पानकं क्षारयुक्तमपि न परिग्राह्यमिति । अत एवाधुनाऽपि योगोद्वहने तादृशजलस्य परिभोग उत्सर्गतःनिषिध्यते । यच्चाधुना सर्वे एव रात्रौ तादृशं पानकं गृह्णन्ति, तत् संविग्नगीतार्थपरम्परायातत्वात् न दुष्टमिति सम्भाव्यते । तथाऽपि तत्र सूर्योदयं यावत् यावज्जलं गच्छेऽवश्यमुपयुज्यते, तावदेव जलं ग्राह्यम्, न तु सूर्योदयानन्तरमपि सकलस्मिन्दिने तदुपयोगः श्रेयान् ।

अत्र बहु वक्तव्यम्, उत्सर्गापवादप्रचुरत्वादस्य, तथाऽपि विस्तरभिया नोच्यते ।

**( ११५ ) यदि सङ्घाटकोपेतः सन् भिक्षाटनं न करोति, तत एकाकिन एते दोषाः स्त्रीकृतः श्वजनितः प्रत्यनीकजनितः भिक्षाविशुद्धिरेकस्य न भवति, तथा व्रतोपघातो भवति, तस्मात्सद्वितीयेन गन्तव्यम् । ( ओ.नि.४१३ )**

**चन्द्र.** भिक्षाटनार्थं साधुभिः द्विवर्गेण गन्तव्यम्, साध्वीभिश्च जघन्यतोऽपि त्रीभिस्त्रीभिर्गन्तव्यमिति उत्सर्गः । तादृशसङ्घाटकव्यवस्थाभङ्गेन एकाकितया भिक्षाटने क्रियमाणे बहवो दोषाः ।

तथाहि - एकाकिनः स्त्रीकृता दोषा भवन्ति, एकाकिनं दृष्ट्वा साधुं कदाचिद् गृह्णीयात् ।

तथा एकाकिनं शुनी उपद्रवेत्, तत्र यदि शुन्यां उपयोगं ददाति, ततः भिक्षादिषु अनुपयोगात् भिक्षाऽशुद्धिः स्यात्, अथ भिक्षायामुपयोगं ददाति, तत आत्मोपघातदोषः, ।

तथा द्वौ साधू भिक्षामटन्तौ प्रत्यनीकस्य दुष्प्रधृष्यतरौ भवतः, एकाकिनं पुनर्दृष्ट्वा प्रद्विष्टः प्रत्यनीको हन्ति ।

तथा एकाकी साधुः क्वचित्पाटके भिक्षार्थं प्रविष्टः, तदा समकमेव गृहत्रयान्निर्गता भिक्षा गृह्णतस्तस्य भिक्षाया अशुद्धिः भवति, अभ्याहृतदोषो भवतीति भावः, यत इर्यापथिकां शोधयितुं न शक्नोति भिक्षानयितॄणां, अथ तत्रैकां भिक्षां गृह्णाति, यस्यामुपयोगो दत्तः, तत इतरस्य भिक्षाद्वयस्याग्रहणे ते भिक्षादातारः प्रद्वेषं गच्छेयुः, यदुत 'अस्माकमयं परिभवं करोति येन नास्मदीयं गृह्णाति' इति । अग्रहणे च परिहाणिर्भवति भिक्षाया गच्छस्य वा ।

तथा त्रिषु गृहेषु यौगपद्यागतां भिक्षां यदा गृह्णाति, तदा प्राणिवधः कृतो भवति, ततश्च प्रथमव्रतभङ्गः ।

तथाऽसौ एकाकी कौटलं ज्योतिषं निमित्तं वा प्रयुङ्क्ते, ततश्चानृतस्य नियमेनैव सम्भवः, यतस्तत्रोपघातकरमवश्यमुच्यते । उपघातजनकं चानृतं, तदुच्चारणे द्वितीयव्रतभङ्गः ।

अथ तत्र गृहे एकाकी प्रविष्टः सन् विक्षिप्तं हिरण्यादि पश्यति, ततश्च तद् गृह्णाति एकाकिनो मोहसम्भवात् ततः स्तैन्यदोषः, ततः तृतीयव्रतभङ्गः ।

तथा विधवा प्रोषितभर्तृका निरुद्धा वा स्त्री एकाकिनं साधुं प्रविष्टं दृष्ट्वा गृहे द्वारं

ढक्कयित्वा गृह्णीयात्, तत्र यद्यसौ तां स्त्रियमिच्छति, ततः संयमभ्रंशः, अथ नेच्छति तत उड्डाहः, सैव स्त्री लोकस्य कथयति यदुतायं मामभिभवतीति ।

तथा एकाकी कदाचिदनेषणीयमपि गृह्णीयात्, ततस्तस्मिन्ननेषणीये गृहीते परिग्रहकृतो दोष इति ।

तदेवमैतावद्दोषभयात्साधुना ससङ्घाटकेनैव भिक्षाटनादि कर्त्तव्यम् । एतदेव सर्वं यथायोगं श्रमणीष्वपि वाच्यम् ।

**ननु** यद्येकाकिन एतावन्तो दोषाः, किमर्थं तर्हि जिनकल्पिकादीनामेकाकित्वमनुज्ञातमिति **चेत्** ?

अतिशयज्ञानिनां तेषां दोषाभावात्, न चैकस्य यन्निषिद्धं, तत्सर्वस्यापि निषिद्धमेव भवति, अधिकारिभेदेन अनुष्ठानभेदस्य युक्तत्वात् । तदुक्तं अष्टकप्रकरणे '**अधिकारिवशाच्छास्त्रे धर्मसाधनसंस्थितिः । व्याधिप्रतिक्रियातुल्या**' इत्यादि । यदि हि नैवं मन्येत, तर्हि साधूनां जिनपूजासुपात्रदानादिकं निषिद्धमिति कृत्वा गृहस्थानामपि तन्निषिद्धं स्यात् ।

न केवलं जिनकल्पिकादीनामेवापि तु पुष्टालम्बने सति अनतिशयिनामपि श्रमणानां एकाकित्वमनुमतमेव, तत्र यथासम्भवं दोषपरिहारयतनाकरणेऽपि यद्यपि केचिद् दोषा भवेयुः, तथाऽपि पुष्टालम्बनसमन्वितशास्त्रीययतनासत्त्वेन नाध्यात्मिकदोषाः स्युः, बाह्यदोषास्तु अकिञ्चित्करा इति ।

**( ११६ ) तत्रोत्सर्गतः सर्वमुपकरणमादाय भिक्षागवेषणां करोति, अथासौ सर्वेण गृहीतेन भिक्षामटितुमसमर्थस्ततः आचारभण्डकेन समम्, आचारभण्डकं-पात्रकं पटलानि रजोहरणं दण्डकः कल्पद्वयं-और्णिक-क्षौमिकश्च मात्रकं च, एतद् गृहीत्वायाति । ( ओ.नि.भा.२२७ )**

**चन्द्र.** सर्वं स्पष्टम्, नवरमधुना व्यवहारे स आचारो न दृश्यते, तत्कारणानामधुनाऽत्यल्पत्वादिति । कानि पुनस्तानि कारणानीति **चेत्** परचक्रभयादीनि इति

गृहाणेति । अकस्मात्तादृशभये समुत्पन्ने सति भिक्षाटनस्थानादेव नंष्टव्यम्, नोपाश्रयागमनाद्यवकाशः, ततश्च यदि सकलोऽप्युपधिर्भिक्षाटने गृहीतो न भवेत्, तर्हि तं विनैव पलायने कृते संस्तारकाद्यभावजन्या दोषाः सम्भवेयुरिति सकलोऽप्युपधि-र्भिक्षाटनेऽपि ग्राह्य इति भावः ।

**(११७) एवं तस्यैकाकिनो गतस्य सतः स्त्रीग्रहणे सति-स्त्रिया गृहीतः सन् धर्मकथां करोति, यदुत नरकगमनाय मैथुनसेवेत्येवमादिकां, अथ कथितेऽपि धर्मे न मुञ्चति, ततो भणति यदुत व्रतानि गुरुसमीपे स्थापयित्वाऽऽगच्छामीति एतदभिधाय नश्यति, अथ तथाऽपि न लभ्यते गन्तुं ततो इहैवापवरके व्रतमोक्षणं करोमीति तत्र च प्रविशति, उल्लम्बनार्थं रज्जुं च गृह्णाति, ततस्तेन भयेन कदाचिन्मोहोपशमो भवति, मोहनरसो भयेन ह्रीयते, अथैवमपि न मुञ्चति, ततो म्रियत एवेति । (ओ.नि. ४२२)**

**चन्द्र.** भिक्षाटने स्त्र्युपद्रवे सति संयमादिरक्षणाय क्रियमाणा यतनाऽत्र प्रतिपादिता, सा च सुगमैव ।

**ननु** अत्र ''गुरुसमीपे स्थापयित्वाऽऽगच्छामि'' इत्यादिभणने मृषावादः, व्रतस्थापनस्य पुनरागमनस्य चाकरणात् इति **चेत्** ।

स्वरूपहिंसावत् स्वरूपमृषावादोऽपि न दुष्ट इति किं न जानासि, यथा हि सुसाधूनामाधाकर्मादौ श्रावकाणां च जिनपूजनादौ स्वरूपतो हिंसायामपि न वस्तुतो हिंसकत्वम्, एवमेव प्रमत्तयोगाभावे केवलं ब्रह्मव्रतादिरक्षणाभिप्रायेण मृषावादः स्वरूपत एव मृषा, नानुबन्धत इति न साधूनां तया मृषावादविरमणव्रतभङ्गापत्तिरिति ।

**ननु** तथाऽपि आत्महिंसा जिनशासने प्रतिषिद्धा, दुरन्तभवकारणत्वात्, तत्कथमत्र साऽनुज्ञाप्यत इति **चेत्** आर्तध्यानादिपारवश्यात्क्रियमाणा सा तथात्वात्प्रतिषिद्धा, महाव्रतराजस्य ब्रह्मचर्यस्य संरक्षणाभिप्रायेण क्रियमाणाऽऽत्महिंसा तु अनुमतैवेति ।

**ननु** तथाऽपि आत्महिंसाकरणे तु परलोकेऽविरतिप्राप्तिर्ध्रुवैव, तदकरणेन मैथुनसेवने तु यद्यपि तदानीं रागभावेन चारित्रपरिणामभङ्गेऽपि पश्चात्पश्चात्तापादिना पुनः स संयोजयिष्यत इति चिरकालं चारित्रपालनं, तज्जन्या निर्जरा, तथाविधपरिणतिसम्भवे तु मोक्षोऽपि भवेदिति स एव पन्थाः प्रगुणः, न आत्मघातादिरूप इति **चेत्** ।

न, तथास्वाभाव्यान्मैथुनसंज्ञाया बलवत्तरत्वेन सकृदपि तत्सेवने पश्चात्प्रायश्चित्तकरणेऽपि पुनः पुनः तदभिलाष उज्जृम्भते, ततश्च पुनः पुनः तत्सेवनसम्भावनाऽपि दुर्वारेति भवति सर्वथा चारित्रपरिणामघातः, कदाचिच्छासनापभ्राजनायां तु सत्यां बोधिदुर्लभतादिकमपि न दुःशकमिति महाहानिसम्भवदर्शनादेव चिरं चारित्रपरिणामरक्षणाभिप्रायेणाऽपि मैथुनसेवनं नानुज्ञातमिति ।

**ननु** मैथुनसंज्ञा बलवत्तरा, न त्वाहारादिसंज्ञेति अत्र को नियामकः, प्रत्युत कवलाहारस्य द्वीन्द्रियादारभ्य प्रवर्तमानत्वात् मैथुनस्य च स्पष्टतया पञ्चेन्द्रियेष्वेव प्रवर्तमानत्वात् आहारसंज्ञैव अधिककालव्यापित्वाद् बलवत्तरेति सम्भाव्यत इति **चेत्**,

न, शोभनोऽप्याहारो रागं विनाऽपि भोक्तुं शक्यते, मैथुनन्तु कुरुपया हस्तपादकर्णनासिकादिरहितयाऽपि स्त्रिया क्रियमाणं रागं विना नैव भवतीति अनेनैव मैथुनसंज्ञाया बलवत्तरत्वमनुमीयते ।

**(११८) 'जस्स य जोगं' इत्येवं अकृत्वा = अभणित्वा निर्गतः सन् एवं न लभते = न भवत्याभाव्यं सचित्तं = प्रव्रज्यार्थमुपस्थितं गृहस्थम्, नाप्यचित्तं वस्त्रपात्रकादि, अथ यस्य योग इत्येवमकृत्वा गृह्णाति ततः स्तैन्यं भवति, तस्मात्कुरु यस्य योग इत्येवम् । (ओ.नि. ४२९)**

**चन्द्र.** एष विधिरधुना प्रातः 'उपयोग करुं' इत्याद्यादेशैः क्रियते, तत्काले तु मध्याह्ने भिक्षाटनार्थं गमनकाल एव क्रियमाणः स विधिरासीत् । तदानीं ते गृहीतोपकरणाः प्रावृत्तकल्पा एव एनं विधिं अकुर्वन् । अत एवाधुना प्रातः तद्विधिकरणकाले स्कन्धे एकः कल्पः क्रियते, तच्च प्राचीनक्रिया-सापेक्षताप्रतिपादकमिति ।

**( ११९ ) आपुच्छणा नाम संदिसह उवओगं करेमित्ति, बितिया पडिपुच्छणा-कह गिह्णामित्ति, गुरु भणइ - तहत्ति । यथा पूर्वसाधवो गृह्णन्तीत्यर्थः । ( ओ.नि. ४३० )**

**चन्द्र. ननु** अधुना "जह गहिअं पुव्वसूरिहिं" इत्येवं गुरुणोच्यते । प्रकृतपाठे तु "यथा पूर्वसाधवो गृह्णन्ति" इति गुरुवचनं प्रदर्शितमस्ति, ततश्च "जह गहिअं पुव्वसाहुहिं" इत्येव वक्तुं युक्तमिति **चेत्**

**सत्यं**, तथाऽपि यदि कुत्रचिद्गच्छे विभिन्ना सामाचारी दृश्यते, तर्हि साऽपि अपेक्षातो न दुष्टेति ।

**ननु** कथं न दुष्टा ? सूरीणां भिक्षाटनं प्रतिषिद्धमेवेति सूरिभिः भिक्षा गृहीतैव नेति "जह गहिअं पुव्वसूरिहिं" इति वचनमेव व्याहन्यत इति **चेत्**

न, "यथा योधैः कृतं युद्धं स्वामिन्येवोपचर्यते" इति न्यायात् साधुभिः गृहीतं साधुस्वामिनि सूरौ उपचर्यते इति सूरिभिर्गृहीतं तदिति वचनेऽपि न क्षतिरिति ।

एतत्तु तद्गच्छीयसामाचारीमिथ्यात्वपरिहारायोक्तमिति बोध्यम्, अस्माकन्तु "जह गहिअं पुव्वसाहुहिं" इति पाठे श्रद्धानं ।

**( १२० ) यदि हि ते समनोज्ञाः - एकसामाचारीप्रतिबद्धास्ततस्तेषां मध्ये प्रविशति, अन्ये-अमनोज्ञा भवन्ति यदि, ततो बाह्यत उपकरणं स्थापयित्वा प्रविश्य कृतिकर्म द्वादशावर्तवन्दनं ददाति, अथ ते संविग्नपाक्षिका अवसन्ना भवन्ति, ततो बहिर्व्यवस्थित एव वन्दनं कृत्वाऽबाधां पृच्छति, अथ ते अवसन्नाः खग्गूडप्रायास्ततो बहिरेवोपकरणं स्थापयित्वा पुनश्च प्रविश्य तेषामुच्छोभवन्दनं करोति । ( ओ.नि. ४३४ )**

**चन्द्र.** ग्रामान्तरं भिक्षार्थं गतस्य साधोः 'यदि तत्र साधवः सन्ति', तर्हि को विधिरित्यत्र प्रतिपादितम्, तच्च सुगमम् ।

अत्र हि असाम्भोगिकान्प्रति द्वादशावर्तवन्दनं कर्त्तव्यतया प्रतिपादितमस्ति । एतच्च प्रागेवोक्तं अस्माभिरत्र तु स्मरणार्थं पुनरुपात्तमिति बोध्यम् ।

अत्र साम्भोगिकानसाम्भोगिकांश्च प्रति द्वादशावर्तवन्दनम्, संविग्नपाक्षिक-शिथिलान्प्रति वन्दनम्, खग्गूडशिथिलान्प्रति उच्छोभवन्दनं कर्त्तव्यं इति विवेकः ।

**ननु** साम्भोगिकासाम्भोगिकान् प्रति द्वादशावर्तवन्दनं तावद् युक्तमेव, तेषां संविग्नत्वात् । ये तु संविग्नपाक्षिकाः शिथिलाः, तान्प्रति यद् वन्दनं, तत् किंस्वरूपं ? किं द्वादशावर्तवन्दनमुत 'मस्तकेन वन्दामि' इति वचनरूपं वन्दनमुत उच्छोभवन्दनं ? न तावत्प्रथमम्, असंविग्नान्प्रति तस्यानुचितत्वात् । न च द्वितीयं, यतो हि संविग्नपाक्षिकाः खग्गूडशिथिलसकाशादभ्यधिकाः, ततश्च यदि खग्गूडशिथिलान्प्रति उच्छोभवन्दनं कर्त्तव्यं प्रतिपादितम्, तर्हि संविग्नपाक्षिकान्प्रति तु तदधिकवन्दनस्यैव कर्त्तव्यत्वं भवेत्, 'मस्तकेन वन्दामि' इति वचनात्मकवन्दनं च उच्छोभवन्दनाद् लघीयः, इति न तत् तान्प्रति कर्त्तव्यं भवेदिति । न च तृतीयम्, तस्यात्रानुक्तत्वात्, खग्गूडशिथिलान्प्रत्येव तस्योक्तत्वादिति वन्दनत्रयस्याप्यत्र असम्भवात् संविग्नपाक्षिकान्प्रति किंस्वरूपं वन्दनं कर्त्तव्यमिति प्रश्नोऽवशिष्यत एवेति **चेत्**

**उच्यते**, 'मस्तकेन वन्दामि' इति द्वितीयवन्दनं तान्प्रत्युचितमिति सम्भावयामः ।

**ननु** खग्गूडशिथिलापेक्षयाऽधिकानां तेषां तदपेक्षया हीनं वन्दनं कथं कर्त्तव्यतयोचितं भवेदिति **चेत्**

**सत्यम्**, यद्यपि असंविग्नत्वात् संविग्नपाक्षिका खग्गूडशिथिलाश्च द्वयेऽप्यवन्दनीया एव, तथाऽपि ग्रामान्तरं गतस्य साधोः व्यवहारौचित्यमपेक्ष्य तान्प्रति किञ्चित्कर्त्तव्यं भवेदिति संविग्नपाक्षिकान्प्रति व्यवहारमात्रार्थं 'मस्तकेन वन्दामि' इति वन्दनं क्रियते । खग्गूडशिथिलाश्च संविग्नान्प्रति स्नेहविरहिताः तावता वन्दनेन कदाचित्कोपं गच्छेयुः, ततश्चानिष्टमपि किञ्चित्कर्तुं प्रयतेयुरिति तन्निवारणार्थं उच्छोभवन्दनं क्रियते । संविग्नपाक्षिकास्तु संविग्नस्नेहपरत्वात् वन्दनाभावेऽपि परितोषमेवाप्नुयुरिति न तान्प्रति उच्छोभवन्दनावश्यकता । इत्थं च गौरवलाघवादिकं सम्प्रेक्ष्य संविग्नपाक्षिकान्प्रति खग्गूडशिथिलापेक्षया हीनमपि वन्दनं नानुचितमिति सम्भाव्यते, तत्त्वमत्रत्यं बहुश्रुतगीतार्थाधीनमिति संङ्क्षेपः ।

( १२१ ) स्थापनाकुलानि तथा म्लेच्छगृहं तथा अचियत्तगृहं तथा छिम्पकादिगृहं सूतकोपेतगृहं वा, एतेषु न प्रवेष्टव्यम्, इयं गणधरस्थितिस्ततश्चैतां मर्यादां प्रवेशेनातिक्रामन् विराधयति दर्शनादि । आह प्रतिकुष्टकुलेषु प्रविशतो न कश्चित् षड्जीववधो भवति, किमर्थं परिहार इति ? उच्यते ।

छक्कायदयावन्तोऽवि संजओ दुल्लहं कुणइ बोहिं ।
आहारे नीहारे दुगुंछिए पिंडगहणे य ।

सुगमा, नवरं आहारनीहारौ यद्यगुप्तः सन्करोति जुगुप्सितेषु छिम्पकादिषु यदि पिण्डग्रहणं करोति ततो दुर्लभां बोधिं करोतीति। ननु च ये इह जुगुप्सितास्ते चैवान्यत्राजुगुप्सितास्ततः कथं परिहरणं कर्त्तव्यं ? उच्यते । ये यस्मिन्विषयादौ जुगुप्सिताः प्रव्रज्यामङ्गीकृत्य वसतिमङ्गीकृत्य भक्तं पानं चाङ्गीकृत्य, ते तत्र वर्जनीयाः । ( ओ.नि. ४४३ )

चन्द्र. तथा च जुगुप्सितकुलानि प्रवचनापभ्राजनानिमित्तत्वेनैव वर्जनीयानि, न तु स्वरूपत एव । अत एव ''यस्मिन्विषये तानि जुगुप्सितानि, तस्मिन्विषये तानि वर्जनीयानि'' इत्यर्थापत्त्या ज्ञायते यदुत अन्यत्र जुगुप्सितान्यपि तानि यदि अमुकविषयेऽजुगुप्सितानि, तर्हि तत्र ते न वर्जनीयानीति यथा प्रवचनविराधना न भवेत्, तथा प्रवर्तितव्यम् । न त्वन्यतरत्राऽपि एकान्तमतिना भाव्यमिति ।

(१२२) सर्वथा येन केनचित् दोषेण = निमित्तेन यस्य सम्बन्धिना अयशः = अश्लाघा आयासः = पीडा प्रवचने भवति, अग्रहणं वा विपरिणामो वा श्रावकस्य शैक्षकस्य वा, तन्न कर्त्तव्यम्, तथाऽप्रत्ययो वा शासने येन भवति यदुतैतेऽन्यथा वदन्ति अन्यथा कुर्वन्ति एवंविधोऽप्रत्ययो येन भवति तन्न कर्त्तव्यम्। तथा जुगुप्सा च येनोत्पद्यते यदुत वराकका एते दयामनस्कास्तदेवंविधं न किञ्चित्कार्यम्।

यस्तु पुनरेवं करोति तस्येदमुक्तं भगवता। प्रवचनमनपेक्षमाणस्य तस्य निद्धन्धसस्य = निःशूकस्य लुब्धस्य बहुमोहस्य भगवता संसारोऽनन्त उक्त इति।

तथा न केवलम् बहुमोहस्यैतद्भवति, योऽप्यन्यस्तस्याप्येवं कुर्वतोऽनन्त एव संसारः, एतदेवाह जो जह व तह व लद्धं गिण्हइ आहारउवहिमाइयं। समणगुणमुक्कजोगी संसारपवड्ढओ भणिओ।

सुगमा। एवं तावज्ज्ञानवतामपि दोषः, ये तु पुनराचार्येण मुण्डितमात्रा अगीतार्था एव मुक्तास्ते सुतरामज्ञानादेव एषणादि न कुर्वन्ति, एतदेवाह एसणमणेसणं वा कह ते नाहिंति जिणवरमयं वा। कुरिणंमिव पोयाला जे मुक्का पव्वईमेत्ता

सुगमा। नवरं कुरिणंमि = महति अरण्ये पोयाला = मृगादिपोतलकास्ते इह यूथपतिना मुक्ताः सन्तो विनश्यन्ति एवं तेऽपीति।

एवं तावदाचार्यदोषेणैवंविधा भवन्ति। (ओ.नि. ४४५-४४८)

**चन्द्र.** स्पष्टमेव सर्वं, अतिगभीरचेतसा विभावनीयं चेति।

**ननु** अत्र "ये पुनराचार्येण मुण्डितमात्रा..." इत्यादि अन्ते च "एवं

तावदाचार्यदोषेणैवंविधा भवन्ति" इति उक्तम् । तत्रागीतार्थशिष्याणां पृथग्मोचनं गुरोरेव दोषः, शिष्यास्तु गुरुपरतन्त्रत्वात् तथाकरणेऽपि न दोषभाजो भवन्ति । नहि शिष्याणामाशयो दुष्टः, किन्तु "यदेवाज्ञापयेद् गुरुः, तदेव मया कर्त्तव्यम्" इति गुरुपारतन्त्र्यभावाच्छुभादेव ते तथा प्रवर्तन्त इति को दोषस्तेषामिति **चेत्**

न, अगीतार्थस्यासंविग्नस्य वा गुरुतया स्वीकरणमेव तेषां शिष्याणां दोषः,

न चाज्ञानभृतां तेषां तादृशगुरुस्वीकारे न मनःक्लिष्टताऽस्तीति न तेषां दोष इति वाच्यम् अज्ञानस्यापि दोषत्वानपायात् । किञ्चानासन्नसिद्धिकानामेव प्राय एतादृशगुरुसंयोगो भवतीति तेषां भवितव्यताऽपि अत्र दोषवती भवन्ती केन निषेध्या ? किञ्च यथा कुवैद्यपरतन्त्रो रोगी तद्वचनानुसारेण प्रवर्तमानो नियमाद् अन्तमवाप्नोति, तत्र 'अयं कुवैद्योऽस्ति' इति सम्यग्ज्ञानं भवतु मा वा । एवं कुगुरुपरतन्त्रः शिष्यस्तद्वचनानुसारेण प्रवर्तमानो नियमाद् विनश्यति, तत्र "अयं कुगुरुरस्ति" इति सम्यग्ज्ञानं भवतु मा वा । अत एव संविग्नगीतार्थगुरुगवेषणार्थं सप्तशतानि योजनानि द्वादशवर्षपर्यन्तं पर्यटनमनुज्ञातम् । अत एव च "अगुरौ गुरुतामतिर्मिथ्यात्वम्" इत्युक्तम् । तथा च योगशास्त्रवचनं "अदेवे देवताबुद्धिः, गुरुधीरगुरौ च या । अधर्मे धर्मबुद्धिश्च मिथ्यात्वम्" इति ।

तस्माद् यद्यपि प्रकृते गुरोरेव स दोषः, यदुत स शिष्यानगीतार्थानेव केवलान् विमुञ्चति, तथापि तादृशगुरुपारतन्त्र्यदोषेण शिष्याणां विनाशो ध्रुवः, न तेषां "वयं तु गुरुपदेशेन प्रवर्तामहे, इति नास्माकं दोषः" इति अभिप्रायमात्रेण दोषमुक्तिरिति हितार्थिना सद्गुरोरेव पारतन्त्र्ये दृढं यतनीयम् । सद्गुरुश्चाधुना जघन्यतोऽपि निशीथचूर्णिविज्ञाता मूलगुणपालकश्चेति, तदधिकज्ञानाभावेऽपि उत्तरगुणशैथिल्येऽपि च सति पञ्चमारकादिकमपेक्ष्य तस्य सुगुरुत्वप्रतिपादनात् । व्यक्तं चैतत्पञ्चाशके इति ।

**ननु** अङ्गारमर्दकशिष्याः कुगुरुपरतन्त्रा अपि न विनष्टाः, प्रत्युत कुगुरुपारतन्त्र्यकालेऽपि चारित्रपरिणामवृद्धिभाज आसन्निति न कुगुरुपारतन्त्र्यं विनाशकमिति **चेत्**

न, निपुणतया कुगुरुसद्गुरुलक्षणपरीक्षणेऽपि कुगुरोः तथाविधकपटाद् यदि कुगुरुलक्षणानि न ज्ञायन्ते, सुगुरुलक्षणानि च स्पष्टं दृश्यन्ते, तदा कुगुरौ अपि सुगुरुत्वप्रज्ञामाश्रित्य पारतन्त्र्यं न दोषकारि, प्रमादाभावात् । यदा तु तादृशलक्षणाज्ञानादेव तज्ज्ञानेऽपि वा प्रमादातिस्नेहादिदोषपारवश्यादेव कुगुरौ अपि सुगुरुतामतिः क्रियते, तदा भवत्येव दोषः, अज्ञानादिदोषसद्भावादिति । अत एव अङ्गारमर्दकशिष्यैः कुगुरुलक्षणपरिज्ञानानन्तरं तस्य त्याग एव कृत इति न विस्मरणीयम् ।

**( १२३ ) अत्र प्राप्तायां भिक्षायां दात्र्यां वत्सकेन दृष्टान्तो वेदितव्यः । जहा एगस्स वाणियस्स वच्छओ, तद्दिवसं तस्स संखडी, न कोइ तस्स भत्तपाणियं देइ, मज्झाहे वच्छएण रडियं, सुण्हाए से अलंकियविभूसियाए दिण्णं भत्तपाणं । जहा तस्स वच्छस्स चारीए दिट्ठी ण महिलाए, एवं साहुणावि कायव्वं । ( ओ.नि.४७८ )**

**चन्द्र.** वत्सको हि प्रथमत एव मनुष्यस्त्रियां नीरागो भवति, तत्रापि अतीवबुभुक्षायां तु सुतरां तां प्रति दृष्टिदानेऽपि उदासीनो भवति । एवमेव मुनिरपि विभूषितायामपि स्त्रियां प्रथमत एव विरागो भवति, बुभुक्षादशायां तु सुतरां तथेति स भक्तादिष्वेवोपयोगं करोति, न स्त्रीरूपादिष्विति भावः ।

**( १२४ ) तरुण्याः स्त्रियः उन्नतसप्तमैकभागे प्रम्लाने = शुष्के सति उष्णकाले गृह्यते भिक्षा, यतः सोष्णतया कालस्य चोष्णतया यावता कालेन असौ उन्नतप्रदेशः शोषमुपगतस्तावता कालेनेतरे निम्नप्रदेशाः सार्द्रा अपि अचित्ताः संजाताः, अतः कल्पते भिक्षाग्रहणम् । हेमन्तकाले तस्या एव तरुण्या द्वयोः सप्तमभागयोः शुष्कयोः सतोर्भिक्षाग्रहणं भवेदिति । तस्या एव तरुण्या वर्षाकाले त्रिषु सप्तभागेषु शुष्केषु सत्सु भिक्षाग्रहणं भवति । ( ओ.नि. ४९२ )**

**चन्द्र.** इयमत्र भावना - स्त्र्यादिहस्ते निम्नमुन्नतमनिम्नोन्नतं चेत्येवंप्रकारेण त्रयो विभागा भवन्ति । तत्र अङ्गुलिपर्वरेखा निम्नभागः, अङ्गुलिपर्वाणि उन्नतभागः, करतलं

अनिम्नोन्नतभाग इति । अयं च स्त्र्यादिहस्तः सप्तभागः विकल्प्यते । स्थापना 

तत्र सचित्तजलाद्रीभूतेऽपि तस्मिन् 'कस्मिन्काले कदा भिक्षा गृह्यते' इत्यादिप्रतिपादनपरं प्रकृतवचनं प्रायः सुगमम् । नवरं अबुधजनबोधाय स्पष्टमुच्यते ।

तरुणस्त्रियाः उन्नतसप्तमैकभागे शुष्के सति ग्रीष्मे भिक्षा गृह्यते

तरुणस्त्रियाः द्वयोः सप्तभागयोः शुष्कयोः सत्योः हेमन्ते भिक्षा गृह्यते

तरुणस्त्रियाः त्रिषु सप्तभागेषु शुष्केषु सत्सु वर्षायां भिक्षा गृह्यते

मध्यमस्त्रियाः द्वयोः सप्तभागयोः शुष्कयोः सत्योः ग्रीष्मे भिक्षा गृह्यते

मध्यमस्त्रियाः त्रिषु सप्तभागेषु शुष्केषु सत्सु हेमन्ते भिक्षा गृह्यते

मध्यमस्त्रियाः चतुर्षु सप्तभागेषु शुष्केषु सत्सु वर्षायां भिक्षा गृह्यते

स्थविरस्त्रियाः त्रिषु सप्तभागेषु शुष्केषु सत्सु ग्रीष्मे भिक्षा गृह्यते

स्थविरस्त्रियाः चतुर्षु सप्तभागेषु शुष्केषु सत्सु हेमन्ते भिक्षा गृह्यते

स्थविरस्त्रियाः पञ्चसु सप्तभागेषु शुष्केषु सत्सु वर्षायां भिक्षा गृह्यते ।

*एवं तावत् त्रिविधां स्त्रियमाश्रित्योक्तम्* । एवमेव पुरुषमपि त्रिविधमाश्रित्य वक्तव्यम् । नवरं तत्र तरुणपुरुषे भागद्वयादारभ्य भागचतुष्कं यावत्, मध्यमपुरुषे भागत्रयादारभ्य भागपञ्चकं यावत् स्थविरपुरुषे च भागचतुष्कादारभ्य भागषट्कं यावत् वक्तव्यम् ।

एवमेव नपुंसकेऽपि त्रिविधे वक्तव्यम् । नवरं तत्र तरुणनपुंसके भागत्रयादारभ्य भागपञ्चकं यावत्, मध्यमनपुंसके भागचतुष्कादारभ्य भागषट्कं यावत् स्थविरनपुंसके च भागपञ्चकादारभ्य भागसप्तमं यावत् वक्तव्यम् ।

अत्र प्रकृतविभागकारणं तु इदम् ।

स्त्रीशरीरं सोष्म भवति, पुरुषशरीरं न सोष्म न शीतमपि तु मध्यमम्, नपुंसकशरीरं तु शीतम् । यथायथा शरीरस्योष्णत्वमधिकं, तथा तथा तल्लग्नस्य सचित्तजलस्याचित्तत्वं शीघ्रमेव भवतीति न्यायोऽपि उपयुज्यते । एवमेव ग्रीष्मकालः सोष्मकालः, हेमन्तकालः मध्यमः, वर्षाकालश्च शीतकाल इति यथायोग्यं विभावनीयम् ।

**नन्वेवं** सामान्यशरीरे संलग्नमपि उदकमल्पकालेनैवाचित्तीभवति, तर्हि शरीरादधिकोष्णे जले कदाचित्सचित्तजलं निपतेत्, तदपि किं न भवति अचित्तं ? इत्थं च वर्षाकाले कदाचिदुष्णजले वर्षाबिन्दवो निपतेयुः, तथाऽपि स्वल्पकालेनैव तेषामचित्तीभवनात् न तत्सकलं जलं परिष्ठापनीयमपि तु स्वल्पकालानन्तरं उपयोज्यमिति **चेत्**

न, यद्यपि भवदुक्तरीत्या प्रकृतपाठानुसारेण च उष्णोदकपतितं सचित्तं जलं अचित्तं भवतीति सम्भवति । तथाऽपि अनवस्थादिभयात्तद्व्यवहारो न क्रियते प्रायशः,

कथमनवस्थेति **चेत्** इत्थम् । हस्तगतं जलं तु नियतपरिमाणमल्पपरिमाणं च, न हि उन्नतभागे शुष्के सति निम्नभागगतजलं कदाचिदल्पं कदाचिदधिकमिति अनैयत्यं तत्र सम्भवति । न वा तत्र बहुपरिमाणं सम्भवति । ततश्च तत्र न दोषः अनवस्थादिकः । उष्णजले पतितं तु सचित्तजलं कदाचिदल्पतमं कदाचिदल्पतरं कदाचिदल्पं कदाचिद् बहु कदाचिद् बहुतरं कदाचिच्च बहुतममित्यनेकविधं सम्भवति । ततश्चाल्पतमजलस्योष्णोदके अचित्तत्वसम्भवेऽपि अल्पतरादीनां तदसम्भवोऽपि सम्भवति । परन्तु यदि अल्पतमे अचित्तत्वव्यवहारः प्रारभेत, तर्हि परिमाणाज्ञानादि-वशतोऽल्पतरादिष्वपि क्रमशः स व्यवहारो भवन्वारयितुं दुःशकः सञ्जायेत ।

किञ्च उदकौष्ण्यमपि नैकविधमिति औष्ण्यभेदानुसारेणाचित्तीभवनकालभेदोऽपि सुतरां भवेदेव । एतच्च सर्वं व्यवहारे समवतारयितुं दुःशकं, प्रमादनिष्ठुरतादिदोषजनकं चेति उत्सर्गतोऽधुना उष्णजले पतितं सचित्तजलं न अचित्तीभूतं व्यवह्रीयमाणं दृश्यते । अपवादतस्तु संविग्नगीतार्थाः तत्तदवस्थाद्यौचित्येन निर्णयं कुर्वन्त्येवेति न तत्र विवादः ।

**(१२५) भरहेरवयविदेहे पन्नरसवि कम्मभूमिगा साहू ।**
**एक्कंमि हीलियंमी सव्वे ते हीलिया हुंति ।**
**भरहेरवयविदेहे पन्नरसवि कम्मभूमिगा साहू । एक्कंमि पूइयंमि सव्वे ते पूइया हुंति ।**
**अह को पुणाइ नियमो एक्कंमि वमाणियंमि ते सव्वे ।**
**होंति अवमन्निया पूइए य संपूइया सव्वे ।**
**नाणं व दंसणं वा तवो य तह संजमो य साहुगुणा ।**
**एक्के सव्वेसु वि हीलिएसु ते हीलिया होंति ।**
**एमेव पुइयंमि वि एक्कंमि वि पूइया जइगुणा उ ।**

थोवं बहुनिवेसं इइ नच्चा पूयए मइमं ॥

अत्राह परः - अथ कः पुनरयं नियमः ? यदेकस्मिन्नवमानिते सति सर्व एवापमानिता भवन्ति, तथैकस्मिन् पूजिते सर्व एव संपूजिता भवन्ति, न चैकस्मिन्संपूजिते सर्वे संपूजिता भवन्ति, न हि यज्ञदत्ते भुक्ते देवदत्तो भुक्तो भवतीति ।

आचार्य आह - ज्ञानं दर्शनं च तपस्तथा संयमश्च एते साधुगुणा वर्तन्ते, एते च गुणा यथैकस्मिन्साधौ व्यवस्थिताः, एवं सर्वेष्वपि, एकरूपत्वात्तेषां, यतश्चैवमत एकस्मिन्साधौ हीलिते अपमानिते सर्वेषु वा साधुषु हीलितेषु ते = ज्ञानादयो गुणाः हीलिताः = अपमानिता भवन्ति । एवमेकस्मिन्पूजिते पूजिता यतिगुणाः सर्वे भवन्ति, यस्मादेवं तस्मात्स्तोकमेतद्भक्तपानादि बहुनिवेसं = बह्वायमित्यर्थः, निर्जराहेतुरिति, तस्मादेवं ज्ञात्वा पूजयेत्साधून्मतिमानिति ।

( ओ.नि. ५२७-२८-२९-३०-३१ )

**चन्द्र.** तथा च सुविहितानां हीलना कदापि न कर्त्तव्या, किन्तु भक्तपानादिभिस्तेषां यथाशक्ति वैयावृत्त्यं कार्यमित्युपदेशः ।

**ननु** एवं सति सुविहितहीलनाकर्तॄणां सर्वेषां प्रत्येकहीलनायामुत्कृष्टस्थितिरसादिबन्ध एव स्यात्, यतो हि सुविहितास्त्रिकालापेक्षयाऽनन्ताः, ततश्चैकस्यापि साधोः हीलनाऽर्थापत्त्याऽनन्तगुणा सञ्जाता, ततश्चैकसाधुहीलनाजन्यकर्मबन्धापेक्ष्याऽनन्तगुण एव कर्मबन्धः स्यात्, स च सर्वोत्कृष्टस्थित्यादिरूप एवेति प्रत्येकहीलनायामेकरूप एव बन्धो भवेत्, न च तारतम्येन । परन्तु एतत्तु अनिष्टमेव, मिथ्यादृगादीनां कर्मबन्धतारतम्यस्यावश्यम्भावात्, सुविहितहीलनायाश्च षष्ठगुणस्थानं यावदतिचारादिरूपतया सम्भवादिति मिथ्यादृगादिषष्ठगुणस्थानान्तानां सर्वेषां सुविहितहीलनायामपि कर्मबन्धतारतम्यावश्यम्भावात् "एकस्मिन्हीलिते सर्वे हीलिता भवन्ति" इत्यादि यदुक्तम्, तत्सर्वं न घटेतेति **चेत्**

न, आधाकर्मभक्षिणोऽनन्तसंसारित्वकथनवत् सम्भावनामात्रोपदर्शनपरत्वादस्य वचनस्य । साधुहीलनायां हि कृतायां क्वचित् परिणामतीव्रतया साधुतत्त्वं प्रत्याशातनभावोदयेन सर्वसाधुहीलनाजन्यकर्मबन्धः सम्भवति । तथा च सम्यक्त्वमालिन्यम् । वस्तुतस्तु नयापेक्षिकमिदं वचनम् । तथा हि "एकस्मिन् हीलिते पूजिते वा सर्वे हीलिता पूजिता वा भवन्ति" इत्येतद् वचनं व्यवहारनयापेक्षया, कर्मबन्धस्तु निश्चयनयापेक्षया, निश्चयश्च भावग्राहीति जीवाध्यवसायपेक्षयेति ।

अयं भावः यथा हि केनचिद् राष्ट्रध्वजे हीलिते सति 'सकलस्यापि राष्ट्रस्य हीलना तेन कृता' इति व्यवह्रीयते, एवमत्र एकस्मिन्साधौ हीलिते सकलसाधुहीलना व्यवह्रीयते इति प्रकृतवचनं व्यवहारनयापेक्षमेव । यदा तु तज्जन्यकर्मबन्धविचारणा क्रियते, तदा हीलनाकर्तुर्भाव एवापेक्षितव्यः, तत्तीव्रतायां कर्मबन्धाधिक्यात्, तन्मन्दतायान्तु कर्मबन्धाल्पत्वात् । तथा च मिथ्यादृगादीनां साधुहीलनायां अशुभपरिणामस्य तीव्रत्वात् अधिको बन्धः, सर्वविरतादीनां तु प्रमादादिरूपाशुभपरिणामस्य मन्दत्वात् अल्पो बन्ध इति न कश्चिद् विरोधः ।

**( १२६ ) वैयावच्चं निययं करेह उत्तमगुणे धरंताणं ।**
**सव्वं किल पडिवाइ, वेयावच्चं अपडिवाइ ।**
**पडिभग्गस्स मयस्स व नासइ चरणं सुयं अगुणणाए ।**
**न हु वेयावच्चचिय सुहोदयं नासए कम्मं ।।**
**लाभेण जोजयंतो जइणो लाभंतराइयं हणइ ।**
**कुणमाणो य समाहिं सव्वसमाहिं लहइ साहू ।।**

**वैयावृत्यं नियतं - सततं कुरुत, केषाम् ? उत्तमगुणान् धारयतां साधूनां कुरुत । शेषं सुगमम् ।**

**किञ्च-प्रतिभग्नस्य उन्निष्क्रान्तस्य मृतस्य वा नश्यति चरणं, श्रुतमगुणनया, न तु वैयावृत्यचितं - बद्धं शुभोदयं नश्यति कर्म ।**

किञ्च लाभेन-प्राप्त्या घृतादेः 'योजयन्' घृतादिलाभेन योजयन् कान् ? यतीन् लाभान्तरायं कर्म हन्ति । तथा पादप्रक्षालनादिना कुर्वन्समाधिं सर्वसमाधिं - मनसः स्वस्थतां वाचो माधुर्यादिकं कायस्य निरुपद्रवतां, एवं कुर्वंस्त्रिरूपमपि सर्वसमाधिं लभते ।

भरहो बाहुबलीवि य दसारकुलनंदणो य वसुदेवो ।
वेचावच्चाहरणा तम्हा पडितप्पह जईणं ।

सुगमा । नवरं पडितप्पह - वैयावृत्यं कुरुत । किञ्च-भवेद्वा न वा लाभः ? केषां प्रासुकानामा-हारोपध्यादीनां तथाऽपि तस्य वैयावृत्यार्थमभ्युद्यतस्य साधोर्विशुद्धपरिणामस्य लाभ एव निर्जरायाः, अवश्यं अलाभेऽपि सति निर्जरा भवति, यस्मादेवं तस्मात्कर्त्तव्यं वैयावृत्यम् । वेयावच्चे

अब्भुट्ठियस्य सद्धाए काउकामस्स ।
लाभो चेव तवस्सिस्स होइ अदीणमणसस्स ।

सुगमा । नवरं वैयावृत्ये अभ्युत्थितस्य - उद्यतस्य श्रद्धया कर्तुकामस्य लाभ एव । ( ओ.नि.५३३-५३८ )

**चन्द्र.** वैयावृत्यलाभवर्णनपरोऽयं सकलोऽपि ग्रन्थः सुगमः । अत्र च या निर्युक्तिगाथाः वृत्तौ 'सुगमा' पदेन सूचिताः ताः अस्माभिरत्र स्पष्टमेव गृहीताः, येनार्थावबोधः सुगमः स्यात् ।

यद्यप्येवं सुविहितमात्रस्य वैयावृत्ये महान्लाभः, तथाऽपि बालवृद्धग्लानतपस्वीप्राघुर्णकानां वैयावृत्ये तु अतिशायी लाभः, तेषां विशेषेण वैयावृत्यार्हत्वात् । इदमपि व्यवहारमतेन, निश्चयतस्तु पात्रम् यद् वा तद्वाऽस्तु, निर्जरादि फलं तु वैयावृत्यकराध्यवसायापेक्षयैव, अत एवाभव्यादिवैयावृत्यकरणे तथाविधभावोत्कर्षे केवलज्ञानावाप्तिः सुघटेति सूक्ष्ममीक्षणीयम् । तदुक्तं अष्टकप्रकरणे "**स विशुद्धः फलप्रदः**" इति । तत्र स 'आशयः' इति भावः ।

**ननु** 'वैयावृत्यमप्रतिपाति' इत्यत्रोक्तम् । परंतु "जे आसवा ते परिसवा, जे परिसवा ते आसवा" इत्याचाराङ्गवचनात् वैयावृत्यमपि केषाञ्चिदनन्तसंसारकारणं सम्भवति, ततश्च तत्र तस्याप्रतिपातित्वं कथं ? युक्तञ्चैतत् तीव्रभवाभिष्वङ्गाध्यवसाये-नाभव्या दुर्भव्याश्च वैयावृत्यं कुर्वन्तो लभ्यन्त एव, न च तेषां तदप्रतिपाति ।

किञ्चाप्रतिपातित्वं इति कोऽर्थः ? साक्षात्परम्परया वाऽवश्यं मोक्षसम्पादकत्वमिति **चेत्** तर्हि अभव्येषु वैयावृत्यपरेषु अव्याप्तिः, तद्वैयावृत्ये प्रकृताप्रतिपातित्वाभावात् । सद्गतिजनकत्वं **चेत्** तर्हि तदपि न निर्दोषम्, न हि वैयावृत्यकरा अवश्यं सद्गतिगामुका एवेति नियमः । वेयावृत्यजन्यशुभकर्मणोऽनैष्फल्यं **चेत्** तत्तु निकाचितस्यैव सम्भवि, अनिकाचितस्य तु वैयावृत्यजन्यशुभकर्मणो नैष्फल्यमपि सम्भवेदेव । किञ्च तपःप्रभृतिजन्यशुभकर्मणोऽपि अनया रीत्याऽनैष्फल्यं भवत्येवेति को विशेषः वैयावृत्ये, येन तस्याप्रतिपातित्वमितरेषां च सर्वेषामनुष्ठानानां प्रतिपातित्वमुद्घोष्यत इति ज्ञातुमीहे इति **चेत्**

**सत्यम्,** तथापि बाहुल्यापेक्षयैतदुक्तमिति न दोषः, यद्यपि वैयावृत्यस्यापि प्रतिपातोऽन्येषामपि च गुणानामप्रतिपातः सम्भवत्येव, तथाऽपि वैयावृत्ये नम्रता, उपालम्भादिसहिष्णुता, प्रमादानुपयोगादिना लेशतोऽपि क्षतौ सत्यां अवर्णवादः, स्वशरीरनिरपेक्षता परोपकारश्चेत्येवं गुणा यथा सम्भवन्ति, न तथाऽन्येषु अनुष्ठानेषु इति वैयावृत्त्यं प्रायोऽप्रतिपाति इत्युक्तम् । न तु सर्वथा तदप्रतिपातित्वमेवेति नियमः ।

किञ्च 'यस्य विवाहः, तस्य गीतयो गायन्ते, नान्येषां' इति न्यायादत्र वैयावृत्यं प्रकृतमिति तस्य गुणा गायन्ते, न चैतावन्मात्रेणान्येषां गुणानामपकर्ष इति यथानयमेतत्संयोज्यम् । तथा च दशकालिकवृत्तौ श्रीमद्धरिभद्रसूरिभिः "**भरहेणवि पुव्वभवे वेयावच्चं कयं सुविहियाणं । सो तस्स फलविवागेण आसी भरहाहिवो राया । भुंजित्तु भरहवासं सामण्णमणुत्तरं अणुचरित्ता अट्ठविहकम्ममुक्को भरहनरिंदो गओ सिद्धिं ।**" इत्युक्त्वा तत्रैव कियदन्तरे "**वैयावृत्यादिष्वपि देशोनैवोपसंहारः, गुणान्तररहितस्य भरतादेर्निश्चयेन तदकरणादिति भावनीयमिति**" इति प्रतिपादितम् ।

## ( १२७ ) शिक्षका अपि सागारिकत्वात्पृथग् भोज्यन्ते ( ओ.नि. ५४९ )

चन्द्र. शिक्षकाः सर्वविरतिसामायिकचारित्रवन्तो निरतिचारछेदोपस्थापनीय-चारित्ररहिताश्चेति । ते च महाव्रताभावात् सागारिका गण्यन्ते, ततश्च यथा साधवः सागारिकैः सह न भुञ्जन्ति, तथैव शिक्षकैः सह न भुञ्जन्ति । एतच्चाधुनाऽपि सर्वत्र सामाचार्यां दृश्यत एवेति ।

## ( १२८ ) गुरोरालोके भोक्तव्यम्, यदि पुनर्गुरोर्दर्शनपथे न भुङ्क्ते, ततः कदाचित्साधुः अतिप्रचुरं भक्षयेन्निःशङ्कः सन्, स च सव्याज ('सव्याधि' इति पाठान्तरं ) शरीरः कदाचिद्गुरोरदर्शन-पथेऽकारकं अपथ्यमपि भुञ्जीत निःशङ्कः सन्, कदाचिद्वा भिक्षामटताऽनेन स्निग्धद्रव्यं लब्धं भवेत्, तच्चानालोच्यैव भक्षयेदेकान्ते, मा भून्नामाचार्यो निवारयिष्यति । अतः एतेषां प्रचुरभक्षितादीनां दोषाणां ज्ञानार्थं गुरोः चक्षुर्दर्शनपथे भुञ्जीत, येन गुरुः समीपस्थं भुञ्जानं दृष्ट्वा प्रचुरं भक्षयन्तं निवारयति, तथाऽकारकं भक्षयन्तं निवारयति, तथा अणालोइअं चोरिअं खायंतं निवारयति, मा भूदवारणेऽपाटवजनिता दोषाः स्युः । ( ओ.नि.भा. २८० )

चन्द्र. गुरुनिश्रायां भोक्तव्यमिति अस्य सारः । शेषं स्पष्टम् ।

**( १२९ ) ज्ञानादिर्भावः, ज्ञानं दर्शनं चारित्रं च, एतज्ज्ञानादिभावत्रयमभुज्यमाने त्रुट्यति-व्युच्छिद्यते, अत एतेषां ज्ञानादीनां त्रुट्यतां अविच्छिन्नप्रवाहार्थं भुञ्जते, न वर्णार्थं भुज्यते न वर्णो मम गौरवं स्यादित्येवमर्थं, तथा बलं मम भूयादित्येवमर्थमपि न भुज्यते, रूपं मम भूयाद्, बुभुक्षया क्षीणो = क्षीणगण्डपार्श्वः सन् मांसोपचयेन पूरितगण्डपार्श्वो रूपवान् भविष्यामीति नैवमर्थं भुङ्क्ते, नापि विषयार्थं मैथुनाद्यासेवनार्थं भुङ्क्ते । ( ओ.नि.भा. २८० )**

**चन्द्र.** न हि साधव आहारसंज्ञापरवशीभूताः सन्तो भुङ्क्ते, परन्तु कर्मोदयजन्यबुभुक्षया संयमसाधनाविक्षेपपरिहाराय भुङ्क्ते, वर्णाद्यपेक्षया भोजने तु स्पष्ट एवातिचारादिदोषः । एतदेवात्र निगदितम् ।

**( १३० ) गुरोश्च सर्वैरेवोपकर्तुं शक्यते, न त्वेकेन, सूत्रार्थपरिहानेः । ( ओ.नि. ५५४ )**

**चन्द्र.** 'गोचरीमण्डली किमर्थं क्रियते ? किमर्थं साधवः पृथक्पृथगेव न भुञ्जन्ति ?' इत्यस्य समाधानार्थं कारणानि प्रतिपादयन्नेतदाह यदुत यदि गोचरीमण्डली न भवेत्, तर्हि गुर्वर्थं भक्तपानाद्यनयनं कः करिष्यति ? सर्वेषां स्वोचितभक्तपानाद्यानयने व्यापृतत्वात् । यदि च कोऽप्येक एव साधुः सकलं गुरुवैयावृत्यं कुर्यात्, तर्हि स तत्रैवानवरतं प्रवृत्तः सन् सूत्रमर्थं च न शक्नुयाद्ग्रहीतुम्, समयाभावात् । न चैतदिष्टम्, सूत्रार्थयोरत्यावश्यकत्वात् । तस्मात्तथा कर्त्तव्यं यथा सूत्रार्थव्याघातोऽपि न भवेत् गुरोर्वैयावृत्यमपि च भवेदिति । गोचरीमण्डल्यां तु

सत्यां सर्वे मीलित्वा भुञ्जन्तीति तत्र गुरुप्रायोग्यवस्तूनां लाभस्य सौलभ्यमिति गुरोर्वैयावृत्त्यं नैकस्मिन्नेव, अपि तु अनेकेषु विभक्तं भवतीति न भवति कस्यापि सूत्रार्थहानिः ।

**ननु** गुरुवैयावृत्यस्य सूत्रार्थस्वाध्यायस्य च मध्ये कस्याधिकमाहात्म्यं ? वयन्तु मन्यामहे यदुत गुरोरनन्तोपकारित्वात्तद्वैयावृत्यस्यैव प्राधान्यं, तदर्थं तु सूत्रार्थस्वाध्याय-हानावपि न दोषः, गुरुवैयावृत्यमात्रेणैव परमपदसम्भवात्, तदर्थमेव च सकलस्याप्यायासस्य क्रियमाणत्वादिति । अत एवोक्तं दशकालिके 'गुरुप्पसायाभिमुहो रमिज्जा' इति । गुरुप्रसादश्च गुरुवैयावृत्येनैव इति सूत्रार्थहानिं पुरस्कृत्य वैयावृत्यस्य सकलसाधुषु विभजनम्, एकस्यैव साधोः गुरुवैयावृत्यकरणस्य अनुचितत्वं यदत्र ज्ञाप्यते तन्मन्दमिति **चेत्**

न, यथास्थानमुभयोरपि प्राधान्यादेकस्यैव प्राधान्यस्वीकरणे स्याद्वादानभिज्ञता-पादनात् ।

तथाहि -'**गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि । तस्माद् गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यं**' इति हि प्रशमरतौ वाचकवरोमास्वातिवचनम् । अत्र हि 'यस्मात्कारणाच्छास्त्रारम्भाः गुर्वधीनाः सन्ति, तस्माद् हितार्थिना गुर्वाराधने तत्परता विधेया' इति ज्ञापितमस्ति । अनेनैतत्सिद्ध्यति यदुत 'आत्महितं शास्त्रारम्भाधीनम्, शास्त्रारम्भाश्च गुर्वधीनाः, तस्मात् हितार्थिनां गुर्वाराधनं श्रेयः'' इति । इत्थं च गुर्वाराधनं शास्त्रारम्भार्थमेवेति सिद्धं । एवं च यथा कृषिः धान्यार्थमेवेति यदि धान्यप्राप्तिर्न स्यात्, तर्हि कृषिर्निरर्थकैव, एवं गुर्वाराधनं शास्त्रारम्भार्थमेवेति यदि शास्त्रारम्भाः न स्युः ततश्च सूत्रार्थहानिः स्युः,

तर्हि वैयावृत्येण गुर्वाराधनं निरर्थकमेवेति ।

तथा च धान्यकारणतया कृषेः, कृष्येकमात्रप्रयोजनतया च धान्यस्योभययोरपि प्राधान्यम्, एवं शास्त्रारम्भकारणतया गुरुवैयावृत्यस्य गुरुवैयावृत्यैकमात्रप्रयोजनतया च शास्त्रारम्भाणामु-भयेषामपि प्राधान्यमिति उभयोर्हानिर्यथा न स्यात्, तथा प्रयतनीयमिति ।

षोडशकचरमश्लोकेनापि उभययोः प्राधान्यं ज्ञायते

तथाहि - ''**धर्मश्रवणे यत्नः सततं कार्यो बहुश्रुतसमीपे । हितकाङ्क्षिभिर्नृसिंहैः वचनं ननु हारिभद्रमिदम्**'' इति । अत्र 'धर्मश्रवणे सततं यत्न कार्यः' इति पदैः सूत्रार्थयोः प्राधान्यम्, बहुश्रुतसमीपे इत्यनेन च गुरोः तद्वैयावृत्यस्य च प्राधान्यं प्रतिपादितम् । न ह्युचितवैयावृत्यं विना गुरवो धर्मं श्रावयतीति ।

यत्तु 'गुरुप्पसायाभिमुहो रमिज्जा' इत्युक्तम् । तत्तु युक्तमेव, केवलं गुरुप्रसादः एकेनैव

साधुना क्रियमाणेन वैयावृत्येनैव भवतीति तु मिथ्या, संविग्नगीतार्था हि गुरवः यथौचित्यं क्रियमाणेन वैयावृत्येन, तपसा, सूत्रार्थोद्यमेन अन्यैश्चानेकैः गुणैः प्रसन्ना भवन्ति । न हि अनेकेषु साधुषु सत्सु गुरवो एकेनैव क्रियमाणं वैयावृत्यमिच्छन्ति, अपि तु विभक्तमेवेति । तथा चोत्सर्गतः यथौचित्यं गुरुवैयावृत्ये सूत्रार्थहानिपरिहारे चोभयत्र यतनीयम् । अपवादतस्तु अनेकसाध्वभावे एकेनैव साधुना गुरुवैयावृत्यं करणीयं सूत्रार्थौ गौणीकृत्य, विशिष्टसूत्रार्थप्राप्त्यवसरे च कालाल्पतायां गुरुमापृच्छ्य यतनीयम् । गुरोः प्रसन्नता यथा भवति, तथा कर्त्तव्यमिति रमणीयोऽयं पन्थाः मोक्षमार्गाराधनस्येति ।

**चन्द्र. ( १३१ ) भिक्षां तावत्साधवः पर्यटन्ति, यावत्पात्रकं चतुर्भिरङ्गुलैरूनमास्ते इति । ( ओ.नि. ५५६ )**

**चन्द्र.** यदि हि पात्रकं संपूर्णं भ्रियते, तर्हि परिगलनदोषो भारदोषः तज्जन्यश्रमदोषः इर्यासमितिविनाशदोषश्चेत्येवमनेके दोषा भवन्ति, तस्माच्चतुर्भि-रङ्गुलैरूनं भ्रियते, नाधिकमिति ।

**( १३२ ) आह-किं पुनः कारणं तद्द्रवगलनं क्रियते ? आचार्यपानार्थं अभावितसेहादिपानार्थं च गलनं क्रियते तथा पादधावनार्थम्, 'पोस'ति अधिष्ठानम्, तस्य प्रक्षालनार्थम्, तथा भवति च सुखेन विवेकः त्यागोऽतिरिक्तस्य तस्य पानकस्य, तथा सुखेन वाऽऽचमनं सागारिकस्याग्रतः क्रियते, एवमर्थं गलनं क्रियते इति । ( ओ.नि. ५५७ )**

**चन्द्र.** इदन्तु बोध्यम्, अधुना यथा उत्कालिकत्रयेणोष्णीभूतं अचित्तं पानकं गृह्यते, न तथा प्राचीनकाले, तदानीं तादृशजलवदन्येषामप्यचित्तजलानां ग्रहणात् ।

तदन्यजलग्रहणकारणन्तु तदानीं उत्कालिकत्रयवज्जलस्य गच्छोचितपरिमाणतया दुर्लभत्वात् । ततश्च गच्छावश्यकतापूरणार्थं निर्दोषाणामचितानामन्येषामपि जलानां ग्रहणमासीत् । अन्यानि च जलानि धान्यकचवरादियुक्तान्यपि भवन्तीति न तानि सर्वथा शुद्धानि, किन्तु किञ्चिन्मलिनानि, न च तादृशानि तानि आचार्याय दीयन्ते, अभक्तिप्रसङ्गात् । न च अभावितशैक्षेभ्यो दीयन्ते, संयमोद्वेगप्रसङ्गात् । न च तैः पादधावनमधिष्ठानप्रक्षालनं च क्रियते अनुचितत्वात्, प्रत्युत पादाधिष्ठानयोर्मा-लिन्यापादनात् । न च तानि अतिरिक्तानि सुखेन विविच्यन्ते ससिक्थत्वादिना जीवविराधनासम्भवात् । न च तैः सागारिकस्याग्रतः आचमनं क्रियते, शासनहीलनाप्रसङ्गात् ।

तस्मात् एतादृशकार्यार्थं शुद्धजलमावश्यकं, तदर्थं च तद्गलनमावश्यकमिति ।

**( १३३ ) एवं तावत्पात्रकर्णेनापि उदकमपवृत्य पानकगलनं क्रियते । अथ पुनस्तत्र कीटिकामर्कोटिकादयः प्लवमाना दृश्यन्ते, ततस्तत्र गलिते को विधिरित्यत आह मुइंगा-कीटिका मर्कोटकाश्च, तैः संसक्तं ज्ञात्वा गालयेत् वंशपिटकेन शकुनिगृहकेन वा गालयेत् तद् द्रवम् । ( ओ.नि. ५५८-५५९ )**

**चन्द्र. नन्व**धुना यथा शुद्धवस्त्रेण पानकगालनं क्रियते, तथाऽत्र किमिति न प्रतिपादितम् । किमिति वस्त्रापेक्षया दुर्लभेन वंशपिटकेन शकुनिगृहकेन वा गालनं प्रतिपादितं इति **चेत्**

अत्रायमस्माकं मनीषोन्मेषः । उत्सर्गतस्तावत् पात्रकर्णेनोदकमपवृत्य पानकगलनं करणीयं, न वस्त्रेण वंशपिटकादिना वा । यतो हि यदि वस्त्रेण पानकं गाल्यते, तर्हि पानकगलनार्थं अधिकं वस्त्रं परिग्राह्यं स्यादिति परिग्रहदोषः । तथा पानकगलनानन्तरं आर्द्रीभूतं तद् वस्त्रं शोषणाय आतपादिषु स्थापनीयम्, तत्र च वायुकायविराधना,

तथा यावत्तन्न शुष्येत, तावत्तत्परिपालनायां पलिमन्थदोषश्च स्यात् । तथा वस्त्रेण पानकगालनाय वस्त्रं पात्रके गर्तारूपं किञ्चिदुण्डं कर्त्तव्यम्, तदर्थं हस्तस्तत्र प्रक्षेपणीयः

ततश्च हस्तगतो मलस्तत्र लगति, तत्संपर्कवशाच्च पानके संमूर्च्छिमोत्पत्तिसम्भव:, तन्निवारणार्थं पानकेन हस्तधावने तु शरीरबकुशता, पानकपलिमन्थ:, अधिकपानकावश्यकतया च तदानयनायाऽधिकं पर्यटनं तज्जन्यश्रमादिदोषाश्च भवन्ति ।

तदेवमादिदोषभयाद् वस्त्रेन सुलभेनापि अत्र गालनं नोक्तमिति अनुमीयते । एतत्तु कीटिकादिरहितं कचवरादिमच्च पानकमाश्रित्योक्तम् । यदा तु त्रससम्पृक्तं तत्पानकम् भवति, तदाऽपि वंशपिटकेन शकुनिगृहकेन वा गालनमुक्तम् । यतो हि वंशपिटकादि: स्वयमेवोण्ड: भवति, तथा स पानकं न आत्मसात्करोति, ततश्च केवलं त्रसजीवा एव तत्र लगन्ति, वस्त्रं तु स्वयमपि आर्द्रं भवति, ततश्च तल्लग्नास्त्रसजीवा न झटिति पानकशस्त्रात्पृथग्भूता भवन्तीत्ययमधिको दोष: ।

तदेवमादि सञ्चिन्त्य ग्रन्थकृता वस्त्रेण गालनं न प्रतिपादितमपि तु त्रसाभावेऽपि पात्रकर्णेन, तत्सत्त्वे च छब्बकादिभिर्गालनं प्रतिपादितमित्यधिकं बहुश्रुता विदन्ति ।

**( १३४ ) चित्तं बालादीनां गृहीत्वा पृष्ट्वाऽऽचार्यं मण्डलीस्थविर: प्रविशति, किंविशिष्ट: ? इत्यत आह - जमलजणणीसरिच्छो निवेसई-उपविशति ( ?परिविशति ) मण्डलीस्थविर इति, स च मण्डलीस्थविरो गीतार्थो रत्नाधिकोऽलुब्धश्च भवति । अनेन च पदत्रयेणाष्टौ भङ्गा: सूचिता भवन्ति, तत्र तेषां मध्ये ये शुद्धा: अशुद्धाश्च तान् प्रदर्शयन्नाह । ( ओ.नि. ५६२ )**

**चन्द्र.** भोजनमण्डल्यां क: सकलसाधुभ्य: भोजनादि परिवेषयति ददातीति यावत्, एतत्प्रतिपादनार्थं प्रकृत: पाठ: स्पष्ट: । नवरमष्टौ भङ्गा एते ।

१. गीतार्थ: रत्नाधिको अलुब्ध:
२. गीतार्थ: रत्नाधिक: लुब्ध:
३. गीतार्थ: अरत्नाधिक: अलुब्ध:
४. गीतार्थ: अरत्नाधिक: लुब्ध:
५. अगीतार्थ: रत्नाधिक: अलुब्ध:
६. अगीतार्थ: रत्नाधिक: लुब्ध:
७. अगीतार्थ: अरत्नाधिक: अलुब्ध:
८. अगीतार्थ: अरत्नाधिक: लुब्ध:

तत्रोत्सर्गतः प्रथमभङ्गवर्ती अनुज्ञातः, अपवादतश्च तृतीयभङ्गवर्ती, न त्वन्ये, अगीतार्थतालुब्धताऽन्यतरदोषसत्त्वेन भोजनपरिवेषणानर्हत्वात् ।

स च प्रथमभङ्गवर्ती तृतीयभङ्गवर्ती वा कस्य साधोः किं प्रायोग्यं, किं वा प्रतिकूलमित्येतद् सर्वं उपयोगविषयं कृत्वा परिवेषयति भोजनम् । यमलजननीसादृश्यं च तस्येत्थं - यथा जननी स्वभावत एव लघौ गुरौ च पुत्रे समस्नेहा, तत्रापि यमले तु सुतरां समस्नेहा, पुत्रद्वयस्य समकमेव जननात् । एवं भोजनपरिवेषकः सर्वेष्वपि साधुषु बालेषु युवषु वृद्धेषु रत्नाधिकेषु अवमरात्निकेषु समरात्निकेषु गीतार्थेषु अगीतार्थेषु धर्मकथादिलब्धिसम्पन्नेषु तद्रहितेषु शोभनस्वभावेषु खग्गूडेषु परिणतेषु अपरिणतेषु अतिपरिणतेषु अन्येष्वपि चानेकप्रकारेषु साधुषु समानस्नेहो भवति, अन्यथा स्वयं गीतार्थतायामलोभतायां च सत्यामपि तत्तत्साधुरागद्वेषादिवशतो भोजनपरिवेषणेऽनुचित-प्रवृत्तिभावात् सकलगच्छः कलहविकथादिरतोऽपि स्यादिति ।

**ननु** परिवेषकस्य *गीतार्थताऽभावे को दोष इति* **चेत्** *बालादिमध्ये कस्य किमुचितं* अनुचितं वा ? कस्य किं दातव्यं किं न दातव्यमित्यादिज्ञानाभावादौचित्येन परिवेषणासम्भवात् ग्लानिवृद्धिसंक्लेशादिदोषा इति । एवं अलोभताऽभावे स्वयमेवासक्तचित्ततया स्वेष्टं सकलमपि स्वयमेव गृह्णीयादिति गच्छसाधूनामुचित-द्रव्याद्यप्राप्तेः शरीरहानेः तद्द्वारा शुभभावहानेश्च सम्भवादित्येवमादयो दोषाः स्वयं विचारणीयाः ।

तस्मात्स्थितमेतद् यदुत यमलजननीसदृशः परिवेषकः अवश्यं गीतार्थोऽलुब्धश्च भवितुमर्हति, स चोत्सर्गतो रत्नाधिकोऽपवादतश्चावमरात्निक इति ।

**( १३५ ) तत्र च साधूनां भुञ्जानानां एकैकस्य साधोः पार्श्वे मल्लकं भवति, तत्र श्लेष्म उद्गलयेत् -तस्मिन्मल्लके श्लेष्मनिष्ठीवनं कुर्वन्ति, तथा तत्र भुञ्जतः कदाचित्कण्टकोऽस्थिखण्डं वा भवति, स तत्र क्षिप्यते । अथ तु भुवि क्षिप्यते, अस्थिकण्टकादि, ततो वसतिर्लेपकृता-अनायुक्ता भवति, अतस्तत्परिहारार्थं मल्लकेषु क्षिप्यते । ( ओ.नि. ५६६ )**

**चन्द्र.** इदमुपलक्षणम्, पानकमध्याद् बिन्दुमात्रमपि भक्तमध्याच्च कणमात्रमपि यथा भुवौ न निपतेत्, तथा भृशं यतन्ते ते साधवः, अत एव योगोद्वहनेऽधुनाऽप्येतादृशो विधिर्दृश्यते ।

**ननु** कणमात्रपतने को दोष इति **चेत्** तत्किं वारत्रकमन्त्रीदृष्टान्तो न श्रुतः ?, यत्र साधुं प्रतिलाभयित्र्या बिन्दुमात्रपतने जाते सति क्रमशः युद्धमपि सञ्जातम् । यद्यपि तद्गृहे भिक्षाग्रहणवेलायां बिन्दुपतनेनाभूत्, तथाऽपि उपाश्रयेऽपि बिन्दुपतनात् जीवविराधनादयो दोषाः अनुमीयन्ते एव । न केवलमनुमीयन्तेऽपि तु पिपीलिकाद्यागमनं तद्विराधनादयश्च दोषाः प्रत्यक्षं दृश्यन्तेऽपि ।

किञ्च यदि पतितकणाद्यपनयनं न क्रियते, तदाऽनन्तरोक्तरीत्या हिंसादयो दोषाः, यदि च क्रियते तदा तत्र पानकोपयोगावश्यकत्वात् पानकहानिः, स्वाध्यायपलिमन्थश्च । तथाऽनवस्थया कणपतनरक्षणप्रयत्नोपेक्षारूपया क्रमशः बहवो दोषा सम्भवन्तीति अधुनाऽपि एतदनुभूयते कुत्रचिदिति भोजनकाले बिन्दुकणमात्रपतनमपि महता यत्नेन संरक्षणीयं संयममग्नेन संयमिनेति ।

**( १३६ ) निद्धमहुराणि पुव्वं पित्ताईपसमणट्ठया भुंजे ।**

**बुद्धिबलवड्ढणट्ठा दुक्खं खु विकिंचिउं निद्धं**

**किमर्थं स्निग्धमधुराणि पूर्वं भक्ष्यन्ते ? यतो बुद्धेर्बलस्य च वर्द्धनं भवति, तथा चाह - घृतेन वर्धते मेध इत्यादि, बलवर्धनं च प्रसिद्धमेव, बलेन च वृद्धेन वैयावृत्यादि शक्यते कर्तुम्, दुःखं परिस्थापयितुं स्निग्धं धृतादि भवति, यतोऽसंयमो भवतीति । ( ओ.नि. भा. २८४ )**

**चन्द्र.** स्पष्टम् । नवरं स्निग्धं घृतादि, मधुरं शर्करादि । पयःपाकादि तूभयस्वरूपम् । तच्च यदि प्रथमं भुज्यते तर्हि बलादिवर्धनं भवति, न पश्चाद्भोजने । तथा यदि तत्प्रथमं भुज्यते, तदा यदि कदाचित् भोजनमतिरिक्तं स्यात्, तदापि तत् अन्तप्रान्तं स्यात्, तच्च परिस्थापयितुं

सुकरम्, विराधनाऽसम्भवात् अल्पत्वात् यदि तु स्निग्धमधुरादि पश्चाद् भुज्यते, अन्तप्रान्तादि च पूर्वं तदा यदि भोजनमतिरिच्येत, तर्हि तत् स्निग्धमधुराद्येव, तत्परिष्ठापने च प्रायो बह्वी विराधना भवेदेवेति कारणद्वयापेक्षमेतत् स्निग्धमधुरस्य पूर्व भोजनमिति ।

**(१३७) उद्गमशुद्धं उत्पादनाशुद्धं एषणादोषवर्जितं 'साधारणं' सामान्यं गुडादि अजानानः अतिमात्रम् दुष्टेन भावेन आददानः योऽसौ पतद्ग्रहो भ्रमति तस्मात्, साधुः असारकः - अप्रधानः, ज्ञानदर्शनचारित्राण्यङ्गीकृत्यासारः स भवति तथोद्गमोत्पादना-शुद्धमेषणादोषवर्जितं साधारणमेतद् द्रव्यमित्येवं जानानोऽदुष्टेनान्तरात्मना कवलं गुडादेराददानःसाधुर्भवति ससारः ज्ञानदर्शनचारित्रसारवान् भवति । कथं पुनरसारः साधुर्भवति ? अत अह-उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं साधारणमेतद्गुडादीत्येवम-जानानो दुष्टेन भावेनाददानः साधुः स्तेयं करोति, ततोऽसारोऽसौ । स कथं पुन ससारो भवति ? उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं 'साधारणं' तुल्यमेतत्सर्वेषां गुडादीत्येवं जानानोऽदुष्टान्तरात्मा स्वल्पमाददानः साधुर्निर्जरां करोति अतः ससारो ज्ञानदर्शनचारित्रैरिति । (ओ.नि. ५६८-५७१)**

**चन्द्र.** स्पष्टम्, नवरं साधर्मिकवात्सल्यगुणविकासकरणैकदक्षेन भवितव्यं संयमिनेति अस्य सार इति।

**( १३८ ) नास्ति क्षुत्सदृशा वेदनाऽतो भुञ्जीत तत्प्रशमनार्थं, बुभुक्षितो वैयावृत्यं कर्तुं न शक्नोति अतो भुङ्क्ते, इर्यापथिकां बुभुक्षितो न शोधयति यतोऽतो भुङ्क्ते । 'थामो वा' प्राणः, तस्य परिहानिर्भवति यदि न भुङ्क्ते, अतस्तदर्थं भुञ्जीत । तथा गुणनं पूर्वपठितस्य अनुप्रेक्षा-चिन्तनं ग्रन्थार्थयोः, एतदसौ कर्तुमसमर्थः सन् भुङ्क्ते । ( ओ.नि.भा. २९०-२९१ )**

**चन्द्र.** स्पष्टम् । नवरमत्र 'किमर्थं भोजनं कर्त्तव्यं साधुना' इति भोजनकरणाय प्रयोजकानि षट्कारणानि प्रतिपादितानि । भोजनस्य कारणिकत्वात् अपवादत्वमूहनीयम् ।

तथा अत्र ग्रन्थार्थयोश्चिन्तनमनुप्रेक्षा निगदिता, तथा च न केवलं अर्थस्यैवानुप्रेक्षाऽपि तु सूत्रस्याऽप्यनुप्रेक्षा भवतीति ज्ञेयम् ।

तर्हि पुनरावर्तनानुप्रेक्षयोः को भेदः, अस्माकन्तु इदं मतं यदुत पठितसूत्रस्य पुनरनुस्मरणं पुनरावर्तनम्, पठितार्थस्य च तत् अनुप्रेक्षेति **चेत्**

न, सूत्रस्यार्थस्य वा उच्चारणपूर्वकं पुनःस्मरणं पुनरावर्तनम्, तदेव केवलमनसा क्रियमाणमनुप्रेक्षा । न चैतत्स्वमनीषिकामात्रम्, दशकालिकवृत्तौ तथैवोक्तत्वात् । तथा च तत्पाठः - **परिअट्टणा नाम परिअट्टणंति वा अब्भस्सणंति वा गुणणंति एगट्ठा, अणुप्पेहा नाम जो मणसा परिअट्टेइ णो वायाए** । इति ।

**( १३९ ) आतङ्के - ज्वरादिः, आदिग्रहणादन्यो व्याधिर्यत्र भोजनं न पथ्यम्, तदर्थं न भुङ्क्ते । राज्ञा राजकुलधारणादिरूपो यद्युपसर्गः कृतः, स्वजनो यदि उन्निष्क्रमणार्थमुपसर्गं करोति, ततो न भुङ्क्ते । ब्रह्मव्रतपालनार्थं न भुङ्क्ते, यतो बुभुक्षितस्योन्मादो न भवति । तथा प्राणदयार्थं न भुङ्क्ते, यदि वर्षति, महिका वा निपतति । तपोऽर्थं न भुङ्क्ते, तच्च चतुर्थादि यावत्षण्मासाः तावत्तपो भवति, तदर्थं न भुङ्क्ते । षष्ठं शरीरस्य व्यवच्छेदार्थमनाहारः साधुर्भवति । एभिः पूर्वोक्तैः षड्भिः स्थानैरनाहारो यो भवति, स धर्मं नातिक्रामति भिक्षुरतो ध्यानयोगरतेन भवितव्यमिति । ( ओ.नि.५८३ )**

**चन्द्र.** 'आहारत्यागः किमर्थं कर्त्तव्य' इत्येतत्प्रतिपादकं प्रकृतवचनं स्पष्टमेव ।

**ननु** एवं आहारवत् आहारत्यागस्यापि कारणिकत्वादापवादिकत्वमेव प्राप्तम् । तथा च आहारोऽपि अपवादः, तत्त्यागश्चाप्यपवाद इति विचित्रमेतत् । द्वयोर्विपरीताचार-योरुत्सर्गापवादनियतत्वात् इति **चेत्**

न, आहारो न कर्त्तव्य इत्युत्सर्गः, कारणषट्कमध्यादन्यतरकारणसत्त्वे आहारः कर्त्तव्य इत्यपवादः, अपवादकारणसत्त्वेऽपि आहारत्यागप्रयोजककारणान्तरपुष्टत्वे सति आहारत्यागः कर्त्तव्य इति अपवादप्रतिबन्धकोऽयमुत्सर्ग एव । तथा हि एकत्र बुभुक्षारूपं आहारकारणमुपस्थितम्, तत्रैव च पर्जन्यमहिकादिरूपं आहारत्यागकारणमुपस्थितम्, तत्र आर्तध्यानाद्यधिकदोषाभावे सति अपवादं परित्यज्याहारत्यागात्मक उत्सर्ग एव आदरणीयः, आर्तध्यानाद्यधिकदोषभावे तु यतनयाऽपवाद इति । एवमन्यकारणेष्वपि बोध्यम् ।

न चैतदागमाननुपाति, आगमे उत्सर्गसूत्रापवादसूत्रोत्सर्गोत्सर्गसूत्रापवादापवाद-सूत्रोत्सर्गापवादसूत्रापवादोत्सर्गसूत्राणि प्रतिपादितानि, तत्रेदमपवादोत्सर्गार्थकं भविष्यतीति न काञ्चिद् बाधां पश्यामो वयमिति । किञ्च न 'यत् कारणिकं तदपवादः' इति व्याप्तिः, किन्तु सामान्यविधिरुत्सर्गः, विशेषविधिस्त्वपवाद इत्यत्र बहु वक्तव्यम्, तत्तु नोच्यते विस्तरभयात् ।

( १४० ) यदा तु पुनरुद्वरितं भक्तं भवति, तदा को विधिरित्यत आह -

भवेत् = स्यात् कदाचिदुद्वरितम्, तत्र साधूनां मध्ये

कदाचित्केचिदाचाम्लादयो भवन्ति, आदिग्रहणादभक्तार्थिको वा कश्चिद्भवेत्ततस्तदुद्वरितं भक्तं रत्नाधिक आचार्याय दर्शयति, पुनश्च प्रदर्शिते भक्ते गुरुणा च सन्दिष्टः उक्तः यदुत आह्वयाचाम्लादीन् साधून् येन तेभ्यो दीयते, पुनश्चासौ रत्नाधिकः सन्दिष्टः सन् चतुर्थादीन्साधून्व्याहरति ।

स च व्याहरन्नेतान्न व्याहरति, मोहचिकित्सार्थं य उपवासिकः स्थितस्तं न व्याहरति, तथा विकृष्टतपसं साधुं न व्याहरति, विकृष्टतपश्चाष्टमादारभ्य भवति, तस्य कदाचिद्देवता प्रातिहार्यं करोति अतस्तस्य न दीयते, ग्लानश्च ज्वरादिना तं च न व्याहरति, आत्मलब्धिकं च न व्याहरति ।

एतानन्तरोदितान् साधून् मुक्त्वा शेषान् गत्वा भणति यदुत आचार्या व्याहरन्ति युष्मान्, तेषां च मध्ये यश्चतुर्थादिक आकारितः, स आकर्ण्य किं करोति ? इत्याह - अनतिलङ्घयन् गुरोराज्ञामागत्य वन्दित्वा भणति तमाचार्यं यदुत संदिशत यूयं, आचार्योऽपि भणति - भुञ्जीत, सोऽपि भणति - 'जं सरति तत्तिअं भुञ्जामि' शेषं यदुद्वरितं तत्तस्यैव यस्य सत्कः प्रतिग्रहकः, पुनश्च स एव परिष्ठापयतीति । अथासौ साधुरेवं न भणति यदुत 'जं सरइ तत्तिअं' ततस्तस्य एवमभणतस्तस्यैव यच्छेषं भक्तमुद्वरीतं तद्भवति । स एव विवेचकः परिष्ठापक इत्यर्थः । ( ओ.नि. ५८८-५९१ )

**चन्द्र.** सर्वं स्पष्टमेव प्रायः, नवरं अनेनैतन्निश्चीयते यदुत उद्वरितभोजनमध्ये विकृतिप्रभृतिकमपि भवेत्, तदपि च आचाम्ले पारिष्ठापनिकाकारेण भोक्तुं कल्पते, तथा 'उद्वरितं भक्तं कस्य दातव्यं' इत्यत्राचार्याणामेवाधिकारः, न शेषाणामिति, तथाऽष्टमादितपसि

उद्धरितभोजनं न भोक्तुं कल्पत इति ।

**ननु** कुत्रचिद्गच्छे उद्धरितविकृतिकं आचाम्ले न दीयते, तत्किं युक्तं न वा ? इति **चेत्**

यद्यपि शास्त्ररीत्या आचाम्लेऽपि उद्धरितविकृतिकं दातुं कल्पते, तथाऽपि कुत्रचिद्गच्छे भवदुक्ता सामाचारी अस्ति **चेत्** तत्किं सा संविग्नगीतार्थप्रवर्तिताऽन्यथा वा ? यदि प्रथमा, तर्हि तद्गच्छीयैः पालनीयैव सा, संविग्नगीतार्थप्रवर्तितगच्छीयसामाचारीभङ्गे तद्गच्छीयानां महापातकसम्भवात्, यदि चासंविग्नगीतार्थप्रवर्तिता तर्हि उपेक्षणीया सा, तस्याः सामाचार्याभासरूपत्वात् ।

**( १४१ ) सा पुनः परिष्ठापनिका जाताऽजाता भवति । तत्र जाता ग्रहणकाल एव प्राणातिपातदोषेण युक्ता अथवा आधाकर्मादिदोषेण जाता उत्पन्ना । अजाता पुनः आधाकर्मादिदोषेण न दूषिता या साऽजातेत्युच्यते तत्र जातास्वरूपप्रतिपादनायाह मूलगुणैः-प्राणातिपातादिभिरशुद्धा, तथोत्तरगुणैश्च आधाकर्मादिभिरशुद्धा, तथा लोभातिरेकेण-लोभाभिप्रायेण साधुना गृहीता, साऽप्यशुद्धा लोभदोषदूषिता सती जातेत्युच्यते । तथाऽभियोगकृता, अभियोगो द्विविधः-वशीकरणचूर्णो मन्त्रश्च, तत्र सा भिक्षा कदाचित्संयोजिता भवति मन्त्राभिमन्त्रिता वा साऽप्यशुद्धा अतो जाता सा पारिष्ठापनिकेत्युच्यते । विषेण व्यामिश्रं भक्तं केनचिद् द्विष्टेन दत्तं भवति, तस्य या पारिष्ठापनिका सा जातापारिष्ठापनिकेति । ( ओ.नि. ५९५ )**

**चन्द्र.** अयं भावः, साधुना प्राणातिपातादिकं मूलगुणदोषं सेवित्वा गृहीता भिक्षा, आधाकर्मादिदोषान्विता भिक्षा, लोभपारवश्याद्गृहीता भिक्षा, वशीकरणचूर्णमिश्रिता भिक्षा मन्त्राभिमन्त्रिता भिक्षा, विषव्यामिश्रिता च भिक्षा जातापारिष्ठापनिका उच्यते । एषा च न साधुभिर्भक्षणीया यथासम्भवं संयमात्मप्रवचनविराधनासम्भवात्, किन्तु

वक्ष्यमाणविधिना परिष्ठापनीया ।

तत्र प्राणातिपातादिदोषदुष्टा भिक्षा लोकागमनरहितेऽचित्ते गुरूपदिष्टे स्थण्डिले परिष्ठापनीया, तत्रापि समे भूभागे, न तु गर्तादौ, यतो हि समे भूभागे परिष्ठापितां तां प्राघुर्णकादयः साधवः सुखेन पश्यन्ति, कारणे च तथाविधे सति ग्रहीतुं शक्नुवन्ति । तत्र च सा भिक्षा एकपुंजरूपतया परिष्ठाप्यते, येन प्राघुर्णकादयो जानन्ति यदुत "कैश्चित्साधुभिः परिष्ठापितेयं भिक्षा प्राणातिपातादिदोषदुष्टा, एकपुंजतया परिष्ठापितत्वाद्" इति । ततश्च ते तथाविधकारणे सति "एतादृशी भिक्षा ग्राह्या न वा" इति निर्णयन्ति । परिष्ठापनकाले च 'व्युत्सृष्टं व्युत्सृष्टं व्युत्सृष्टं' इति तिस्रो वाराः वदति । तच्च श्रावणं त्रिवाराः एतज्ज्ञापनार्थं करोति यदुत "मया मनसा वचसा कायेन चैतद्व्युत्सृष्टं" इति ।

लोभाधाकर्मादिदोषदुषिता भिक्षा पुञ्जद्वयरूपतया परिष्ठापनीया, येन प्रार्घुणकादयो जानन्ति यथा "लोभेनाधाकर्मादिना वा दुषितेयं भिक्षा" इति । शेषं पूर्ववत् ।

वशीकरणचूर्णमिश्रिता मन्त्राभिमन्त्रिता विषादिव्यामिश्रिता च भिक्षा अत्यर्थं क्षुत्पीडायामपि सत्यां नियमेन परिष्ठापनीया, सा चात्मवत्प्राघूर्णकादीनामपि अनुपयोगिन्येवेति सा न एकद्वयादि-पुञ्जरूपेण क्रियतेऽपि नु छारेण मिश्रीकृत्य परिष्ठाप्यते, येन कोऽप्येनां न भोक्तुं शक्नोतीति ।

या तु सकलदोषरहिता उद्धरिता भिक्षा साऽजाता पारिष्ठापनिकोच्यते । सा च साध्वालोके पुञ्जत्रयरूपेण परिष्ठाप्यते, यतोऽध्वाने निर्गता अन्ये साधवः कारणे समापतिते तां ग्रहीतुं शक्नुवन्ति, कदाचिद्वा परिष्ठापयितार एव साधवः कारणे उत्पन्ने गृह्णन्ति । त्रिपुञ्जकरणं तु "इयं भिक्षा सकलदोषवर्जिता, त्रिपुञ्जतया परिष्ठापितत्वात्" इति साधूनां ज्ञापनार्थम् ।

संविग्ना हि अकारणे न कदापि एनां परिष्ठापितां भिक्षां गृह्णन्ति, कारणे सति अजातां भिक्षां गृह्णन्ति, तदभावे द्विपुञ्जतया परिष्ठापितां आधाकर्मादिदोषदूषितां भिक्षां गृह्णन्ति, तदभावे एकपुञ्जतया परिष्ठापितां प्राणातिपातादिदोषदूषितां भिक्षां गृह्णन्ति । न तु छारेणावगुण्ड्य परिष्ठापितां वशीकरणचूर्णमन्त्रविषान्यतरदुष्टामिति ।

एषा च प्राचीना सामाचारी, अधुना तु सर्वाऽपि उद्धरिता भिक्षा क्षारादिभिः अवगुण्ड्यैव परिष्ठापनीया, न तु एकपुञ्जादिरूपतया । एतच्च श्रीयतिजीतकल्पे प्रतिपादितमिति तदनुसारेणास्माभिरप्युक्तमिति बोध्यम् ।

(१४२) केचनैवं भणन्ति - यद्यसावाचार्यस्तरुणो निरुपहतपञ्चेन्द्रियश्च, ततोऽसौ मण्डल्यामेव भुङ्क्ते सामान्यम्, अथ असहुः = असमर्थः, ततस्तस्य विष्वक् = पृथग्ग्रहणं प्रायोग्यस्य कर्त्तव्यम्, एवमेव प्राघूर्णकेऽपि विधिर्दृष्टव्यः, यदि प्राघूर्णकः समर्थस्ततो नैव तत्प्रायोग्यग्रहणं क्रियते, अथासमर्थस्ततः क्रियत इति ।

केचित्पुनरेवं भणन्ति - यदुत समर्थस्याप्याचार्यस्य प्रायोग्यग्रहणं कर्त्तव्यं, यत एते गुणा भवन्ति आचार्यस्य प्रायोग्यग्रहणे क्रियमाणे सूत्रार्थयोः स्थिरीकरणं कृतं भवति, यतो मनोज्ञाहारेण सूत्रार्थौ सुखेनैव चिन्तयति । अत आचार्यस्य प्रायोग्यग्रहणं कर्त्तव्यम्, तथा विनयश्चानेन प्रकारेण प्रदर्शितो भवति, गुरुपूजा च कृता भवति । सेहस्य चाचार्यं प्रति बहुमानः प्रदर्शितो भवति, अन्यथा सेह इदं चिन्तयति यदुत न कश्चिदत्र गुरुर्नापि लघुरिति, अतो विपरिणामो भवति, तथा प्रायोग्यदानकर्तुश्च श्रद्धावृद्धिः कृता भवति तथा बुद्धेर्बलस्य चाचार्यसत्कस्य वर्धनं भवति, तत्र च महती निर्जरा भवति । (ओ.नि. ६१०)

चन्द्र. स्पष्टम् । नवरमत्र प्रथमाभिप्रायापेक्षया द्वितीयाभिप्रायः श्रेयान्, तत्रैव च वृत्तिकृतोऽपि स्वारस्यमिति यथाशक्ति प्रयत्नेन गुरुवैयावृत्त्यं कार्यमिति ।

**( १४३ ) ग्लानस्य नियमेन प्रायोग्यग्रहणं कर्त्तव्यम् । यदि परं नानात्वं - प्रार्थितमपि तत्र ग्लाने भवति, ग्लानार्थं प्रायोग्यस्य प्रार्थनमपि क्रियते, ततश्चोभासितं = प्रार्थितं सद् ग्लानार्थं पुनश्च यदुद्धरति, ततस्तद् परित्यज्यते, शेषं यदनवभासिअं = अप्रार्थितमुद्धरितं तद्भुञ्जीत कश्चित्साधुरिति । ( ओ.नि. ६१४ )**

**चन्द्र.** अयं भावः । उत्सर्गतः घृतादिप्रायोग्यवस्तूनां प्रार्थनं प्रतिषिद्धं, "एते साधव उदरमात्रभरणैकचित्ताः निर्लज्जाश्च" इत्येवं शासनापभ्राजनादिदोषसम्भवात् । अत एव आचार्यादीनामपि प्रायोग्यं अप्रार्थितमेव ग्राह्यम्, न तु तत्प्रार्थनं कर्त्तव्यम् । परन्तु ग्लानार्थं प्रायोग्याप्रार्थने रोगवृद्ध्यादिबहुदोषाः सम्भवन्तीति तदर्थं अप्रार्थितालाभे प्रार्थनमपि अनुज्ञातम् । आचार्यस्तु समर्थोऽप्रार्थितप्रायोग्यालाभेऽपि न क्लाम्यति, समर्थत्वात् । तस्यापि ग्लानत्वे तु तदर्थमपि प्रार्थनमनुज्ञातमेव, ग्लानत्वेन प्रार्थितप्रायोग्ययोग्यत्वादिति ।

**ननु** ग्लानार्थं प्रार्थितं यद् उद्धरति, तत् किमर्थमन्यैः साधुभिः न भुज्यते, तस्य निर्दोषत्वात्, न हि तद्भक्षणे जीवविराधनादिदोषः कोऽप्यत्र सम्भवतीति **चेत्**

न, तृतीयव्रतविराधनाभयाद् ग्लानातिरिक्तसाधूनां ग्लानार्थं प्रार्थितस्य पश्चादुद्धरितस्य भोगो नानुज्ञात इति ।

कथमत्र तृतीयव्रतविराधनेति **चेत्** इत्थम्, ग्लानार्थं प्रार्थितं वस्तु दात्र्या ग्लानार्थमेव दीयते, ततश्चान्यसाधूनां तद् न दात्र्या दत्तम्, ततश्च तद्भोगे अदत्तादानदोषः स्फुटः । यदि च दात्र्याऽप्रार्थितमेव तद् दत्तं भवेत्, तर्हि सकलसाध्वर्थं तस्य दत्तत्वाद् ग्लानान्यसाधूनामपि तद्भोगे न दोष इति ।

अत एव → "यदि ग्लानार्थं ग्राह्यमाणमिदं उद्धरिष्यति, तर्हि अन्ये साधव इदं भोक्ष्यन्ति" इति निवेदनपूर्वकं तद् गृहीतं स्यात्, दात्र्या च तत्तथाऽनुमतं स्यात्, तदा प्रार्थितमपि उद्धरितं तद् अन्यसाधूनां कल्पत एव, अदत्तादानदोषपरिहारात् ← इति सूक्ष्मधिया विभावनीयम् ।

इदन्तु बोध्यम् । प्रायोग्यप्रार्थनं शासनापभ्राजनादिदोषप्रयोजकत्वात्प्रतिषिद्ध्यते, ततश्च यदि

कदाचित् अप्रार्थने तादृशदोषसम्भव उपस्थितो भवेत्, तर्हि तद्वारणाय प्रार्थनमपि युक्तम् ।

तथाहि – ओदनार्थं निर्गतः साधुः कुत्रचिद्गृहे प्रविष्टः, तत्र च दात्र्या ओदनं विनाऽन्यद्रव्याणि दातुं प्रदर्शितानि, स तु "किमन्यद् ? किमन्यद् ?" इत्येवमोदनार्थं पृष्टवानेवासीत् । दात्र्या चिन्तितं "नूनमस्य मीष्टान्नादिरभीप्सितः, स च नास्तीति मया न प्रदर्शितः" इति ।

इत्थं च "साधवो लम्पटाः" इत्याद्यशुभभावस्तस्याः स्यात्, सा च एनामेव वार्तां अन्यानपि कथयेदिति महतीयं श्रमणापभ्राजना । ततश्च तत्र प्रथमतः 'किमोदनमस्ति न वा' इति प्रार्थने न दोषः, ओदनस्याधुना सामान्यवस्तुत्वात्, सामान्यस्य च प्रार्थने प्रायो दोषाभावादिति अन्यदपि अत्र सूक्ष्ममुपयुज्य विज्ञेयम् ।

**(१४४) एवं स्वाध्यायादि कृत्वा पुनश्चतुर्भागावशेषायां चरमपौरुष्यां प्रतिक्रम्य कालस्य ततः स्थण्डिलानि प्रत्युपेक्षन्ते, किमर्थं ? उच्चारार्थं तथा प्रश्रवणार्थं च स्थानानि चतुर्विंशतिपरिमाणानि प्रत्युपेक्षन्ते । (ओ.नि. ६३३)**

**चन्द्र.** अयं चाचारः अधुना तथाविधसंयमानुकूलक्षेत्राभावात्प्रायः कुत्रापि न दृश्यते, तथापि सर्वत्र संयमिभिः सायंकाले या आघाडे आसन्ने उच्चारे....इत्याद्यालपकैः क्रिया क्रियते, सा क्रिया किंस्वरूपा ? तेषां चालापकानां कः परमार्थ इति अत्र प्रतिपाद्यते ।

तत्र प्रथममालापकाः लिख्यन्ते ।

१. आघाडे आसन्ने उच्चारे पासवणे अणहियासे
२. आघाडे आसन्ने पासवणे अणहियासे
३. आघाडे मज्झे उच्चारे पासवणे अणहियासे
४. आघाडे मज्झे पासवणे अणहियासे
५. आघाडे दूरे उच्चारे पासवणे अणहियासे
६. आघाडे दूरे पासवणे अणहियासे
७. आघाडे आसन्ने उच्चारे पासवणे अहियासे
८. आघाडे आसन्ने पासवणे अहियासे
९. आघाडे मज्झे उच्चारे पासवणे अहियासे
१०. आघाडे मज्झे पासवणे अहियासे
११. आघाडे दूरे उच्चारे पासवणे अहियासे
१२. आघाडे दूरे पासवणे अहियासे

एते द्वादशालापकाः 'आघाड'पदेन लब्धाः । एवमेव द्वादशालापका अनागाढपदेन लभ्यन्ते इति चतुर्विंशतय आलापका सञ्जाताः । एकैक आलापक एकैकस्य स्थण्डिलस्थानस्य निरूपकः इति भवन्ति चतुर्विंशतिपरिमाणानि स्थण्डिलस्थानानीति ।

अधुना भावार्थ उच्यते ।

तत्र प्राचीनकाले सामान्यत इयमुपाश्रयव्यवस्था आसीत्, यदुत उपाश्रयभूतं गृहं मध्ये, प्रायः सर्वासु दिक्षु त्रिद्व्यादिषु वा दिक्षु केवला भूमिः, ततःतदावरणभूतं कुड्यम्, कुड्यस्य बहिस्तात्पुनः केवला भूमिरिति । एवमुपाश्रयव्यवस्था सम्यक् मनसि धारणीया ।

अधुना 'आघाड'पदस्य व्याख्यानं क्रियते । 'आघाड' इति 'कुड्यस्यान्तर्वर्तिन्यां भूमौ' इत्यर्थः ।

अयं भावः अत्रोपाश्रये सकलगच्छेन मासादिकालं यावत्स्थातव्यम्, ततश्च प्रश्रवणादिकं यदि उपाश्रयासन्नभूमौ एव व्युज्सृज्येत, तर्हि दुर्गन्धादिभिरस्वाध्यायादि-दोषाः स्युः, ततश्च रात्रावपि बहिर्वर्तिन्यां भूमौ एव व्युत्सृजनीयम् । परन्तु यदि रात्रौ बहिर्भूमौ स्तेनसर्पश्वादिभयम्, लुण्टाकादिभयंवा, ततो बहिर्गन्तुं न पार्यते । तदेवमन्तर्भूमौ एव प्रश्रवणादिव्युत्सृजनप्रयोजककारणसद्भावः 'आघाड' इति पदेनोच्यते । ततश्च यत्र यत्रालापके आगाढपदम्, तत्र तत्र अन्तर्भूमिव्युत्सृजनमवसेयमिति ।

अन्तर्भूमिरपि त्रिभागा कल्पनीया, तत्र समीपवर्तिभागः 'आसन्न'पदेनोच्यते, मध्यमवर्तिभागः मध्यपदेनोच्यते । दुरवर्तिभागश्च दूरपदेनोच्यते ।

उच्चारो नाम मलः, वडीनीतिः, विष्टेति यावत् । स च यदा भवति, तदा सप्रश्रवण एव भवतीति न केवलस्योच्चारस्य सम्भव इति यत्र यत्रालापके उच्चारपदम्, तत्र तत्र प्रश्रवणपदमपि गृहीतमत्र । प्रश्रवणं नाम मूत्रम् ।

यदा तु उच्चारो न भवति, तदा केवलम् प्रश्रवणं सम्भवत्येवेति उच्चारपदरहिताः प्रश्रवणपदसहिताः आलापकाः सम्भवन्ति ।

तथाऽन्तर्भूमावपि यदि शक्यम्, तर्हि दूरभागे एव गन्तव्यम् । स च दूरभागः द्विभागरुपतया कल्पनीयः, आसन्नभागः दूरभागश्च । तत्र यदि उच्चारादिशङ्का तादृशी स्यात्, यया बाधितः साधुः दूरभागस्य दूरभागे गन्तुं शक्नुयात्, तर्हि 'अहियासे' पदमुच्यते । उच्चारादिशङ्का सोढुं शक्यत इति अस्यार्थः । परन्तु उच्चारादिशङ्का तादृशी स्यात्, यया बाधितः साधुः दूरभागस्य दूरभागे गन्तुं न शक्नुयात्, परन्तु दूरभागस्यासन्नभाग एव, ततश्च तत्र 'अणहियासे' पदमुच्यते । उच्चारादिशङ्का सोढुं अशक्येति भावः ।

यदि च दूरभागे गमनमशक्यम्, तर्हि मध्यभागे गन्तव्यम् । स चापि द्विभागरुपतया कल्प्यः, आसन्नभागः दूरभागश्च । तत्रापि सह्यशङ्कायां मध्यभागस्य दूरभागेऽसह्यशङ्कायां च मध्यभागस्यासन्नभागे गन्तव्यमिति ।

एवं यदि मध्यभागे गमनमशक्यम्, तर्हि आसन्नभागे गन्तव्यम्, स चापि द्विभागरुपतया कल्प्यः, आसन्नभागश्च दूरभागश्च । तत्रापि सह्यशङ्कायां आसन्नभागस्य दूरभागेऽसह्यशङ्कायां चासन्नभागस्यासन्नभागे गन्तव्यमिति ।

एतच्च सर्वं अन्तर्भूमौ बहिभूमौ चोभयत्रापि समवसेयम् ।

इत्थं च बहिर्भूमौ उच्चारप्रश्रवणस्थानानि षट्, दूरभागे द्वौ मध्यभागे द्वौ आसन्नभागे च द्वौ इति कृत्वा ।

अन्तर्भूमौ उच्चारप्रश्रवणस्थानानि षट्, दूरभागे द्वौ मध्यभागे द्वौ आसन्नभागे च द्वौ इति कृत्वा ।

एवमेव केवलप्रश्रवणस्थानान्यपि बहिर्भूमौ अन्तर्भूमौ च षट्षट् अवगन्तव्यानीति ।

तथा सकलबहिर्भूमिस्थानगमनासम्भव एवान्तर्वर्तिभूमिस्थानगमनमुचितमिति स्पष्टमवगन्तव्यम् ।

इदमत्र मतान्तरम् ।

अन्तभूर्मौ न आसन्न मध्य दूरश्चेत्येवं भागत्रयं कल्पनीयम्, न वा प्रत्येकभागे सह्यासह्यशङ्कानुसारेण भागद्वयं कल्पनीयम्, किन्तु अन्तर्भूमौ द्वौ भागौ कल्पनीयौ, आसन्नभागो दूरभागश्च, मध्यभागो न कल्पनीयः, तत्रासन्नभागे आसन्नमध्यदूरभेदैः भागत्रयम्, दूरभागे चासन्नमध्यदूरभेदैः भागत्रयं कल्पनीयम् । ततश्च सह्यशङ्कायां सत्यां दूरभागसम्बन्धिनि भागत्रये गन्तव्यम्, असह्यशङ्कायां सत्यां आसन्नभागसम्बन्धिनि भागत्रये गन्तव्यम् ।

**ननु** आसन्ने दूरे च भागत्रयकल्पनं किमर्थमिति **चेत्** श्वादिप्रतिबन्धेन कस्यचिद् भागस्य प्रतिबद्धत्वे सति अन्यभागपरिभोगः सम्भवेदित्येतदर्थमिति जानीहि ।

अयं भावः, दूरभागे यदि एकमेव योग्यं भूमिभागं पश्येत्, तर्हि रात्रौ कदाचित्तत्र श्वोपविष्टः स्यात्, कदाचिद्वा गौस्तत्रोपविष्टा भवेत् तदेवमादिकारणात् तत्रोच्चारादि कर्तुं न शक्येतेति, ततश्चान्यभूमिप्रत्युपेक्षणाकरणात्कुत्र स उच्चारादिकं व्युत्सृजेत् ? भागत्रयदर्शने चैकादिभागस्य प्रतिबद्धत्वेऽपि अन्यभागोपयोगसम्भवान्न काचिदापत्तिरिति एवमेव बहिर्भूमावपि दृष्टव्यमिति ।

अत्र प्रथममते अन्तर्भूमौ भागत्रयम्, प्रत्येकभागे च भागद्वयं प्रकल्पितम् । द्वितीयमते चान्तर्भूमौ भागद्वयम्, प्रत्येकभागे च भागत्रयं प्रकल्पितम् । तथा प्रथममते त्रिषु भागेषु सह्यासह्यशङ्काभ्यां द्वौ भागौ, द्वितीयमते च प्रथमं सह्यासह्यशङ्काभ्यां द्वौ भागौ, ततश्च द्वयोर्भागयोः श्वादिप्रतिबन्धापेक्षया त्रयो भागा इत्येवं तारतम्यमस्ति । बहिर्भूमावपि एवमेव भागत्रयं कल्प्यम् ।

**ननु** तर्हि मतद्वयमध्ये किं सत्यं किं वा नेति **चेत्** द्वितीयमतं सत्यमिति वृत्तिपाठादवसीयते, तथा हि → **इदानीं क्व ताः स्थण्डिलभूमयः प्रत्युपेक्षणीयाः इत्यत आह - अधिकासिका भूमयो याः सञ्ज्ञावेगेनापीडितः सुखेनैव गन्तुं शक्नोति, ता एवंविधाः अन्तः मध्येऽङ्गणस्य तिस्रः प्रत्युपेक्षणीयाः ? एका स्थण्डिलभूमिर्वसतेरासन्ना, मध्येऽन्या अन्या दूरे, एवमेतास्तिस्रः स्थण्डिलभूमयो भवन्ति, तथाऽन्यास्तिस्र एव तस्मिन्नेवाङ्गणे आसन्नतरे भवन्ति अनधिकासिकाः- सञ्ज्ञावेगोत्पीडितः सन् या याति ताः तिस्र एव भवन्ति, एका वसतेरासन्नतरे प्रदेशेऽन्या मध्येऽन्या दूरे, एवमेता अन्तः मध्येऽङ्गणस्य षड् भवन्ति** ← इति पाठः । अत्रान्तर्भूमौ भागद्वयं कल्पयित्वा प्रत्येकभागे भागत्रयमेव प्रदर्शितं दृश्यत इति द्वितीयमतस्यैव सत्यता प्रतीयत इत्यलमधिकेनेति ।

**( १४५ ) एवं सूर्यास्तमयानन्तरं यदि निर्व्याघातो गुरुः क्षणिक आस्ते, ततः सर्व एवावश्यं = प्रतिक्रमणं कुर्वन्ति, अथ श्राद्धधर्मकथादिना व्याघातो गुरोर्जातः अक्षणिकत्वं ततः पश्चाद्गुरुरावश्यकभूमौ सन्तिष्ठते । शेषास्तु साधवो यथाशक्त्याऽऽपृच्छ्य गुरुं स्वस्थाने स्वस्थाने यथारत्नाधिकतयाऽऽवश्यकभूमौ तिष्ठन्ति, किमर्थं ? 'सूत्रार्थक्षरणहेतोः' सूत्रार्थगुणनानिमितं तस्यामावश्यकभूमौ कायोत्सर्गेण तिष्ठन्ति । ( ओ.नि. ६३७ )**

**चन्द्र. ननु** गुरोः धर्मकथादिनाऽक्षणिकत्वे सति किमर्थं साधवः स्वयमेव प्रतिक्रमणं न कुर्वन्ति, किमर्थं च ते गुरुं प्रतीक्षन्ते, तदर्थं च कायोत्सर्गस्थास्तावत्कालं सूत्रार्थौ गुणयन्ति ?

इति **चेत्** प्रतिक्रमणं गुरुनिश्रायां कर्त्तव्यमिति विधिः, यतो हि प्रतिक्रमणे दैवसिकाद्यतिचारा आलोचनीयाः, तांश्च श्रोतुं तत्प्रायश्चित्तं च दातुं गुरुरर्हति, नान्ये, ततश्च गुरोरभावे आलोचनाप्रायश्चित्तप्रदानादिको व्यवहारः कथं सङ्घटेतेति साधूनां प्रतिक्रमणार्थं गुरुप्रतीक्षणं न्याय्यम् ।

एष प्राचीनो विधिः, वर्तमाने तु गुर्वाज्ञानुसारेण प्रवर्तनं न्याय्यमिति सङ्क्षेपः ।

## ( १४६ ) आयरियो अप्पणो अतिचारं द्विगुणं चिंतइ, किंनिमित्तं ? ते साहुणो बहुगं हिंडिया ततो तत्तिएण कालेण चिंतिउं न सक्कंति । ( ओ.नि. ६३७ )

**चन्द्र.** अयं भावः, साधूनां अधिकव्यापारवत्त्वादधिका अतिचाराः सम्भवन्ति, ततश्च प्रतिक्रमणेऽतिचारचिन्तनकाले तेषां प्रभूतकालेनातिचारचिन्तनं शक्यं भवति, गुरोश्चात्यल्पव्यापारत्वादतिचाराल्पता, तत अल्पेनैव कालेनातिचारचिन्तनं शक्येत कर्तुम्, ततश्च गुरोः साधूनां चातिचारचिन्तने कालभेदो भवेदेव, तन्निवारणार्थं गुरुणा अतिचारचिन्तनं वारद्वयं करणीयम्, येन तावत्कालेन साधूनामपि अतिचारचिन्तनं सम्पूर्णं स्यात्, ततश्च उभयेषां समानेन कालेनातिचारचिन्तनं संपूर्णं भवेदिति ।

**ननु** गुरोः साधूनां च प्रायः समानकालेनैवातिचारचिन्तनं संपूर्णं भवेदिति अस्य आग्रहः किमर्थः ? गुरुः एकवारमेवातिचारान् चिन्तयित्वा कायोत्सर्गं च पारयित्वा तिष्ठेत्, साधवश्च स्वातिचारान् चिन्तयित्वा कायोत्सर्गं पारयेयुः, ततश्च समकमेव प्रतिक्रमणं कुर्युरिति एवंकरणे न कोऽपि दोषो दृश्यतेऽस्माकमिति **चेत्**

न, गुरुं पारितकायोत्सर्गं ज्ञात्वा साधवोऽपि त्वरयन्ति, ततश्चातिचारचिन्तनं न सम्यग्भवति, तदभावे चारित्रशुद्ध्यभावः, तथा यदि साधवश्चिरेण पारयन्ति कायोत्सर्गम्, तर्हि तावत्कालं गुरुः किं कुर्यात् ? ततश्च गुरोरपि मनःस्थिरतार्थं द्विगुणं अतिचारचिन्तनं न्याय्यम् ।

अनेनैतद्ज्ञायते यदुत आवश्यकं कुर्वद्भिः सकलैरपि सामान्यतः समानकालं कायोत्सर्गः पारयितव्यः, न तु महतान्तरेणेति ।

**( १४७ ) एवमनेन क्रमेणावश्यकं कृत्वा परिसमाप्य जिनोपदिष्टं गुरूपदेशेन पुनश्च स्तुतित्रयं पठन्ति स्वरेण प्रवर्धमानमक्षरैर्वा । प्रथमा श्लोकेन स्तुतिर्द्वितीया बृहच्छन्दोजात्या बृहत्तरा, तृतीया बृहत्तमा एवं प्रवर्धमानाः स्तुतीः पठन्ति मङ्गलार्थमिति । ( ओ.नि. ६३९ )**

**चन्द्र.** तथा च 'नमोऽस्तु वर्धमानाय' इतिश्लोकः स्वल्पाक्षरः मन्दस्वरेण सर्वैः समकमुच्चारयितव्यः, येषां विकचार... इति तु द्वितीयश्लोकः अधिकाक्षरः मध्यमस्वरेण सर्वैः समकमुच्चारणीयः, कषायतापार्दित... इति च तृतीयश्लोकः सर्वाधिकाक्षरः उच्चस्वरेण सर्वैः समकमुच्चारणीयः, एतच्च सर्वं मङ्गलार्थं क्रियते इति ।

**ननु** अनेन पाठेन ज्ञायते यदुत प्रतिक्रमणं षडावश्यकपर्यन्तमेवासीत्, ततश्चाधुना स्तवनदैवसिकप्रायश्चित्तकायोत्सर्गस्वाध्यायदुःखक्षयकर्मक्षयनिमित्तककायोत्सर्ग-लघुशान्तिस्तवपर्यन्तविधिरुपा या सामाचारी दृश्यते, सा कथं प्रविष्टेति **चेत्**

संविग्नगीतार्थप्रवर्तितसामाचारीरुपा सा तत्तत्काले तथाविधकारणसमुत्पन्ना-ऽवश्यमादरणीया, सामाचारीभङ्गे महापातकप्रसङ्गादित्यलमधिकेन ।

**( १४८ ) प्रियः = इष्टो धर्मोऽस्येति प्रियधर्मा, तथा दृढः स्थिरो निश्चलो धर्मो यस्य स तथा, 'संविग्गो' मोक्षसुखाभिलाषी, अवद्यभीरुः पापभीरुः, खेदज्ञः = गीतार्थः तथा अभीरुः = सत्त्वसंपन्नः, एवंविधः कालग्रहणवेलां प्रत्युपेक्षते साधुः, एवंविधः कालवेलायाः प्रतिजागरणं करोति । ( ओ.नि. ६४८ )**

चन्द्र. कालिकश्रुतग्रहणं योगोद्वहनपूर्वकं कर्त्तव्यम्, तत्र च कालिकश्रुतग्रहणार्थं कालग्रहणविधिरवश्यं कर्त्तव्यो भवति, तं विना तद्ग्रहणस्य निषेधात्, तच्च कालग्रहणं कीदृशः साधुः करोतीति प्रतिपादनपरं सर्वमेतत्स्पष्टम् ।

**( १४९ ) इदानीं लक्षणयुक्तस्य ( पात्रकस्य ) फलदर्शनायाह संस्थिते पात्रके = वृत्तचतुरस्त्रे ध्रियमाणे लाभो भवति, प्रतिष्ठा गच्छे भवति, सुप्रतिष्ठिते - स्थिरे पात्रके, निर्व्रणे = नखक्षतादिरहिते कीर्तिरारोग्यं च भवति, वर्णाढ्ये ज्ञानसंपद्भवति ।**

**इदानीमपलक्षणयुक्तफलं प्रदर्शयन्नाह - हुण्डे - निम्नोन्नते चारित्रस्य भेदो भवति, विनाश इत्यर्थः, शबले = चित्तले चित्तविभ्रमः चित्तविप्लुतिर्भवति, दुप्पए = अधोभागाऽप्रतिष्ठिते प्रतिष्ठानरहिते तथा कीलकसंस्थाने कीलकवद् दीर्घमुच्चं गतम्, तस्मिंश्च एवंविधे गच्छे च चरणे चारित्रे वा न प्रतिष्ठानं भवति । पद्मोत्पले - हेट्ठे थामगागारे पात्रेऽकुशलं भवति, सव्रणे पात्रके सति व्रणो भवति पात्रकस्वामिनः, तथा अन्तः- अभ्यन्तरे बहिर्वा दग्धे सति मरणं तत्र निर्दिशेत् । ( ओ.नि. ६८६-६९१ )**

**चन्द्र.** अत्र यानि पात्रकस्य लक्षणान्यपलक्षणानि च निगदितानि, तानि सम्यगुपयुज्य बोध्यानि । तथा पात्रकस्यैतादृशशुभाशुभफलसाधकत्वं विषादिद्रव्यस्य जीवनाशकत्वमिव द्रव्यस्य तथाविधशक्तिमत्त्वसम्भवादेवादुष्टमिति । तथा च लक्षणयुक्तं पात्रकं ग्राह्यमितरन्नेति ।

**ननु** अधुना लक्षणयुक्तपात्रकाणि प्राय आधाकर्मदोषसमन्वितानि एव प्राप्यन्ते, तद्रहितानि तु पात्राणि प्रायोलक्षणरहितानि भवन्तीति किं कर्त्तव्यं ? किमाधाकर्मदुष्टाणि पात्रकाणि लक्षणयुक्तत्वेन ग्राह्याणि, किं वा लक्षणरहितानि पात्राणि आधाकर्मदोषरहितत्वेन ग्राह्याणीति **चेत्** यदि निर्दोषं लक्षणयुक्तं च पात्रं न लभ्येत, तर्हि लक्षणरहितमपि निर्दोषं पात्रं ग्राह्यम्, तस्याप्यभावे लक्षणसहितं सदोषं पात्रं ग्राह्यम् । यदि च सदोषं लक्षणसहितं च पात्रं पश्चाद् लक्षणरहितं भवेत्, तर्हि न तत्परिष्ठापनीयमपि तु परिभोक्तव्यमेव, अन्यथा द्वितीयस्य सदोषपात्रस्य ग्रहणे आधाकर्मादिसम्बन्धिजीवविराधनापापप्रसङ्गात् । यदि च निर्दोषापलक्षणसहित-पात्रकधारणे व्याध्यादयो महान्तो दोषाः स्युः, तर्हि तत्परिष्ठाप्य नूतनं सदोषं लक्षणयुक्तं च पात्रं ग्राह्यम्, आत्मविराधनायाः संयमविराधनासकाशाद् बलीयस्त्वादिति ।

**ननु** निर्दोषं लक्षणयुतं च पात्रमधुना यद्यपि सुलभमेव, तथापि तत् सामाचारीविरुद्धमस्ति यतो हि सामाचार्यां काष्ठादिनिर्मितान्येव पात्रकाणि अनुमतानि, प्रकृतानि च पात्रकाणि प्लास्टीकद्रव्यान्तरविनिर्मितानीति । ततश्चात्र किं कर्त्तव्यम्, किं गच्छीया सामाचारी बलीयसी, किं वा षट्कायविराधनापरित्यागो बलीयानिति **चेत्**

तत्तद्गच्छीयानां संयमिनां तत्तद्गच्छीयसंविग्नगीतार्था एवात्र प्रमाणमिति किमन्येनोक्तेन ।

( १५० ) यैः पटलैस्त्रिभिरेकीकृतैः सद्भिः सविता न दृश्यते तिरोहितः सन्, पञ्चभिः सप्तभिर्वा पटलैरेकीकृतैः सविता नोपलभ्यते इति, किमुक्तं भवति ? रवेः सम्बन्धिनो रश्मयोः नोपलभ्यन्ते, तादृशानि पटलानि भवन्ति, किंविशिष्टानि कदलीगर्भोपमानि क्षौमाणि श्लक्ष्णानि मसृणानि घनानि चेति । तत्र यदुक्तं त्रीणि पटलानि पञ्च सप्त वा पटलानि भवन्तीत्येतदेव कालभेदेन विशेषेण दर्शयन्नाह - ग्रीष्मे उष्णकाले त्रीणि पटलानि गृह्यन्ते, यानि, तानि दृढानि मसृणानि च भवन्ति उत्कृष्टानीत्यर्थः, शिशिरे च चत्वारि गृह्यन्ते घनानि मसृणानि च शोभनानि यदि भवन्ति, स हि मनाक् स्निग्धः कालः, पञ्च पटलानि वर्षासु गृह्यन्ते, यद्युत्कृष्टानि घनानि मसृणानि च भवन्ति, स हि अत्यन्तस्निग्धकालो यत उत्कृष्टान्येतानि उक्तलक्षणानि प्रधानान्येतानि । इत उर्ध्वं मध्यमानि न शोभनानि नाप्यशोभनानि वक्ष्ये इति । ग्रीष्मे उष्मकाले चत्वारि मध्यमानि पटलानि गृह्यन्ते, तानि मनाग् जीर्णानि, हेमन्ते पञ्च गृह्यन्ते मध्यमानि, वर्षासु षड् । एतानि 'मध्यमानि' न प्रधानानि नाप्यप्रधानानि, तत्र ग्रीष्मे पञ्च पटलानि जघन्यानि जीर्णप्रायाणि गृह्यन्ते, षट् पुनः हेमन्ते जघन्यानि जीर्णप्रायाणि, वर्षाकाले सप्त जघन्यानि संगृह्यन्ते जीर्णप्रायाणि । एवमुक्तेन प्रकारेण त्रिविधेऽपि कालपर्यन्ते अन्यानि चान्यानि च पात्रावरणानि स्थगनानि पटलानि भवन्ति । ( ओ.नि. ६९-७०१ )

चन्द्र. स्पष्टं सर्वम् । नवरं पटलानां जघन्यादिभेदेन त्रिविधत्वात् तत्स्वरुपानुसारेण तत्तत्काले तत्तत्संख्यानि पटलानि ग्राह्याणीति न विस्मरणीयम् । तानि च प्रत्येकं सार्धद्वयहस्तदीर्घाणि सार्धैकहस्तविस्तीर्णानि च भवन्ति । एतदपि अत्रैव ग्रन्थे प्रतिपादितमस्ति ।

**( १५१ ) कल्पाग्रहणे तृणग्रहणमग्निसेवनं च भवति, तन्निवारणार्थं कल्पग्रहणं क्रियते, तथा धर्मशुक्लध्यानार्थं कल्पग्रहणं भवति, एतदुक्तं भवति - शीतादिना बाध्यमानो धर्मशुक्ले ध्याने ध्यातुमसमर्थो भवति, यदि कल्पान्न गृह्णाति । अत एवमर्थं दृष्टं कल्पग्रहणम्, तथा ग्लानसंरक्षणार्थम्, मरणार्थं = मृतस्योपरि दीयते कल्पः एतदर्थं च कल्पग्रहणमिति । ( ओ.नि. ७०७ )**

**चन्द्र.** सुबोधं सर्वम्, नवरं कल्पाः त्रयः, द्वौ सौत्रिकौ एक उर्णामयः । शीतादितीव्रतायान्तु अधिका अपि ते गृह्यन्त अपवादतः ।

**( १५२ ) संपातिमसत्त्वरक्षणार्थं जल्पद्भिर्मुखे दीयते, तथा रजः-सचित्तपृथ्वीकायस्तत्प्रमार्जनार्थं मुखवस्त्रिका गृह्यते, तथा रेणुप्रमार्जनार्थं मुखवस्त्रिका-ग्रहणं प्रतिपादयन्ति पूर्वर्षयः । तथा नासिकामुखं बध्नाति तया मुखवस्त्रिकया वसतिं प्रमार्जयन्, येन न मुखादौ रजः प्रविशतीति । ( ओ.नि. ७१३ )**

**चन्द्र.** मुखवस्त्रिकाप्रयोजनप्रतिपादकोऽयं पाठः सुगमः ।

**( १५३ ) द्विगुणश्चतुर्गुणो वा कृतः सन् यथा हस्तप्रमाणश्चतुरस्त्रश्च भवति, तथा चोलपट्टकः कर्त्तव्यः, कस्यार्थमित्यत आह-'थेरजुवाणट्ठा' स्थविराणां यूनां चार्थाय कर्त्तव्यः । स्थविराणां द्विहस्तो यूनां च चतुर्हस्त इति भावना, यदि परमयं विशेषः, यदुत स्थविराणां श्लक्ष्णोऽसावेव चोलपट्टकः क्रियते यूनां पुनः स्थूल इति । ( ओ.नि. ७२२ )**

**चन्द्र.** एतदपि सर्वं स्पष्टम् । नवरं यथाकालौचित्यं चोलपट्टकप्रमाणपरिवर्तनमपि नान्याय्यमिति ।

तथाहि - पूर्वकाले नाभेरधस्ताच्चतुरङ्गुलं परित्यज्य जानोरुपरि च चतुरङ्गुलं परित्यज्य चोलपट्टकः अक्रियत, तदनुसारेण तत्प्रमाणं एकहस्तविस्तारात्मकमासीत्, अधुना तादृशप्रमाणवस्त्रपरिधाने-ऽनौचित्यदर्शनादधिकविस्तारमपि चोलपट्टकप्रमाणं न निषिध्यत इति ।

**( १५४ ) वर्षासु - वर्षाकाले औपग्रहिकः उपधिर्द्विगुणो भवति, कश्चासौ ? वर्षाकल्पादिः, आदिग्रहणात्पटलानि, जो बाहिरे हिंडतस्स तिम्मति सो सो दुगुणो होइ, एक्कोत्ति पुणो अन्नो घेप्पइ । स च वर्षाकल्पादिर्द्विगुणो भवति, आत्मरक्षणार्थं संयमरक्षणार्थं च, तत्रात्मसंरक्षणार्थम्, यद्येकगुणा एव कल्पादयो भवन्ति, ततश्च तेहिं तिन्नेहिं पोट्टसूलेणं मरति, संयमरक्खणत्थं जइ एक्कं चेव कप्पं अइमइलं ओढेऊणं नीहरइ तो तस्स कप्पस्स जं पाणियं पडइ, तिन्नस्स, तेणं आउक्काओ विणस्सइ, शेषस्त्ववधिरेकगुण एव भवति न द्विगुण इति । ( ओ.नि. ७२७ )**

**चन्द्र.** अयं भावः, कल्पत्रयादिरुप उपधिः वर्षाकाले भिक्षाटनादौ आर्द्रो भवति, ततश्च य उपधि वर्षाकाले आर्द्रो भवितुं शक्यः, स द्विगुणः धार्यते वर्षाकाले, संस्तारकादि उपधिश्च न वर्षाकालेऽपि आर्द्रो भवति, ततश्च स एकैकः धारणीयः ।

**( १५५ ) यच्चान्यद्वस्तु, एवमादि उपानहादि, तपःसंयमयोः साधकं यतिजनस्य ओघोपधेरतिरिक्तं गृहीतमौपग्रहीकं तद्विजानीहि । ( ओ.नि. ७३० )**

**चन्द्र.** य उपधि अवश्यं धारणीयः तदुपयोगकारणं भवतु मा वा, स ओघोपधिः, यश्च कारणे सति उपयोगार्थं गृह्यते स औपग्रहिकोपधिः । उपानहादि च दीर्घाध्वादिकारणे सति संयमादिरक्षार्थं गृह्यत इति तत् औपग्रहिकोपधिरिति ।

**ननु** उपानत्परिधाने बहवो दोषाः, तथाहि उपानत्परिधाने "अहमनुपानत्कसकाशादुच्च" इत्येवमहङ्कारो भवति, कण्टकादिभयविगलनाच्चेर्याया-मनुपयुक्तता भवति, ततश्च त्रसादिजीवोपमर्दः, गृहस्थैश्च समं तुल्यता भवति, यतो हि ते प्रायोऽवश्यं उपानत्परिधानं कुर्वन्त्येवेति । उपानत्परिकर्मकरणे च स्वाध्यायादि-पलिमन्थो भवति, शरीरबकुशता च स्यात् शरीररागेणैवोपानत्परिधानात् । सामाचारीभङ्गश्च भवति, अनुपानत्कविहारस्यैव साधुसामाचारीत्वादित्येवमादि-दोषकलापसम्भवान्न युक्तमुपानत्परिधानमिति **चेत्**

तत्किं उत्सर्गवदपवादोऽपि मार्ग इति जिनवचनतत्त्वं न जानासि ? उत्सर्गत उपानत्परिधानं न कर्त्तव्यमित्यत्र को निषिध्यति ? केवलं कारणे सति तदपरिधानेऽधिकदोषसम्भवात्तत्परिधानमपि अपवादतोऽदुष्टमित्येवात्रख्याप्यत इति को दोषः ?

कथं तदपरिधानेऽधिकदोषसम्भव इति **चेत्** इत्थं कण्टकाद्याकीर्णे मार्गे उपानत्परिधानं विना विहारो दुःशकः, धाष्ट्र्यमवलम्ब्य विहारकरणे तु कण्टकादिभिरात्मविराधना, कण्टकजन्यक्षतचिकित्सादिकरणे च संयमविराधना, "जैनसाधवः मिथ्याभिमानिनो मूर्खशिरोमणयश्च ये एवं कण्टकाकीर्णेऽपि मार्गे उपानत्परिधानमकृत्वैव विहरन्ति, पश्चाच्च दुःखिनो भवन्ति" इति जनवादाच्छासनविराधना च । किञ्च स्वाध्यायपरिहानिः, तथा

विहारशक्तिहानौ सत्यामनुचितेऽपि स्थाने स्थैर्यकरणावश्यकत्वात् तत्र च निर्दोषभक्तपानदौर्लभ्यात् आधाकर्मादिदोषध्रौव्यम् । तथा कदाचित्साधवः सार्थेन सह दीर्घामटवीमुल्लङ्घयन्ति, तत्र च यदि ते अनुपानत्का: व्रजेयु:, तर्हि कण्टकादिप्रतिबन्धाद् विलम्बिता: स्यु:, सार्थश्च शीघ्रं गच्छेत् । एवं सार्थस्फिटितास्ते साधवः अटव्यां आत्मविराधनादिदोषभाजो भवेयुरिति ।

तस्मादपवादपदे उपानत्परिधानमपि तपःसंयमसाधकं भवत्येवेति ।

उपानत्परिधानसम्बन्धिनी यतना तु ग्रन्थान्तरादवसेया ।

**( १५६ ) दुष्टाश्च ते पशवश्च, श्वानश्च श्वापदाश्च, तेषां संरक्षणार्थं यष्टिर्गृह्यते, तथा चिक्खल: सकर्दमः प्रदेश:, तथा विषमेषु रक्षणार्थम्, *तथोदकमध्येषु च रक्षणार्थं यष्टिग्रहणं क्रियते, तथा तपसः संयमस्य च* साधिका यष्टिर्भणितेति । कथं तपः- संयमसाधिका ? इत्यत आह मोक्षार्थं ज्ञानादीनि इष्यन्ते, ज्ञानादीनां चार्थाय तनुः-शरीरमिष्यते, तदर्था च यष्टिः शरीरार्थेत्यर्थः, शरीरं यतः यष्ट्याद्युपकरणेन प्रतिपाल्यते ।( ओ.नि. ७४१ )**

**चन्द्र.** शरीरमात्ररागप्रयोज्यं हि यष्ट्याद्युपकरणव्यापारणं कर्मबन्धकारि संसारजननं च, परन्तु मोक्षरागप्रयोज्यज्ञानादिरागप्रयोज्यशरीररागप्रयोज्यं तु तत् कर्मक्षयकारि परमपदप्रापकं चेति उपकरणस्योपकरणत्वं अधिकरणत्वं वाऽध्यवसायानुसारि, न तु स्वरुपत एवेति विवेकः, अत एव रजोहरणादिकमपि उपकरणं क्रोधादिना परमारणाय व्याप्रियमाणमधिकरणम्, असिपत्रादिकं चाधिकरणं गच्छरक्षाद्यर्थं व्याप्रियमाणमुपकरणमिति ।

## ( १५७ ) यदुपकरणं पात्रकादि उपकारे ज्ञानादीनामुपयुज्यते, तदेवोपकरणं तस्य साधोर्भवति, यत्पुनरतिरेकं-ज्ञानादीनामुपकारे न भवति तत्सर्वमधिकरणं भवति । ( ओ.नि. ७४२ )

**चन्द्र.** तथा च ज्ञानाद्युपकारित्वमुपकरणत्वं ज्ञानाद्यनुपकारित्वं चाधिकरणत्वमित्यनन्तरप्रतिपादित एवार्थ अत्र गृहीतः । तथा चोपकरणानामधिकरणानां चोपकरणत्वं अधिकरणत्वं च न स्वाभाविकं, परन्तु ज्ञानाद्युपकारापकारप्रयोजकत्वेनैव, ज्ञानाद्युपकारश्च द्रव्यक्षेत्रादीनाश्रित्येति ।

तथाहि - प्राचीनकाले साधूनां पुस्तकादिकं विनाऽपि ज्ञानादिवृद्धिसम्भवात् पुस्तकादिग्रहणे च संयमविराधनादिदोषबाहुल्यात् पुस्तकादिकं तानाश्रित्याधिकरण-मासीत् । अधुनातनानां साधूनां प्रज्ञादिमान्द्यात्पुस्तकादिकं विना ज्ञानादिवृद्ध्यसम्भवात् ज्ञानादिवृद्धिकरं पुस्तकादिकमल्पदोषसम्भवेऽप्युपकरणमिति ।

अत एव 'यत्प्राचीनं तदेव शोभनम्, यन्नूतनं तत्तुच्छं' इत्याग्रहोऽपि न श्रेयान्, प्राचीनस्य प्राचीनकाले शोभनत्वेऽप्यधुनाऽशोभनत्वसम्भवात्, नूतनस्य च प्राचीनकालेऽशोभनत्वेऽप्यधुना शोभनत्वसम्भवात् । एतच्च पुस्तकप्रतादिप्रकाशनाधाकर्मादिदोष-युतोपाश्रयनिवसनदण्डासनाद्युपधिग्रहणादिषु स्पष्टमेवानुभूयत इति केवलं प्राचीनताधर्ममात्रेणादरणं नूतनताधर्ममात्रेण च तिरस्करणं न जिनमतविदां प्रशंसार्हमिति सङ्क्षेपः ।

वस्तुतस्तु ज्ञानादिवृद्धिमपेक्ष्य गीतार्थेन शास्त्रीयया यतनया आसेव्यमानं प्राचीनं नूतनं वा वस्तु सर्वं जिनानुमतमेवेति तत्तिरस्करणे जिनानुमतितिरस्करणमवश्यम्भावीति भावसापेक्षद्रव्यादिपरायणैर्भवितव्यं मध्यस्थेन मतिमता ।

( १५७ ) अत्राह कश्चिद् बोटिकपक्षपाती यद्युपकरणसहिता अपि निर्ग्रन्था उच्यन्ते, तर्हि गृहस्था अपि निर्ग्रन्थाः, यतः तेऽप्युपकरणसहिता वर्तन्ते, अत्रोच्यते - नन्विदमुक्तमेव यदुताध्यात्मविशुद्ध्या सत्युपकरणे निर्ग्रन्थाः साधवः,

किञ्च यद्यध्यात्मविशुद्धिर्नेष्यते, ततः जीवनिकायैः = जीवसङ्घातैरयं लोकः संस्तृतो वर्तते, ततश्च जीवनिकायसंस्तृते व्याप्ते लोके कथं नग्नकश्चङ्क्रमन् वधको न भवति, यद्यध्यात्मविशुद्धिर्नेष्यते, तस्मादध्यात्मविशुद्ध्या देशितमहिंसत्वं जिनैस्त्रैलोक्यदर्शिभिरिति ।

क्व प्रदर्शितं तदित्यत आह - उत्पाटिते पादे सति = ईर्यासमितस्य साधोः सङ्क्रमार्थमुत्पाटिते पादे इत्यत्र सम्बन्धः, व्यापद्येत संघट्टनपरितापनैः, कः कुलिङ्गी कुत्सितानि लिङ्गानि इन्द्रियाणि यस्यासौ कुलिङ्गी द्वीन्द्रियादिः, स परिताप्येत उत्पाटिते पादे सति, म्रियते चासौ कुलिङ्गी, तं व्यापादनयोगं आसाद्य = प्राप्य न च तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः समये सिद्धान्ते, किं कारणं ? यतोऽनवद्योऽसौ साधुस्तेन 'व्यापादप्रयोगेण' = व्यापादनव्यापारेण कथं ?, 'सर्वभावेन' = सर्वात्मना मनोवाक्कायकर्मभिरनवद्योऽसौ यस्मात्तस्मान्न सूक्ष्मोऽपि बन्धस्तस्येति ।

( ओ.नि. ७४९-७५० )

चन्द्र. निश्चयनयसर्वस्वज्ञापिकेयं गाथावृत्तिः प्रायः सुगमा पुनः पुनश्चिन्तनीया ।

( १५८ ) जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।
सा होइ निज्जरफला अज्झत्थविसोहिजुत्तस्स ॥
परमरहस्समिसीणं समत्तगणिपिडगझरिअसाराणां ।
पारिणामियं पमाणं निच्छयमवलम्बमाणाणं ॥
निच्छयमवलंबंता निच्छयओ निच्छयं अयाणंता ।
नासंति चरणकरणं बाहिरकरणालसा केइ ॥

या विराधना यतमानस्य भवेत्, किंविशिष्टस्य सतः ? सूत्रविधिना समग्रस्य युक्तस्य गीतार्थस्येत्यर्थः, तस्यैवंविधस्य या विराधना, सा निर्जरफला भवति, एतदुक्तं भवति - एकस्मिन्समये बद्धं कर्मान्यस्मिन्समये क्षपयतीति, किंविशिष्टस्य - अध्यात्मविशोधियुक्तस्य = विशुद्धभावस्येत्यर्थः । किञ्च परमं - प्रधानमिदं रहस्यं - तत्त्वं केषां ऋषीणां - सुविहितानां ? किंविशिष्टानां ? समग्रं च तद् गणिपिटगं च, समग्रगणिपिटकं, तस्य क्षरितः - पतितः सारः प्राधान्यं यैस्ते,
समग्रगणिपिटकक्षरितसारास्तेषामिदं रहस्यम्, यदुत पारिणामिकं प्रमाणं परिणामे भवं पारिणामिकं, शुद्धोऽशुद्धश्च चित्तपरिणाम इत्यर्थः । किंविशिष्टानां सतां पारिणामिकं प्रमाणं ? निश्चयनयमवलम्बमानानां, यतः शब्दादिनिश्चयनयाना-मिदमेव दर्शनं, यदुत पारिणामिकमिच्छन्तीति ।
आह-यद्ययं निश्चयस्ततोऽयमेवावलम्ब्यतां किमन्येनेति ? उच्यते - निश्चयमवलम्बमानाः पुरुषाः निश्चयतः परमार्थतो निश्चयमजानानाः सन्तो नाशयन्ति चरणकरणम्, कथं ? बाह्यकरणालसाः, बाह्यं-वैयावृत्यादि, करणं तत्र अलसाः = प्रयत्नरहिताः सन्तश्चरणकरणं नाशयन्ति ।
केचिदिदं चाङ्गीकुर्वन्ति यदुत परिशुद्धपरिणाम एव प्रधानो न तु

**बाह्यक्रिया, एतच्च नाङ्गीकर्त्तव्यम्, यतः परिणाम एव बाह्यक्रियारहितः शुद्धो न भवतीति, ततश्च निश्चयव्यवहारमतमुभयरूपमेवाङ्गीकर्तव्यमिति । ( ओ.नि. ७६०-६१-६२ )**

**चन्द्र.** निश्चयव्यवहारोभयप्रधानताख्यापकोऽयं ग्रन्थो मननीयः सुगमश्च । नवरं 'गीतार्थस्य' इति पदं गीतार्थनिश्रितोपलक्षणम्, गीतार्थवत्तस्यापि विराधनायाः कर्मक्षपणफलकत्वानपायादिति ।

## ( १५९ ) ये प्रव्रजिता संयमयोगानां हानिं कुर्वन्ति समर्था अपि सन्तस्तल्लोकोत्तर-मनायतनम् । ( ओ.नि. ७६९ )

**चन्द्र.** यैः सह सुविहितानामवस्थानं न युक्तम्, ते लोकोत्तरानायतनमुच्यन्ते, ते एवात्र प्रतिपादिताः । अग्रे च मूलगुणप्रतिसेविनामुत्तरगुणप्रतिसेविनां चानायतनत्वं वक्ष्यते । तत्र मूलगुणप्रतिसेविनामनायतनत्वं तु युक्तमेव, न तैः संवासः कर्त्तव्यः, परन्तु कालादिदोषात् उत्तरगुणाप्रतिसेवमानानां प्रायोऽलाभात् यथाशक्यमत्यल्पोत्तरगुणप्रति-सेवनावतां अनायतनत्वेऽपि आयतनमिव तेषां स्वरुपमवगन्तव्यम्, अर्थात् तैः सह संवासादिः कर्त्तव्यः, न तु सर्वथैकाकिना भाव्यम् । सर्वथोत्तरगुणप्रतिसेवनाऽभावस्य स्वस्मिन्नप्यभावादिति ।

( १६० ) 'षट्स्थाने' प्राणातिपातादिके उद्गमादिके च त्रिके, अनयोरेकतरे द्वयोर्वा छलितेन स्खलितेन सता साधुना कर्त्तव्या विशुद्धिः ? किंविशिष्टा ? - शुद्धा = निष्कलङ्का दुःखक्षयार्थं कर्त्तव्येति ।

सा च विशुद्धिरालोचनापूर्विका भवतीति कृत्वाऽऽलोचनां प्रतिपादयन्नाह - आलोचना च द्विविधा - मूलगुणालोचना उत्तरगुणालोचना चेति, सा द्विविधाऽप्येकैका चतुष्कर्णा भवति, द्वयोरपि साधुसाध्वीवर्गयोरेकैकस्य चतुष्कर्णा भवति, एक आचार्यो द्वितीयश्चालोचकः साधुः, एवं साधुवर्गे चतुष्कर्णा भवति, साध्वीवर्गेऽपि चतुष्कर्णा भवति, एका प्रवर्तिनी द्वितीया तस्या एव या आलोचयति साध्वी, एवं साधुवर्गे साध्वीवर्गे च चतुष्कर्णा भवति, अथवा एकैका मूलगुणे उत्तरगुणे च चतुष्कर्णा, द्वयोश्च साधुसाध्वीवर्गयोर्मीलितयोरष्टकर्णा भवति, कथं ? आचार्य आत्मद्वितीयः प्रवर्तिनी चात्मद्वितीया आलोचयति यदा, तदाऽष्टकर्णा भवति, सामान्यसाध्वी वा यद्यालोचयति तदाऽप्यष्टकर्णैवेति, अहवा छकन्ना होज्जा, यदा वुड्ढो आयरिओ हवइ, तदा एगस्सवि साहुणीदुगं आलोएइ, एवं छकन्ना हवति, सव्वहा साहुणीए अप्पबितियाए आलोएअव्वं, न उ एगागिणीएत्ति । ( ओ.नि. ७९१ )

चन्द्र. सर्वं स्पष्टम् । नवरं यदि वृद्धेनाऽपि आचार्येण सह वृद्धाऽपि साध्वी न वार्तालापादिकं कर्तुं अर्हा, तर्हि यूना साधुना सह युवती साध्वी कथमेकाकिनी वार्तालापादिकं कर्तुं अर्हा भवेदिति सूक्ष्ममीक्षणीयम् । निरपवादब्रह्मचर्यमहाव्रत-परिपालनानुकूलानां वृतिभूतानामाचाराणां पालनमपि निरपवादवत् कर्त्तव्यम्, विशेषतस्तु दुष्षमाकाले कुनिमित्तकुसंस्कारकुकर्मादिदोषबहुले, अन्यथा ब्रह्मव्रतरक्षणस्य ब्रह्मणाऽपि कर्तुमशक्यत्वादित्यलमधिकेन ।

( १६१ ) किञ्चिदकार्यं कृत्वा पुनर्यथा नैव क्रियते, तथा तस्य प्रतिक्रमितव्यं, न पुनस्तदकार्यं हृदयेन वोढव्यम्, सर्वं आलोचयितव्यमित्यर्थः ।

कथं पुनस्तदालोचयितव्यमित्यत आह – तस्य च साधोर्यत्प्रायश्चित्तं मार्गविदो गुरव उपदिशन्ति, तत्प्रायश्चित्तं तथा तेनैव विधिनाऽऽचरितव्यम्, कथं ? अनवस्थाप्रसङ्गभीतेन सताऽऽलोचयितव्यम् । अनवस्था नाम यदि अकार्यसमाचरणात्प्रायश्चित्तं न दीयते क्रियते वा, ततोऽन्योऽपि एवमेव समाचरति यदुत प्राणिव्यपरोपणादौ न किञ्चिद् प्रायश्चित्तं भवति, ततश्च समाचरणे न कश्चिद् दोष इति । एवमनवस्थाप्रसङ्गभीतेन साधुना प्रायश्चित्तं समाचरितव्यमिति ।

इतश्चालोचयितव्यम् - न तत्करोति दुःखं शस्त्रम्, नापि विषं नापि दुःसाधितो वेतालः, यन्त्रं वा दुष्प्रयुक्तं सर्पो वा क्रुद्धः प्रमादिनः पुरुषस्य दुःखं करोति, यत्करोति भावशल्यमनुद्धृतं-उत्तमार्थकाले-ऽनशनकाले ।

किं करोतीत्यत आह - दुर्लभबोधिकत्वं अनन्तसंसारित्वं चेति, एतन्महादुःखं करोति भावशल्यं अनुद्धृतम् । शस्त्रादिदुःखानि पुनरेकभवे एव भवन्ति, अतः संयतेन सर्वमालोचयितव्यम् । ( ओ.नि. ८०३-८०४ )

**चन्द्र.** सर्वं स्पष्टम् । नवरमनवस्थाप्रसङ्गभयं परस्मिन्निव स्वस्मिन्नपि सम्भवति, प्रायश्चित्तकरणाभावे पुनः पुनः पापोद्भवनस्य शक्यत्वात्, प्रायश्चित्तकरणे तु प्रायः पुनः पापोद्गमनमसम्भवीति । तस्मात्स्वस्मिन्नप्यनवस्थावारणायावश्यं गुरुप्रदत्तं प्रायश्चित्तं वोढव्यमिति ।

**ननु** पापानालोचनायाः फलं दुर्लभबोधिकत्वादिकं द्रौपदीप्रभृतिजीवेषु न दृश्यते, नहि तैः पूर्वभवे यथाछन्दत्वादिदोषाणामालोचना कृता, न च तेषां दुर्लभबोधिकत्वादिकमभवत्, ततश्च कथमेतदवगन्तव्यमिति **चेत्**

इत्थं, कार्यं तावत्सकलकारणमीलनेनैव भवति, न त्वेकद्वयादिकारणैः यथा घटः मृच्चक्रकुलालदण्डादिभिः । एवं दुर्लभबोधिकत्वादिकं कार्यं अनालोचनादिभिरनेककारणैरेव भवति न त्वेकादिकारणैः । ततश्च यथा कुलालः घटं करोतीत्युच्यते, तथैवानालोचना दुर्लभबोधिकत्वादिकं करोतीति उच्यते । यथा च मृदाद्यभावे कुलालसत्त्वेऽपि घटो न भवति, न च तावन्मात्रेण 'कुलालः घटं करोति' इतिवाक्यस्य मिथ्यात्वम्, तथैव तथाविधतीव्राध्यवसायाभावेऽनालोचनसत्त्वेऽपि दुर्लभबोधिकत्वादिकं न भवति । न च तावन्मात्रेण "अनालोचना दुर्लभबोधिकत्वं करोति" इति वाक्यस्य मिथ्यात्वम् । तथा च न कश्चिदत्र दोषः सम्भाव्यतेऽस्माभिः ।

किञ्चालोचना यथा एतद्भवसम्बन्धिसकलपापानां अस्मिन्भवे भवति तथैव परभवेऽपि भवत्येव । तथा च द्रौपद्यादिजीवानां प्राग्भवीयपापालोचनासद्भावादेव नानालोचना, ततश्च न तत्फलमनन्तसंसारादिकं ।

**ननु** प्राग्भवीयपापानां पश्चाद्भवे स्मरणाभावात्कथं तेषामालोचनेति **चेत्**

"**सव्वा वि हु पव्वज्जा भवंतरकडाणं कम्माणं पच्छित्तं**" इति वचनात् पश्चाद्भवेऽपि प्रव्रज्यादिना प्राग्भवीयपापानामालोचनायाः सम्भवात् ।

या च जातिस्मरणाभावात्प्राग्भवीयपापानामस्मरणेनालोचनानुपपत्तिरुभाव्यते, साऽपि प्रकृतपाठबलादोघालोचना-सम्भवसाधनेन निराकरणीयेति । इत्थं च भवभेदेऽपि आलोचनासद्भावे सति अनन्तसंसारादिफलानुत्पत्तिरिति ।

एतत्तु बोध्यम्, प्राग्भवे पापनिगूहनभावतीव्रतायां तु परस्मिन्भवे तादृशभावजन्यतीव्रमोहनीयकर्मणाऽऽलोचनाकरणाध्यवसायप्रतिबन्धादनालोचना ततश्चानन्तसंसारादिफलानामपि नासुलभत्वमिति अन्यदेतत् ।

**( १६२ ) आह परः उत्कृष्टतोऽष्टभवाभ्यन्तरे सामायिकं प्राप्य नियमात्सिद्ध्यतीति, जघन्यतः पुनरेकस्मिन्नेव भवे सामायिकं प्राप्य सिद्ध्यतीत्युक्तं ग्रन्थान्तरे, ततश्च यदुक्तं त्रीन् भवानतीत्य सिद्ध्यति इति तदेतन्नाप्युत्कृष्टं नापि जघन्यं, ततश्च विरोध इति ।**

**उच्यते, अनालीढसिद्धान्तसद्भावेन यत्किञ्चिदुच्यते, यत्तदुक्तं जघन्यत एकेनैव भवेन सिद्ध्यतीति, तद् वज्रर्षभनाराचसंहनन-मङ्गीकृत्योक्तम्, एतच्च छेवट्ठिकासंहननमङ्गी-कृत्योच्यते । छेवट्ठकासंहननो हि यद्यतिशयेनाराधनं करोति, ततस्तृतीये भवे मोक्षं प्राप्नोतीति, उत्कृष्टशब्दश्चात्रातिशयार्थे द्रष्टव्यो, न तु भवमङ्गीकृत्य, भवाङ्गीकरणे पुनरष्टभिरेवोत्कृष्टतो भवैः छेवट्ठिकासंहननो सिद्ध्यतीति । ( ओ.नि. ८०५ )**

**चन्द्र. ननु** सामायिकं प्राप्य उत्कृष्टतोऽष्टभवाभ्यन्तरे सिद्ध्यतीति उक्तमत्र, परं न तद् घटते, यतो हि चतुर्दशपूर्वधराः सामायिकमवाप्याऽपि अनन्तभवभाजो भवन्तीति प्रसिद्धमेवेति **चेत्**

न, उत्कृष्टत अष्टस्वेव भवेषु सामायिकप्राप्तिः सम्भवति, नाधिकेषु इति हि तत्त्वम् । चतुर्दशपूर्वधराश्च तस्मिन्नेव भवे सामायिकभाजः पतने सति अनन्तभवान् निगोदादिष्वेव पर्यटन्ति, तत्र च सामायिकप्राप्तिर्नास्त्येवेति न तेषामष्टभवेभ्योऽधिकभवे सामायिकावाप्तिः, ततश्च न दोषः ।

इदमत्र तत्त्वम् । एकस्मिन्भवे यदि क्षणमात्रमपि षष्ठगुणस्थानावाप्तिः स्यात्, तर्हि स एको भवो गणनीयः, एवं संख्यातकालादसंख्यातकालादनन्तकालाद् वा पश्चात् यदि पुनरपि मनुष्यभवे षष्ठगुणस्थानावाप्तिः स्यात्, तर्हि स द्वितीयो भवो गणनीयः । एवंक्रमेणाष्टसु भवेषु एव सामायिकावाप्तिः, अष्टमभवेऽवश्यं मोक्षः । एतच्चोत्कृष्टतः, जघन्यतस्तु एकस्मिन्नेव भवे सामायिकावाप्तिः, तस्मिन्नेव भवे मोक्षादिति ।

तथा चतुर्दशपूर्वधरेषु असङ्ख्याततम एव भागः अनन्तसंसारादिकमवाप्नोति, तदन्ये तु असङ्ख्यगुणास्ते तस्मिन्नेव भवे संख्यातासंख्यातादिभवेभ्यः पश्चाद्वा मोक्षं यान्तीति न सकलचतुर्दशपूर्वधराणां नियमादनन्तसंसारित्वं कल्पनीयमिति सङ्क्षेपः ।

इत्थं तावत्संपूर्णोघनिर्युक्तिमाश्रित्य सिद्धान्तरहस्यबिन्दुग्रन्थस्य प्रथम उल्लासः समाप्तो भवति ।

यत्किञ्चिदत्र जिनाज्ञाविपरीतं प्रतिपादितमनाभोगादितः, तच्छोधयन्तु संविग्नगीतार्था इति प्रार्थ्य विरम्यते ।

**नमोऽस्तु तस्मै जिनशासनाय ।**

# ।। प्रशस्तिः ।।

अतुलपराक्रमतपोवीर्येण विजितकर्मारिगणस्य अधिष्ठितकैवल्यसाम्राज्यस्य माण्डलिकवृन्दायमानदिव्यश्रीविभासमानानेकसुरासुरेन्द्रपूजितचरणाम्बुजस्य स्याद्वादप्रभावकसुरम्यतीर्थप्रवर्तकस्य

श्रीवीरविभोरभूद् गणभृत् श्रीसुधर्मनामा यथार्थनामा भव्यजीवविमुक्त्याधारानेकगुणप्रवाहिन्यां सुपावन्यां पट्टावल्यां चूडामणिकल्पो प्रथमो पट्टधरः।

तथैव जाताः सुनिर्मलाचारप्रचारप्रचलितचारित्रधर्मपताकाधराः अनेकाचार्याः श्रीजम्ब्वादयः।

सार्धद्विसहस्त्रे वर्षेऽतिक्रान्तेऽजनि तत्र सच्चारित्रचूडामणिः सुनिपुणमत्या कर्मासिद्धान्तप्रभावकः सुविहितानेकशतश्रमणवृन्दशिल्पी गच्छनायकः श्रीप्रेमसूरिः सूरिधर्मप्रासादः।

तस्य च शिष्यः सुजातः न्यायतीर्थविस्मापकः वर्धमानतपोनिधिः सूरिः भुवनभानुः स्वभाःपराजीततुच्छर्क्षवादी।

तस्य च पट्टेऽद्य वर्तते आचार्यः श्रीजयघोषाभिधः सिद्धांतदिवाकरः श्रमणसंघसुविस्तारकः कमनीयकान्तया भूरिक्षान्त्या परिवृत्तः गीतार्थसभामूलनायकः

तस्य साम्राज्ये प्रादूर्भूतः युगप्रधानाचार्यस्मारकः वीरशासनोदयप्रातिहारिक आबालवृद्धगम्यदेशनादक्षः श्रोतृजनसमवायस्मारिततीर्थकृद्युगः राजबलादुद्घाट्यमानषट्पञ्चाशच्छहस्त्रशूनागृहप्रतिरोधेनाहिंसाधर्मप्रभावकः अश्रुतजिनवचनानामपि मोक्षमार्गप्रदायकोऽस्मद्गुरूः श्रीचन्द्रशेखरः कारूण्यपुण्यमूर्तिः

तस्य च शिष्येण मया कृतेयं कृतिः मुनिगुणहंसेन गुरूपादारविन्दचञ्चरिकेण।

## નીચેના પુસ્તકો આપને સ્વાધ્યાય માટે આપી શકશું...

### સાધનગ્રન્થો

૦૧) કલ્યાણમંદીર + કીરાતાર્જુનીય + શિશુપાલવધ + નૈષધીયચરિતમ્
( શ્લોક + અર્થ + સમાસ + અન્વય + ભાવાર્થ)

૦૨) ન્યાયસિદ્ધાન્ત મુક્તાવલિ
(ભાગ ૧ - ૨) ગુજરાતી વિવેચન સહિત

૦૩) વ્યાપ્તિપંચક
(ચન્દ્રશેખરીયાવૃત્તિ + વિવેચન)

૦૪) સિદ્ધાન્તલક્ષણ
(ચન્દ્રશેખરીયાવૃત્તિ ભાગ ૧ - ૨ + વિવેચન)

### આગમગ્રન્થો

૦૧) ઓઘનિર્યુક્તિ – ભાગ ૧ – ૨
(ભાગ ૧ - ૨) દ્રોણાચાર્યવૃત્તિ + ભાષાંતર પ્રતાકારમાં

૦૨) ઓઘનિર્યુક્તિ સારોદ્ધાર –
(ભાગ ૧ - ૨) વિશિષ્ટપંક્તિઓ ઉપર ગુજરાતી વિવેચન... પ્રતાકારમાં

૦૩) દશવૈકાલિક
(ભાગ ૧ થી ૪ હારિભદ્રીવૃત્તિ + ભાષાંતર)

૦૪) ઉત્તરાધ્યયન સૂત્ર – અધ્યયન – ૧
(શાંતિસૂરિવૃત્તિ + ભાષાંતર)

૦૫) આવશ્યકનિર્યુક્તિ
(ભાગ ૧ થી ૮) હારિભદ્રીવૃત્તિ + ભાષાંતર

૦૭) સિદ્ધાન્તરહસ્યબિન્દુ
(ઓ.નિ.ની વિશિષ્ટપંક્તિઓ પર સંસ્કૃત ટીકા)

૦૮) ઉપદેશમાળા
(સિદ્ધર્ષિગણિવૃત્તિ - ૧૦૦ ગાથાનું ભાષાંતર)

### સંયમ–અધ્યાત્મ–પરિણતિપોષક ગ્રન્થો

૦૧) સામાચારી પ્રકરણ
(ભાગ ૧ - ૨) ચન્દ્રશેખરીયાવૃત્તિ + ગુજરાતી ભાષાંતર

૦૨) યોગવિંશિકા
ચન્દ્રશેખરીયાવૃત્તિ

### મુમુક્ષુઓને – નૂતનદીક્ષિતોને – સંયમીઓને અત્યંત ઉપયોગી પુસ્તકો

૦૧) મુનિજીવનની બાળપોથી (ભાગ ૧-૨-૩)
૦૨) સંવિગ્ન સંયમીઓની નિયમાવલિ
૦૩) હવે તો માત્ર ને માત્ર સર્વવિરતિ
૦૪) ગુરુમાતા
૦૫) વંદના
૦૬) શરણાગતિ
૦૭) મહાપંથના અજવાળા
૦૮) વિરાટ જાગે છે ત્યારે
૦૯) ત્રિભુવનપ્રકાશ મહાવીરદેવ
૧૦) મહાભિનિષ્ક્રમણ
૧૧) ઉંડા અંધારેથી વિરાગની મસ્તી
(નં.૪ થી ૧૧ પુસ્તકો અવશ્ય વાંચવા જેવા છે)

૧૨) વિશ્વની આધ્યાત્મિક અજાયબી
(ભાગ ૧-૨-૩-૪) વર્તમાન સંયમીઓના શ્રેષ્ઠ પ્રસંગો

૧૩) ધન તે મુનિવરા રે...
(ક્ષમાદિ દસ ધર્મો ઉપર વિસ્તૃત વિવેચન)

૧૪) અષ્ટપ્રવચનમાતા
(આઠ માતા પર સૂક્ષ્મ-વિસ્તૃત વિવેચન)

૧૫) મહાવ્રતો
(પાંચ મહાવ્રતો પર સૂક્ષ્મ-વિસ્તૃત વિવેચન)

૧૬) આત્મસંપ્રેક્ષણ
(આત્માના દોષો કેવી રીતે જોવા? પકડવા? એનું સૂક્ષ્મ વર્ણન)

૧૭) મુમુક્ષુઓને માર્ગદર્શન
(દીક્ષા લેવામાં નડતરભૂત બનતા અનેક પ્રશ્નોનું સમાધાન)

૧૮) ૩૫૦ ગાથાનું સ્તવન
(ભાગ ૧,૨,૩... ૧ થી ૫ ઢાળ પર વિસ્તૃત વિવેચન)

૧૯) આત્મકથાઓ
(વિરતિદૂતમાં આવેલી ૧૧ આત્મકથાઓનું સંકલન)

૨૦) શલ્યોદ્ધાર
(સંયમમાં લાગતા સેંકડો અતિચારોનું નિરૂપણ... શ્રેષ્ઠ પુસ્તક)

**વિરતિદૂત માસિકના ૧ થી ૧૨૦ બધા અંકો મળશે...**

# સૂત્ર વિભાગ + અર્થ વિભાગના ઉપયોગી વિષયો અને તેના પ્રશ્નપત્રોનું લિસ્ટ

## સૂત્ર વિભાગ

૦૦૧) બે પ્રતિક્રમણ સૂત્રો
૦૦૨) પંચ પ્રતિક્રમણ સૂત્રો
૦૦૩) સાધુ-આવશ્યક ક્રિયાના સૂત્રો (બે ભાગમાં)
૦૦૪) શ્રી દશ વૈકાલિક સૂત્ર
૦૦૫) વૈરાગ્ય શતક
૦૦૬) ઇન્દ્રિય પરાજય શતક
૦૦૭) સંબોધ સિત્તરી
૦૦૮) યોગસાર
૦૦૯) જ્ઞાનસાર
૦૧૦) શાન્તસુધારસ
૦૧૧) પંચસૂત્ર (પ્રથમ)
૦૧૨) વીતરાગસ્તોત્ર
૦૧૩) ઉપદેશમાળા
૦૧૪) પ્રશમરતિ પ્રકરણ
૦૧૫) કુલકસંગ્રહ
૦૧૬) વૈરાગ્યકલ્પલતા (૧લો સ્તબક)
૦૧૭) હૃદયપ્રદીપ ષટ્ત્રિંશિકા
૦૧૮) યોગશાસ્ત્ર
૦૧૯) અષ્ટક પ્રકરણ
૦૨૦) ષોડશક પ્રકરણ
૦૨૧) તત્ત્વાર્થ સૂત્ર
૦૨૨) અધ્યાત્મ કલ્પદ્રુમ
૦૨૩) અધ્યાત્મસાર
૦૨૪) શ્રી ઉત્તરાધ્યયન સૂત્ર

## ગુજરાતીભાષા

૦૨૫) સમકિતના ૬૭ બોલની સજ્ઝાય
૦૨૬) ૧૨૫ ગાથાનું સ્તવન
૦૨૭) ૧૫૦ ગાથાનું સ્તવન
૦૨૮) ૩૫૦ ગાથાનું સ્તવન
૦૨૯) અમૃતવેલની સજ્ઝાય
૦૩૦) આનંદઘન ચોવીશી
૦૩૧) યોગની આઠ દૃષ્ટિની સજ્ઝાય
૦૩૨) શ્રી દેવચંદજી કૃત ચોવીશી

## અર્થ વિભાગ

૦૩૩) જીવવિચાર પ્રકરણ
૦૩૪) નવતત્ત્વ પ્રકરણ
૦૩૫) દંડક પ્રકરણ
૦૩૬) લઘુસંગ્રહણી
૦૩૭) ચૈત્યવંદન ભાષ્ય
૦૩૮) ગુરુવંદન ભાષ્ય
૦૩૯) પચ્ચક્ખાણ ભાષ્ય
૦૪૦) નવ્ય કર્મગ્રન્થ ૧ થી ૫ કર્મગ્રન્થ

## સરલસંસ્કૃતમ્

૦૪૧) સકલાર્હત કાવ્ય
૦૪૨) ભક્તામર કાવ્ય
૦૪૩) કલ્યાણમંદિર કાવ્ય
૦૪૪) રઘુવંશ બે સર્ગ
૦૪૫) કીરાતાર્જુનીયમ્ બે સર્ગ
૦૪૬) શિશુપાલ વધ બે સર્ગ
૦૪૭) નૈષધીયચરિત એક સર્ગ
૦૪૮) શ્રી દસવૈકાલિક સૂત્ર - (સુમતિસાધુવૃત્તિ)
૦૪૯) ઉપદેશમાળા - (સિદ્ધર્ષિગણિવૃત્તિ)
૦૫૦) શ્રી ઉત્તરાધ્યયન સૂત્ર - (લક્ષ્મીવલ્લભવૃત્તિ)
૦૫૧) પ્રાકૃતવિજ્ઞાન પાઠમાળા
૦૫૨) પાઇઅ વિન્નાણ કહા
૦૫૩) શ્રી ઓઘનિર્યુક્તિ
૦૫૪) પિંડનિર્યુક્તિ
૦૫૫) પ્રવચનસારોદ્ધાર
૦૫૬) ન્યાય-ભુવનભાનુ
૦૫૭) તર્કસંગ્રહ + ન્યાયબોધિની ટીકા
૦૫૮) ન્યાયસિદ્ધાન્ત મુક્તાવલિ
૦૫૯) સામાચારી પ્રકરણ
૦૬૦) પંચવસ્તુક પ્રકરણ
૦૬૧) ધર્મબિન્દુ પ્રકરણ
૦૬૨) ધર્મસંગ્રહ
૦૬૩) પંચાશક પ્રકરણ
૦૬૪) કૂપદૃષ્ટાન્ત વિશદીકરણ
૦૬૫) આરાધક-વિરાધક ચતુર્ભંગી
૦૬૬) અષ્ટક પ્રકરણ
૦૬૭) ષોડશક પ્રકરણ
૦૬૮) યોગવિંશિકા
૦૬૯) યોગશતક
૦૭૦) યોગદૃષ્ટિ સમુચ્ચય
૦૭૧) યોગબિન્દુ
૦૭૨) દ્વાત્રિંશદ્ દ્વાત્રિંશિકા
૦૭૩) ઉપદેશપદ
૦૭૪) ઉપદેશરહસ્ય
૦૭૫) દસવૈકાલિક - હારિભદ્રી વૃત્તિ
૦૭૬) શ્રી આવશ્યક નિર્યુક્તિ - હારિભદ્રીવૃત્તિ
૦૭૭) શ્રી ઉત્તરાધ્યયન સૂત્ર - શાંતિસૂરિવૃત્તિ
૦૭૮) શ્રી આચારાંગ સૂત્ર - શીલાંકાચાર્યવૃત્તિ
૦૭૯) પાંચ કર્મગ્રન્થ
૦૮૦) કમ્મપયડી (કર્મપ્રકૃત્તિઃ)
૦૮૧) પંચસૂત્ર
૦૮૨) લલિતવિસ્તરા
૦૮૩) ગુરુતત્ત્વ વિનિશ્ચય
૦૮૪) ધર્મપરીક્ષા
૦૮૫) પ્રતિમાશતક
૦૮૬) અધ્યાત્મમત પરીક્ષા